॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला

८६

वैयाकरण—

मध्यसिद्धान्तकौमुदी-चन्द्रिका

(पूर्वमध्यमा-द्वितीयखण्डस्य प्रश्नोत्तरी)

(द्वितीयो भागः)

नवीन पाठ्यक्रमानुसार लघु एवं अतिलघु
प्रश्नोत्तर सहित

लेखकः
आचार्य विजयमित्र शास्त्री

चौखम्बा सुरभारती प्रकाशन
वाराणसी

परीक्षापयोगी प्रश्नोत्तरात्मक पुस्तकें

(संस्कृत भाषा में)

अभिधावृत्तिमातृका-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
अलङ्कारशास्त्रस्येतिहासः । परमेश्वरदीन पाण्डेय
उत्तररामचरितादर्श । डॉ. रमाशंकर मिश्र
कर्पूरमंजरी-दीपिका । गौरीनाथ मिश्र 'भास्कर'
कादम्बरी-कला-प्रकाशः । डॉ. नरेश झा
कादम्बरी-सोपानम् । शिवप्रसाद द्विवेदी
काव्यप्रकाश-रहस्यम् । श्रीरामजीलाल शर्मा
काव्यमीमांसा-दीपिका । वेदव्यास शुक्ल (१-५ अध्याय)
काव्यशास्त्रस्येतिहास-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
काव्यालङ्कारसूत्रवृत्तेः-आलोकः । (तृतीयाधिकरण प्रश्नोत्तरी) । डॉ. नरेश झा
किरातार्जुनीय-रहस्यम् । डॉ. कृष्णदेव प्रसाद । १-२ सर्ग, ३-६ सर्ग
कुमारसम्भवम्-रहस्यम् । श्री रामप्रसाद त्रिपाठी । १-२ सर्ग
कुवलयानन्दालोकः । डॉ. नरेश झा
चन्द्रकलानाटिका-रहस्यम् । परमेश्वरदीन पाण्डेय
चन्द्रालोक-रहस्यम् । मानवल्ली तथा बेताल
चम्पूरामायण सोपानम् । डॉ शिवप्रसाद द्विवेदी
तर्कभाषा-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
तर्कसंग्रह-रहस्यम् । श्रीकीर्त्यानन्द झा
दशकुमारचरित-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
ध्वन्यालोक-प्रकाशिका । श्री राजेन्द्रप्रसाद कोठ्यारी
नलचम्पू-रहस्यम् । पं. परमेश्वरदीन पाण्डेय
नाट्यशास्त्र-प्रश्नोत्तरी । १-७ अध्याय; १७-२० अध्याय
नैषधीयचरित-प्रश्नोत्तरी । मिश्र एवं द्विवेदी । १-५ सर्ग; १०-१३ सर्ग
परमलघुमञ्जूषा-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
परिभाषेन्दुशेखर-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
पाणिनीयशिक्षा-सोपानम् । डॉ. बालगोविन्द झा
प्रतिमानाटक-रहस्यम् । डॉ. रमाशंकर त्रिपाठी
प्रबन्धसङ्ग्रहः (व्याकरणाचार्य निबन्ध) । डॉ. ब्रह्मानन्द त्रिपाठी
भट्टिकाव्य-दर्पणः । स्वामी प्रज्ञान भिक्षु । १-४ सर्ग, ५-८ सर्ग
भट्टिकाव्यालोकः । डॉ. रमाशङ्कर मिश्र । १४-१७ सर्ग, १८-२२ सर्ग
भारतीयसंस्कृति-सोपानम् । आचार्य शिवप्रसाद द्विवेदी
मध्यसिद्धान्तकौमुदी-चन्द्रिका । आचार्य विजयमित्रशास्त्री (१-४ खण्ड) सम्पूर्ण

॥ श्रीः ॥

B-3

चौखम्बा सुरभारती ग्रन्थमाला
८६

वैयाकरण—

मध्यसिद्धान्तकौमुदी-चन्द्रिका

(पूर्वमध्यमा-द्वितीयखण्डस्य प्रश्नोत्तरी)

(द्वितीयो भागः)

नवीन पाठ्यक्रमानुसार लघु एवं अतिलघु
प्रश्नोत्तर सहित

लेखकः
आचार्य विजयमित्र शास्त्री

चौखम्बा सुरभारती प्रकाशन
वाराणसी

प्रकाशक :

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

के. 37/117 गोपालमन्दिर लेन

पो. बा. नं. 1129, वाराणसी 221001

दूरभाष : 2335263

© सर्वाधिकार प्रकाशकाधीन

संस्करण 2011-12

मूल्य : 40.00

अन्य प्राप्तिस्थान

चौखम्बा पब्लिशिंग हाउस

4697/2, भू-तल (ग्राउण्ड फ्लोर)

गली नं. 21-ए, अंसारी रोड

दरियागंज, नई दिल्ली 110002

दूरभाष : 32996391

ई-मेल : chaukhamba_neeraj@yahoo.com

❖

चौखम्बा संस्कृत प्रतिष्ठान

38 यू. ए. बंगलो रोड, जवाहर नगर

पो. बा. नं. 2113

दिल्ली 110007

दूरभाष : 23856391

❖

चौखम्बा विद्याभवन

चौक (बैंक ऑफ बड़ोदा भवन के पीछे)

पो. बा. नं. 1069, वाराणसी 221001

दूरभाष : 2420404

प्रस्तावना

इयं वैयाकरणमध्यसिद्धान्तकौमुदी-चन्द्रिका प्रश्नोत्तरमुखीना व्याकरणशशिचन्द्रिकेवाऽस्माभिर्महता श्रमेण प्रयत्नेन च प्राकाश्यमानायि। सत्स्वप्यनेकेषु प्रश्नोत्तरीयग्रन्थेष्विदं ग्रन्थरत्नं मूर्धाऽभिषिक्तं समस्तव्याकरणज्ञानजिज्ञासुछात्रमण्डलकल्याणाय प्रकल्पिष्यते, इत्यत्र नास्ति कोऽपि विसंवादः। अस्य ग्रन्थरत्नस्य वैशेषिका गुणाः स्वयमेव प्रकाशन्तेतमाम्, तथापि केचनात्र प्रस्तूयन्ते—

१. समस्तवाङ्मयज्ञानमूलान्यक्षराण्येव सन्तीति वेदैः समाम्नायते। तथाहि—

ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधिविश्वे निषेदुः।
यस्तन्न वेद किमृचा करिष्यति च इत्तदविदुस्त इमे समासते॥
—ऋग्वेदः, मं० १, सू० १६४, मं० ३९

तान्यक्षराणि च चतुर्दशसूत्रमूलानि सर्वथा वेदवदनादीनि महर्षिणा पतञ्जलिना महाभाष्ये प्रतिष्ठापितानि। तथाहि—

'अक्षरं नक्षरं विद्यादश्नोतेर्वा सरोक्षरम्।
वर्णं वाहुः पूर्वसूत्रे किमर्थमुपदिश्यते॥'

'अथ किमर्थमक्षरमिति? न क्षीयते न क्षरतीति वाऽक्षरम्। अश्नोतेर्वा पुनरौणादिकः सरन् प्रत्ययः। अश्नुते इत्यक्षरम्। अथवा पूर्वसूत्रे वर्णस्याक्षरमिति संज्ञा क्रियते।'

अथ किमर्थं उपदेशः क्रियते?

'वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते।
तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थञ्चोपदिश्यते॥'

'सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः। सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति। मातापितरौ चास्य स्वर्गे लोके महीयेते।'—महाभाष्यम् अ० १, आ० २।

इमानि चतुर्दशसूत्राणि न केवलं व्याकरणस्यैव मूलभूतान्यपितु समस्तज्ञानविज्ञानमयस्यास्य चतुर्दशभुवनस्य कारणभूतानि सन्तीति विज्ञेयम्। अत एवैतेषां पूर्णज्ञानाय सर्वैरेव प्रयत्नो विधेयः। तदर्थमेवात्र पूर्णज्ञानाय विविधा उपायाः प्रदर्शिताः।

२. सर्वेषां वर्णानाम् (व्यञ्जनानाम्, स्वराणाम्, अयोगवाहानाञ्च)

स्थानप्रयत्नबोधाय बहवो विधयो नवनवोन्मेषशालीनि नूतनानि बोधकचक्राणि चात्र प्रकाशितानि ।

३. अध्येतृसौविध्याय बहुविधाः सूचयोऽत्र सन्निवेशिताः । तथाहि—विषयसूची, व्याख्यातसूत्रसूची, श्लोकसूची, व्याख्यातवार्तिकसूची, प्रतीकव्याख्यासूची, प्रश्नसूची, प्रयोगसूची चेति सूचयोऽत्र ग्रन्थरत्नस्य नयनानि सरसि कमलानीव शोभमानाः दृश्यन्तेतराम् ।

४. विषयसूची मध्यसिद्धान्तकौमुदीक्रमेणैवात्र सन्निवेशिता ।

५. परीक्षासु बहुषु वर्षेषु पृष्टानि विशिष्टानि सूत्राणि सरलार्थसंवलितानि सम्यग्व्याख्यातानि ।

६. परीक्षासु बहुषु वर्षेषु पृष्टाः कारिकाः श्लोकाश्चात्र सोदाहरणं व्याख्याताः

७. परीक्षासु बहुषु वर्षेषु पृष्टानि विशिष्टानि वार्तिकानि सोदाहरणं व्याख्यातानि ।

८. ग्रन्थे प्रोक्तानि प्रतीकानि सरलसंस्कृतगिरा सम्यग्व्याख्याताः ।

९. अत्र बहवो विषयाः सम्भावितप्रश्नोत्तरमुखेन सम्यग्व्याख्याताः ।

१०. सर्वे प्रयोगाः कार्यप्रदर्शनसूत्रपुरस्सरं सम्यगवधानेन साधिताः । इतः पूर्वं प्रकाशिताः सर्वे ग्रन्थाः प्रायशोऽशुद्धिबहुलाः दृश्यन्ते । सूत्रोल्लेखं विनैव कार्यप्रदर्शनमात्रसिद्धार्था विराजन्ते ।

११. एतस्य ग्रन्थस्य छात्राणां महोपकारकत्वाद् दीर्घकालस्थायिमहर्घशुभ्रकर्गलेषु नूतनाक्षरैर्मुद्रणं कृतम् ।

१२. सूचीनेत्रं विना नयनविहीनशोभनपुरुष इव ग्रन्थो विषीदति । इतः पूर्वं प्रकाशितेषु प्रश्नोत्तरीयग्रन्थेषु काचिदपि सूची न प्रकाशिता । अत्र तु सप्त सूचीप्रकाशनात्पूर्वंप्रकाशिताः सर्वे ग्रन्था नेत्रविहीनत्वात् पराभूताः ।

एतत्प्रकाशनेऽस्मज्ज्येष्ठपुत्रः डा० अशोकचन्द्रगौड व्याकरणाचार्यः बहुसाहाय्यमदात्, ततस्तस्मै शुभाशिषः प्रदीयन्ते । सुरभारतीप्रकाशनाध्यक्षेभ्यः, मुद्रणालयाध्यक्षेभ्यः, प्रत्यक्षेभ्योऽप्रत्यक्षेभ्यश्च सहायकेभ्यो बहुशो धन्यवादाः वितीर्यन्ते ।

दीपावली
विवेकानन्दनगरम्
सी० २७/२११-एल१।१
वाराणसी—२

मनस्विनां वशंवदः
विजयमित्र शास्त्री

विषयानुक्रमः

प्रकरण-सूची

भ्वादिप्रकरणम्	१८७	द्वन्द्वसमासप्रकरणम्	२६७
कारकप्रकरणम्	२४७	एकशेषप्रकरणम्	२६९
समासप्रकरणम्	२५४	समासान्तप्रकरणम्	२७०
अव्ययीभावसमासप्रकरणम्	२५५	अलुक्समासप्रकरणम्	२७२
तत्पुरुषसमासप्रकरणम्	२५८	समासाश्रयप्रकरणम्	२७३
बहुव्रीहिसमासप्रकरणम्	२६४		

व्याख्यातसूत्र-सूची

अचस्तास्वत्थ	२१२	कृत्यानां कर्तरि वा	२५३
अधिशीङ्स्थासां	२४९	कृसृभृवृस्तु०	२१३
अपवर्गे तृतीया	२५१	जनिकर्तुः प्रकृतिः	२५२
अस्मद्युत्तमः	१८७	ध्रुवमपाये०	२५२
आधारोऽधिकरणम्	२५३	परस्मैपदानां णल०	१८९
आर्धधातुकस्येड्०	२१२	परोक्षे लिट्	१८९
इत्थम्भूतलक्षणे	२५१	प्रातिपदिकार्थ०	२४७
उपदेशेऽत्वतः	२१२	भुवो वुग् लुङ्लिटोः	१८९
उभयप्राप्तौ कर्मणि	२५३	भूवादयो धातवः	१८७
ऋतो भारद्वाजस्य	२१२	यतश्च निर्धारणम्	२५४
एकाच उपदेशेऽनुदा०	२१३	यस्य च भावेन०	२५४
एनपा द्वितीया	२५३	युष्मद्युपपदे०	१८७
कर्तरि शप्	१८७	येनाङ्गविकारः	२५१
कर्तुरीप्सिततमं कर्म	२४८	लः कर्मणि च०	१८७
कर्तृकर्मणो०	२५३	लिङ्निमित्ते०	१९९
कर्मणा यमभिप्रैति०	२५१	लिटि धातोः	१८९
कालाध्वनोः	२५०	वर्तमाने लट्	१८७

शेषे प्रथमः	१८७	साधकतमं करणम्	२५०
शेषे विभाषा	१८९	स्नुक्रमोरनात्मने	२१५
षष्ठी चानादरे	२५४	स्वरतिसूति०	२१२
सहयुक्तेऽप्रधाने	२५१	हृक्रोरन्यतरस्याम्	२४९

व्याख्यातश्लोक-सूची

अजन्तोऽकार	२१४	धात्वर्थं बाधते	२००
अनुदात्ता हलन्तेषु	२१३	नकारजावनु	२२२
उदुदन्तैर्योति	२१३	भवेद् वर्णागमा	२७४
उपसर्गेण	२००	वाताय कपिला	२५२
उभसर्वतसोः	२५०	संहितैकपदे	२००
एवमुपसर्गस्य	२००	सेकृसृपृसृ	२०३

प्रश्न-सूची

के धातवः षोपदेशाः ? केचन षोपदेशाः ?	२०३	बहुव्रीहिसमासस्य शब्दार्थो व्याख्येयः	२६४
णोपदेशाः के धातवः ?	२०६	को नाम द्वन्द्वसमासः ?	२६७
सनादयः के प्रत्ययाः ?	२१०	किन्नामैकशेषत्वमिति	२६९
ष्ठा गतिनिवृत्तौ	२२२	समासाश्रयशब्देन	२७३
समासः कतिविधः ?	२५४		

प्रयोग-सूची

अ		अगदीत्	२०५	अताक्षीत्	२२८
अकटीत्	२०९	अगमत्	२२७	अतिमालः	२६१
अकामयिष्यत	२३९	अगोपायिष्यत्	२१२	अदधत्	२१८
अक्रमीत्	२१५	अगोपीत्	२११	अदर्शत्	२२४
अक्षैरक्षान् वा दीव्यति	२५१	अगौप्साम्	२११	अदासीत्	२१९
अक्षैषीः	२१४	अग्नीषोमौ	२६८	अद्धि	२४७
अक्षैषीत्	२१४	अग्लाक्षीत्	२१८	अद्युतत्	२३९,२४३
अक्ष्णोति	२२७	अचीकमत	२३८,२४३	अद्योतिष्ट	२३९,२४३
		अतक्षीत्	२२८	अद्राक्षीत्	२२४

अधात् २१८
अधासीत् २१८
अधिगोपम् २५५
अधितष्ठौ २२१
अधिभुवि रामः २५४
अधिरामे भूः २५४
अधिहरि २५५
अधीति व्याकरणे २५४
अनश्वः २६१
अनुरूपम् २५६
अनुष्यन्दते जलम् २४१
अन्तरेण हरिं न सुखम् २४९
अन्तर्भवाणि १९४
अन्तर्लोमः २६६
अपहरेः २५२
अपात् २१७
अपुः २१७
अपोषीत् २२९
अब्राजीत् २०९
अब्राह्मणः २६१
अभवः १९५
अभवत् १९४
अभवताम् १९४
अभवन् १९४
अभवम् १९५
अभवाम १९५
अभविष्यत् १९९
अभिनिविशते सन्मार्गम् २४९
अभूत् १९८
अभूवन् १९९
अयाक्षीत् २४७
अर्द्धपिप्पली २६३
अर्द्धर्चः २६३, २७०
अर्धपिप्पली २५९
अवाक्षीत् २४७
अवोढाम् २४६
अशिक्षत् २२७
अशिश्रियत् २४४
अश्रृणवम् २२५
अश्च्युतत् २०७
असाधुर्मातुले २५३
अस्खालीत् २१६
अहर्दिवम् २७२
अहोरात्रः २६२
अह्वार्षीत् २२१
आ
आचामति २१६
आत २०१
आतत् २०२
आतिषुः २०१
आतिष्ट २०२
आतीः २०२
आतीत् २०१
आत्मनेपदम् २७२
आनक्षिथ २२८
आनर्च २०६
आनर्च २०८
आनष्ठ २२८
आमुक्तेः संसारः २५२
आसनात्प्रेक्षते २५२
आसन्नविंशाः २६५
इ
इयाज २४६
ई
ईजतुः २४६
ईदृक् २७४
उ
उदपेषं पिनष्टि २७४
उपदंशाः २६५
उपराजम् २५८
उपशरदम् २५८
उवाह २४६
ए
एधते २२९
एधध्वे २३०
एधन्ते २२९
एधसे २३०
एधस्व २३३
एधाञ्चक्राते २३१
एधाञ्चकृद्वे २३२
एधाञ्चकृषे २१३
एधाञ्चक्रे २३०
एधामास २३२
एधाम्बभूव २३३
एधावहे २३०
एधावहै २३३
एधिद्वम् २३६
एधिताहे ३२६

एधिपीयास्ताम् २३५
एधिषीष्ट २३५
एधिष्यामहे २३६
एधे २३०
एधेत २३४
एधेते २२९
एधेय २३४
एधेरन् २३४
एधै २३३
एधोदकस्योपस्कुरुते २५३

ऐ

ऐधिषत २३५
ऐधिष्ट २३५
ऐधिष्यत २३७

ओ

ओजसा कृतम् २७२

क

कटे आस्ते २५३
कण्ठेकालः २६४
कत्तृणम् २७४
कल्पिषीष्ट २४२
कल्प्स्यति २४२
कल्याणीपञ्चमाः २६४
कामयते २३७
कामयाञ्चक्रे २३७
किराजा २७१
कुपुरुषः २६१
कुम्भकारः २६१
कुरून् स्वपिति २४९
कूर्दते २४०
केशाकेशि २६५
केशेषु चमरीं हन्ति २५४
कौमुदगन्धीपुत्रः २७४
क्रमिता २१५
क्राम्यति २१५
क्लृप्सीष्ट २४४
क्षीयात् २१४

ग

गच्छति २२६
गमिष्यति २२७
गर्गान् शतं दण्डयति २४९
गवाक्षः २७१
गां दोग्धि पयः २४९
गार्ग्यौ २६९
गावः इमाः २७०
गोत्रेण गार्ग्यः २५१
गोपायति २१०
गोपायाञ्चकार २१०
गोमहिषम् २६८
गोव्याघ्रम् २६८
ग्रामं समया २५०
ग्रामेवासी २७२
ग्लेयात् २१७

च

चक्षण्वहे २३९
चक्षमिवहे २३९
चित्रगुः २६४
चिन्मात्रम् २६१
चुश्च्योत २०८
चुश्च्योत् २०७
चोरभयम् २५९

छ

छत्रोपाहनम् २६८

ज

जगद २०५
जगन्थ २२६
जगमिथ २२६
जगाद २०५
जगाम २२६
जग्मतुः २२६
जपमनु प्रावर्षत् २५०
जलजाक्षी २६५
जहार २४५
जह्रुर्थ २२०
जह्वार २२०
जिघ्रति २१९
जुगोपिथ २११

त

तक्ष्णोति २२७
तस्करः २७५
तिलेभ्यः प्रतियच्छति माषान् २५२
तिष्ठति २२१
त्रेपे २४४

द

ददृशतुः २२३
दध्योदनः २५९
दायति २१९
दायात् २१९

दिद्युते २४०
दीव्यन्ति २५८
दुर्भवानि १९४
दुःस्थितिः १९४
दृढभक्तिः २६५
देवपूजकः २५९
द्रक्ष्यति २२३
द्रुणसः २६६
द्विनावम् २६२
द्विमूर्द्धः २६६
द्वीपम् २७०

ध

धवखदिरौ २६७
धूमादग्निमान् २५२

न

नखनिर्भिन्नः २५९
नन्द्यात् २०८
नास्ति घटोऽनुपलब्धेः २५२
निकषा लङ्काम् २५०
निषिषिधतुः २०४
निषिषेध २०४
निषेधति २०३
निष्कौशाम्बि. २६१
निष्टपति २१५
नेदतुः २०६
नेदिथ २०७
न्यषेधत् २०४
न्यषेधीत् २०४

प

पञ्चकपालः २६३
पञ्चगङ्गम् २५७
पञ्चगवधनः २६०
पञ्चगवम् २६२
पदातिः २७३
पपतुः २१७
पपिथ २१७
पपौ २१६, २२०
परमराजः २६२
परस्मैपदम् २७२
परिहरेः २५२
पलायते २४०
पश्यति २२३
पश्यतोहरः २७३
पापेऽभिनिवेशः २४९
पारेगङ्गम् २५७
पितरौ २६९
पिबति २१६
पूर्वरात्रः २६२
पृथग्रामेण २५२
पौर्वशालः २६०
प्रणदति २०६
प्रणिगदति २०५
प्रणिनदति २०६
प्रणिभवति २००
प्रभवाणि १९४
प्राष्ठो रथः २७१
प्रायश्चित्तम् २७५

ब

बभूव १९०
बभूवतुः १९०
बभूविथ १९०
बभूवुः १९०
बलाहकः २७४
बलिं भिक्षते वसुधां २४९
बृहस्पतिः २७५
ब्राह्मणिचेली २७३

भ

भव १९२
भवत १९३
भवतम् १९३
भवतात् १९२
भवताम् १९२
भवति १८८
भवतु १९२
भवन्ति १८८
भवानि १९३
भवामः १८८
भवामि १८८
भवाव १९३
भविता १९१
भवितारः १९१
भवितारौ १९१
भवितासि १९२
भविष्यति १९२
भवेः १९६
भवेत् १९५
भवेताम् १९६
भवेम १९७
भवेयम् १९६
भवेयुः १९६

भूयाः १९८
भूयात् १९७
भूयासम् १९८
भूयासुः १९८
भूयास्ताम् १९७
भूयास्व १९८
भ्रियात् २४५
भ्रेजे २४५

म

महायशस्कः २६७
महायशाः २६७
महाराजः २६३
महावैयाकरणः २६०
मातरि साधुः २५४
मातरपितरौ २६८
मातुःष्वसा २७३
मा भवान् भूत् १९९
मासपूर्वः २५९
मासमधीते २५०
मास्म भवान् भवत् १९९
मास्म भूत् १९९
मित्रावरुणौ २६८
मुरस्य मुरं वा द्विषन् २५३
मूर्वति २२९

य

युधिष्ठिरः २७२
युवजानिः २६६
रथिकाश्वारोहम् २६७

र

राज्ञां मतः २५३
रूपवद् भार्यः २६४
रोषिता २२८

ल

लक्ष्म्याः कामुकः २५३
लोहितगङ्गम् २५८

व

वर्तिष्यते २४१
वर्त्स्यति २४१,२४५
ववनतुः २०८
ववृते २४१,२४४
विख्यः २६६
विद्वत्तरा २७३
विप्राय गां ददाति २५१
विश्वामित्रः २७५
विसेधति २०५
वीरपुरुषकः २६४
वृक्षं वृक्षं प्रति, परि, अनु, वा विद्योतते विद्युत् २५०
व्याकरणस्य त्रिमुनि २५७
व्याघ्रीः २६२
व्यूढोरस्कः २६७
व्रजं गामी २५३

श

शताय परिक्रीतः २५२
शृणु २२५
शृणुयुः २२५
शृणोति २२४
शृण्वः २२४
शृण्वन्ति २२५

ष

षाण्मातुरः २६०

स

सखिपथः २७०
सतीर्थ्यः २७४
सप्तगोदावरम् २७१
सर्मा २२७
सर्वश्वेतः २५९
सस्वरिव २२२
सस्वर्थ २२२
सायात् २०९
सिषिधतुः २०३
सिषेध २०२
सिषेधिथ २०२
सुराजा २७१
स्थेयात् २२०
स्नप्ता २२७
स्नियात् २२३

ह

हंसी २६९
ह्वरिष्यति २२१
ह्वर्यात् २२०,२२१

॥ श्रीः ॥

मध्यकौमुदी-चन्द्रिका

अथ भ्वादिप्रकरणम्

भूवादयो धातवः ॥ १।३।१ ॥

भू सत्तायाम्, एध वृद्धौ इत्येवमादयः क्रियावचनाः धातवो धातुसंज्ञका भवन्ति ।

वर्तमाने लट् ॥ ३।२।१२३ ॥

वर्तमानकालिकक्रियावचनाद्धातोर्लट् स्यात् ।

लः कर्मणि च भावे चाऽकर्मकेभ्यः ॥ ३।४।६९ ॥

सूत्रेऽस्मिन् वाक्यमस्ति । तत्र 'लः कर्मणि च' इति प्रथमं वाक्यम्, 'भावे चाऽकर्मकेभ्यः' इति द्वितीयं वाक्यम् । चकारग्रहणात् 'कर्तरि कृत्' इति सूत्रात् 'कर्तरि' इत्यनुवर्तते । तत्रोभयवाक्ये चकारेण बोध्यते । पूर्वो योगः सकर्मकविषयकः, द्वितीयो योगः अकर्मकविषयकः ।

प्रथमवाक्यार्थः—लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युः ।

द्वितीयवाक्यार्थः—लकारा अकर्मकेभ्यः भावे कर्तरि च स्युः ।

युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ॥ १।४।१०५ ॥

तिङ्वाच्यकारकवाचिनि युष्मदि शब्द उपदेशे प्रयुज्यमानेऽप्रयुज्यमाने च धातोर्मध्यमपुरुषो भवति । यथा—त्वं पठसि, पठसि इत्युभावपि प्रयोगौ साधू स्तः ।

अस्मद्युत्तमः ॥ १।४।१०७ ॥

तिङ्वाच्यकारकवाचिनि अस्मदि शब्द उपपदे प्रयुज्यमानेऽप्रयुज्यमाने च धातोरुत्तमपुरुषो भवति । यथा—अहं पठामि, पठामि इत्युभावपि प्रयोगौ साधू स्तः ।

शेषे प्रथमः ॥ १।४।१०८ ॥

मध्यमोत्तमयोरविषयः शेषः । तस्मिन् शेषे धातोः प्रथमपुरुषो भवति । यथा—सः पठति, पठतः, ते पठन्ति ।

कर्तरि शप् ॥ ३।१।६८ ॥

कर्तर्यर्थे सार्वधातुसंज्ञके प्रत्यये परतो धातोः शप् प्रत्ययो भवति ।

भवति—'भू सत्तायाम्' इत्यस्माद्धातोः 'वर्तमाने लट्' इत्यनेन वर्तमानेऽर्थे लट् प्रत्यये, अनुबन्धलोपे, 'लस्य' इत्यधिकृत्य 'तिप्तस्झिसिप्थस्थ·····' इत्यादिना तिबादयोऽष्टादश लादेशाः प्राप्ताः, ततः 'तङानावात्मनेपदम्' इत्यनेन त आताम् झ, थास् आथाम् ध्वम्, इड् वहि महिङ् इत्येषां प्रत्ययानामात्मनेपदसंज्ञायां 'शेषात् कर्तरि परस्मैपदम्' इत्यनेन भूधातोः परस्मैपदे 'तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः' इत्यनेन त्रयाणां त्रिकाणां प्रथम-मध्यमोत्तमसंज्ञायां 'तान्येकवचनद्विवचनबहुवचनान्येकशः' इत्यनेन तिङस्त्रयाणां वचनानां क्रमशः एकवचनद्विवचनबहुवचनसंज्ञायां 'शेषे प्रथमः' इत्यनेन प्रथमपुरुषे 'द्व्येकयोर्द्विवचनैकवचने' इत्यनेन एकत्वविवक्षायामेकवचने तिप् प्रत्यये, अनुबन्धलोपे भू+ति इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे प्राप्ते 'भूसुवोस्तिङि' इत्यनेन गुणनिषेधे 'कर्तरि शप्' इत्यनेन शप् प्रत्यये, अनुबन्धलोपे, शित्त्वात् 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे ओकारे जाते 'एचोऽयवायावः' इत्यनेन अवादेशे संयोगे च कृते 'भवति' इति सिद्धम्।

भवन्ति—भूधातोर्वर्तमानेऽर्थे लटि प्रथमपुरुषे 'बहुषु बहुवचनम्' इत्यनेन बहुत्वविवक्षायां झि प्रत्यये, भू+झि इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे प्राप्ते 'भूसुवोस्तिङि' इत्यनेन गुणनिषेधे 'कर्तरि शप्' इत्यनेन शप् प्रत्यये, अनुबन्धलोपे, शित्त्वात् 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे ओकारे 'भो+अ+झि' इति जाते 'झोऽन्तः' इत्यन्तादेशे, भो+अ+अन्ति इति जाते 'एचोऽयवायावः' इत्यनेन अवादेशे 'अतो गुणे' इत्यनेन पररूपत्वे 'भवन्ति' इति सिद्धम्।

भवामि—भूधातोर्लट्लकारे उत्तमपुरुषे एकत्वविवक्षायामेकवचने मिप् प्रत्यये अनुबन्धलोपे, भू+मि इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे प्राप्ते 'भूसुवोस्तिङि' इत्यनेन गुणनिषेधे 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे, भू+अ+मि इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन शित्त्वात् सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अवादेशे, भव+मि इति जाते 'अतो दीर्घो यञि' इत्यनेन दीर्घे 'भवामि' इति सिद्धम्।

भवामः—भूधातोर्लट्लकारे उत्तमपुरुषे बहुत्वविवक्षायां बहुवचने मस् प्रत्यये, भू+मस् इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां

'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे प्राप्ते 'भूसुवोस्तिङि' इत्यनेन गुणनिषेधे 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे, भू+अ+मस् इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन शित्त्वात् सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे ओकारे 'एचोऽयवायावः' इत्यनेन अवादेशे, भव+मस् इति जाते 'अतो दीर्घो यञि' इत्यनेन दीर्घे 'ससजुषो रुः' इत्यनेन सकारस्य रुत्वे अनुबन्धलोपे 'खरवसानयोर्विसर्जनीयः' इत्यनेन विसर्गे 'भवामः' इति सिद्धम् ।

शेषे विभाषाऽकखादावषान्त उपदेशे ॥ १।४।१८ ॥

उपदेशे कादिखादिषान्तवर्जे गदनदादेरन्यस्मिन् धातौ परत उपसर्गस्थान्निमित्तात् परस्य नेर्णत्वं वा स्यात् । यथा—प्रणिभवति, प्रनिभवति ।

परोक्षे लिट् ॥ ३।२।११५ ॥

भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात् ।

विशेषः—अनद्यतन काल के दो भेद हैं—भूत और भविष्य। पूर्व दिन को आधी रात (१२ बजे) तक जो क्रिया हुई हो, वह भूत अनद्यतन और आगामी (आज) रात के बारह बजे के बाद जो क्रिया होने वाली हो, वह भविष्यत् अनद्यतन (लुट्) की क्रिया कही जाती है। तथा हि—अतीताया रात्रेः पञ्चार्धेन पूर्वार्धेन च सहितो दिवसोऽद्यतनः तद्भिन्नोऽनद्यतनः। 'परोक्ष' उसको कहते हैं, जिसमें वक्ता का प्रत्यक्ष न हो। इस प्रकार यह सिद्ध हुआ कि परोक्ष और अनद्यतन भूतकाल में 'लिट्' का प्रयोग हो। यथा—'रामो बालिनं जघान।' स्मरण रहे कि चित्तविक्षेप में तथा किसी भी हालत में स्वीकार नहीं करने पर प्रत्यक्ष (उत्तमपुरुष) में भी लिट् का प्रयोग होता है। जैसे—१. सुप्तोऽहं किल विललाप, २. नाऽहं कलिङ्गान् जगाम।

परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ॥ ३।४।८२ ॥

लिटस्तिबादीनां क्रमशो णलादय आदेशाः स्युः। यथा—णल् अतुस् उस्—प्रथमपुरुषः। थल् अथुस् अ—मध्यमपुरुषः। णल् व म—उत्तमपुरुषः।

भुवो वुग्लुङ्लिटोः ॥ ६।४।८८ ॥

भूधातोर्वुगागमो भवति, लुङ्लिटोरचि परतः।

लिटि धातोरनभ्यासस्य ॥ ६।१।८ ॥

लिटि-परतोऽनभ्यासस्य (द्वित्ववर्जितस्य) धात्ववयवस्य प्रथमस्यैकाचः, आदिभूतादचः परस्य तु द्वितीयस्यैकाचो द्वित्वं भवति।

बभूव—भूधातोः 'परोक्षे लिट्' इत्यनेन लिट्यनुबन्धलोपे, लः स्थाने 'तिप्तस्झि' इत्यादिना प्रथमपुरुषैकवचने तिप् प्रत्यये 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन तिपो णलादेशे 'चुटू' इत्यनेन णकारस्येत्संज्ञायां 'हलन्त्यम्' इत्यनेन लकारस्येत्संज्ञायां 'तस्य लोपः' इत्यनेनोभयोर्लोपे, भू+अ इति जाते नित्यत्वाद् गुणवृद्धी बाधित्वा 'भुवो वुग्लुङ्लिटोः' इत्यनेन भूधातोर्वुगागमे अनुबन्धलोपे कित्त्वादन्त्यावयवे, भूव्+अ इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे 'भूव्+भूव्+अ' इति जाते 'पूर्वोऽभ्यासः' इत्यनेन पूर्वस्य 'भूव्' इत्यस्याऽभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन व् लोपे, भू+भूव्+अ इति जाते 'ह्रस्वः' इत्यनेन ह्रस्वत्वे 'भवतेरः' इत्यनेन अभ्यासोकारस्य अकारे, भ+भूव्+अ इति जाते 'अभ्यासे चर्च' इत्यनेन अभ्याससंज्ञकस्य भस्य बत्वे संयोगे 'बभूव' इति सिद्धम्।

बभूवतुः—भूधातोः 'परोक्षे लिट्' इत्यनेन लिट्यनुबन्धलोपे, लः स्थाने 'तिप्तस्झि' इत्यादिना प्रथमपुरुषद्विवचने अतुस् प्रत्यये 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन तसोऽतुसादेशे, भू+अतुस् इति जाते नित्यत्वाद् गुणवृद्धी बाधित्वा 'भुवो वुग्लुङ्लिटोः' इत्यनेन भूधातोर्वुगागमे अनुबन्धलोपे कित्त्वादन्त्यावयवे, भूव्+अतुस् इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन व् लोपे 'ह्रस्वः' इत्यनेन ह्रस्वत्वे 'भवतेरः' इत्यनेन अभ्यासोकारस्य अकारे 'अभ्यासे चर्च' इत्यनेन अभ्याससंज्ञकस्य भस्य बत्वे, बभूव्+अतुस् इति जाते, संयोगे सकारस्य रुत्वे विसर्गे च 'बभूवतुः' इति सिद्धम्।

बभूवुः—भूधातोः 'परोक्षे लिट्' इत्यनेन लिट्यनुबन्धलोपे, लः स्थाने 'तिप्तस्झि' इत्यादिना प्रथमपुरुषबहुवचने झि प्रत्यये 'परस्मैपदानां०' इत्यादिना झेरुसादेशे, भू+उस् इति जाते नित्यत्वाद् गुणवृद्धी बाधित्वा 'भुवो वुग्लुङ्लिटोः' इत्यनेन भूधातोर्वुगागमे, अनुबन्धलोपे कित्त्वादन्त्यावयवे, भूव्+उस् इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन व् लोपे 'ह्रस्वः' इत्यनेन ह्रस्वत्वे 'भवतेरः' इत्यनेन अभ्यासोकारस्य अकारे 'अभ्यासे चर्च' इत्यनेन अभ्याससंज्ञकस्य भस्य बत्वे संयोगे, सकारस्य रुत्वे विसर्गे च 'बभूवुः' इति सिद्धम्।

बभूविथ—भूधातोः 'परोक्षे लिट्' इत्यनेन लिट्यनुबन्धलोपे, लस्य स्थाने 'तिप्तस्झि' इत्यादिना मध्यमपुरुषैकवचने सिप् प्रत्यये, तस्य 'लिट् च' इत्यनेन आर्धधातुकसंज्ञायां 'परस्मैपदानाम्' इत्यादिना सिपः थलादेशे अनुबन्धलोपे

भू+थ इति जाते 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे अनुबन्धलोपे 'भुवो वुग्लुङ्लिटोः' इत्यनेन वुगागमे अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे, भूव्+भूव्+इ+थ इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्यास-संज्ञायां 'हलादिः शेषः' इत्यनेन व्लोपे, 'ह्रस्वः' इत्यनेन ह्रस्वत्वे 'भवतेरः' इत्यनेन उकारस्य अकारे 'अभ्यासे चर्च' इत्यनेन भस्य वत्वे 'बभूविथ' इति सिद्धम्।

भविता—भूधातोः 'अनद्यतने लुट्' इत्यनेन लुट्यनुबन्धलोपे, लः स्थाने प्रथमपुरुषैकवचने तिप् प्रत्यये अनुबन्धलोपे 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शपि प्राप्ते तं बाधित्वा 'स्यतासी ल्लुटोः' इत्यनेन तासि 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायाम् 'आर्ध-धातुकस्येड् वलादेः' इत्यनेन इडागमे, अनुबन्धलोपे भू+इ+तास्+ति इति जाते 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अवादेशे 'लुटः प्रथमस्य डारौरसः' इत्यनेन तिपो डा आदेशे अनुबन्धलोपे, भवितास्+आ इति जाते डित्त्वसामर्थ्यादभस्यापि टेर्लोपे 'भविता' इति सिद्धम्।

भवितारौ—भूधातोः 'अनद्यतने लुट्' इत्यनेन लुट्यनुबन्धलोपे लः स्थाने प्रथमपुरुषद्विवचने तस् प्रत्यये, भू+तस् इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शपि प्राप्ते, तं बाधित्वा 'स्यतासी ल्लुटोः' इत्यनेन तासि 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इत्यनेन इडागमे अनुबन्धलोपे, भू+इ+तास्+तस् इति जाते 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अवादेशे, भवितास्+तस् इति जाते 'लुटः प्रथमस्य डारौरसः' इत्यनेन तसो 'रौ' इत्यादेशे 'रि च' इत्यनेन तासः सकारस्य लोपे 'भवितारौ' इति सिद्धम्।

भवितारः—भूधातोः 'अनद्यतने लुट्' इत्यनेन लुट्यनुबन्धलोपे, लः स्थाने प्रथमपुरुषबहुवचने झि प्रत्यये, भू+झि इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शपि प्राप्ते, तं बाधित्वा 'स्यतासी ल्लुटोः' इत्यनेन तासि 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इत्यनेन इडागमे, अनुबन्धलोपे, भू+इ+तास्+झि इति जाते 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अवादेशे, भवितास्+झि इति जाते 'लुटः प्रथमस्य डारौरसः' इत्यनेन झे रसा-देशे 'रि च' इत्यनेन तासः सकारस्य लोपे, सकारस्य रुत्वे विसर्गे च 'भवितारः' इति सिद्धम्।

भवितासि—भूधातोः 'अनद्यतने लुट्' इत्यनेन लुटचनुबन्धलोपे लः स्थाने मध्यमपुरुषैकवचने सिप् प्रत्यये अनुबन्धलोपे, भू+सि इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शपि प्राप्ते, तं बाधित्वा 'स्यतासी ल्लुटोः' इत्यनेन तासि 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इत्यनेन इडागमे अनुबन्धलोपे, भू+इ+तास्+सि इति जाते 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अवादेशे, भवितास्+सि इति जाते 'तासस्त्योर्लोपः' इत्यनेन तासः सकारस्य लोपे 'भवितासि' इति सिद्धम् ।

भविष्यति—भूधातोः 'लृट् शेषे च' इत्यनेन लृट्लकारे अनुबन्धलोपे, लः स्थाने प्रथमपुरुषैकवचने तिप् प्रत्यये अनुबन्धलोपे, भू+ति इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शपि प्राप्ते, तं बाधित्वा 'स्यतासी ल्लुटोः' इत्यनेन स्यप्रत्यये, तस्य 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इत्यनेन इडागमे अनुबन्धलोपे, भू+इ+स्य+ति इति जाते 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे, अवादेशे भव+इ+स्य+ति इति जाते संयोगे 'आदेशप्रत्यययोः' इत्यनेन सस्य षत्वे 'भविष्यति' इति सिद्धम् ।

भवतु, भवतात्—भू धातोः 'लोट् च' 'आशिषि लिङ्लोटौ' इत्यनेन लोट्लकारे अनुबन्धलोपे, लः स्थाने प्रथमपुरुषैकवचने तिप् प्रत्यये अनुबन्धलोपे 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे 'तिङ्शित् सार्वधातुकम्' इत्यनेन शित्त्वात् शपोऽकारस्यापि सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे, अवादेशे 'एरुः' इत्यनेन इकारस्य उकारे 'भवतु' इति सिद्धम् । आशिष्यर्थे 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इत्यनेन 'तु' इत्यस्य तातङादेशे अनुबन्धलोपे 'भवतात्' इति सिध्यति ।

भवताम्—भूधातोः 'लोट् च' इत्यनेन लोटचनुबन्धलोपे, लः स्थाने प्रथमपुरुषद्विवचने तस् प्रत्यये 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे, शित्त्वात् शपोऽकारस्यापि सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे, अवादेशे 'लोटो लङ्वत्' इत्यनेन लोटः लङ्वद्भावे 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन तसः स्थाने तामादेशे 'भवताम्' इति सिद्धम् ।

भव, भवतात्—भूधातोर्लोटचनुबन्धलोपे, लः स्थाने मध्यमपुरुषैकवचने सिप्

प्रत्यये, अनुबन्धलोपे भू+सि इति जाते 'लोटो लङ्वत्' इत्यनेन लोटो लङ्वद्भावे 'सेर्ह्यपिच्च' इत्यनेन से'र्हि' इत्यादेशे सार्वधातुकत्वात् शप्यनुबन्धलोपे, शित्त्वात् शपोऽकारस्याऽपि सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अवादेशे भव+हि इति जाते 'अतो हेः' इत्यनेन हेर्लुकि 'भव' इति सिद्धम्। आशिष्यर्थे भव+हि इत्यवस्थायां 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इत्यनेन हेस्तातङादेशे अनुबन्धलोपे 'भवतात्' इति सिध्यति।

भवतम्—भूधातोर्लोट्यनुबन्धलोपे, लः स्थाने मध्यमपुरुषद्विवचने थस् प्रत्यये भू+थस् इति जाते 'लोटो लङ्वत्' इत्यनेन लोटो लङ्वद्भावे 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन थसः तमादेशे भू+तम् इति जाते सार्वधातुकत्वात् शप्यनुबन्धलोपे शित्त्वात् शपोऽकारस्याऽपि सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अवादेशे 'भवतम्' इति सिद्धम्।

भवत—भूधातोर्लोट्यनुबन्धलोपे, लः स्थाने मध्यमपुरुषबहुवचने थ प्रत्यये भू+थ इति जाते 'लोटो लङ्वत्' इत्यनेन लोटो लङ्वद्भावे 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन थस्य 'त' इत्यादेशे, भू+त इति जाते, सार्वधातुकत्वात् शप्यनुबन्धलोपे, शित्त्वात् शपोऽकारस्याऽपि सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अवादेशे 'भवत' इति सिद्धम्।

भवानि—भूधातोर्लोट्यनुबन्धलोपे, लः स्थाने उत्तमपुरुषैकवचने मिप् प्रत्यये भू+मिप् इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे, शपः सार्वधातुकत्वेन 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अवादेशे 'लोटो लङ्वत्' इत्यनेन लङ्कार्यातिदेशेन 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन मिपः स्थानेऽमादेशे प्राप्ते तं प्रबाध्य 'मेर्निः' इत्यनेन मेर्न्यादेशे इकारोच्चारणसामर्थ्यादिकारस्योत्वाभावे 'आडुत्तमस्य पिच्च' इत्यनेन आडागमे अनुबन्धलोपे भव+आ+नि इति जाते 'अतो दीर्घो यञि' इत्यनेन दीर्घे भवा+आ+नि इति जाते 'अकः सवर्णे दीर्घः' इत्यनेन सवर्णदीर्घे 'भवानि' इति सिद्धम्।

भवाव—भूधातोर्लोटि अनुबन्धलोपे लः स्थाने उत्तमपुरुषद्विवचने वस् प्रत्यये भू+वस् इति जाते सार्वधातुकत्वात् 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे, शपः शित्वेन सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अवादेशे भव+वस् इति जाते 'आडुत्तमस्य पिच्च' इत्याडागमेऽनुबन्धलोपे 'अतो दीर्घो यञि' इत्यनेन दीर्घे 'अकः सवर्णे दीर्घः' इत्यनेन

सवर्णदीर्घे 'लोटो लङ्वत्' इत्यनेन लङ्वद्भावे 'नित्यं ङितः' इत्यनेन सलोपे 'भवाव' इति सिद्धम् । एवम् उत्तमपुरुषबहुवचने 'भवाम इत्यपि बोध्यम् ।

प्रभवाणि—भूधातोर्लोटि, तत्स्थाने मिपि शपि गुणेऽवादेशे मेन्यादेशे आडागमे अनुबन्धलोपे दीर्घे 'ते प्राग्धातोः' इति सूत्रबलात् 'प्र' इत्युपसर्गस्य पूर्वमेव प्रयोगे 'आनि लोट्' इत्यनेन नस्य णत्वे 'प्रभवाणि' इति सिद्धम् ।

दुःस्थितिः—अत्र 'दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः' इति वार्तिकेन निषेधात् 'उपसर्गात् सुनोति' इत्यादिना सस्य षत्वं न भवति ।

दुर्भवानि—अत्र 'दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः' इति वार्तिकेन दुरः उपसर्गत्वप्रतिषेधात् 'आनि लोट्' इत्यनेन नस्य णत्वं न भवति ।

अन्तर्भवाणि—अत्र 'अन्तःशब्दस्याऽङ्किविधिणत्वेषूपसर्गत्वं वाच्यम्' इति वार्तिकेन उपसर्गत्वातिदेशात् 'आनि लोट्' इत्यनेन नस्य णत्वे 'अन्तर्भवाणि' इति सिध्यति ।

अभवत्—भूधातोः 'अनद्यतने लङ्' इत्यनेन लङ्लकारे अनुबन्धलोपे लः स्थाने प्रथमपुरुषैकवचने तिप् प्रत्यये अनुबन्धलोपे भू+ति इति जाते, 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे तस्य शित्त्वात् सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अवादेशे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'इतश्च' इत्यनेन तिप इकारलोपे 'अभवत्' इति सिद्धम् ।

अभवताम्—भूधातोः 'अनद्यतने लङ्' इत्यनेन लङ्लकारे अनुबन्धलोपे लः स्थाने प्रथमपुरुषद्विवचने तस् प्रत्यये भू+तस् इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे तस्य शित्त्वात् सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अवादेशे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन तसः तामादेशे 'अभवताम्' इति सिद्धम् ।

अभवन्—भूधातोः 'अनद्यतने लङ्' इत्यनेन लङ्लकारे अनुबन्धलोपे लः स्थाने प्रथमपुरुषबहुवचने झि प्रत्यये भू+झि इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे शित्वेन शपः सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे अवादेशे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अभव्+अ+झि

इति जाते 'झोऽन्तः' इत्यनेन झस्याऽन्तादेशे 'इतश्च' इत्यनेन इकारलोपे 'संयोगान्तस्य लोपः' इत्यनेन तकारलोपे 'अभवन्' इति सिद्धम् ।

अभवः—भूधातोः 'अनद्यतने लङ्' इत्यनेन लङ्लकारे अनुबन्धलोपे लः स्थाने मध्यमपुरुषैकवचने सिप् प्रत्यये, अनुबन्धलोपे भू+सि इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे, शित्वेन शपः सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे, अवादेशे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अभव्+अ+सि इति जाते 'इतश्च' इत्यनेन इकारलोपे, सकारस्य रुत्वे विसर्गे च 'अभवः' इति सिद्धम् ।

अभवम्—भूधातोः 'अनद्यतने लङ्' इत्यनेन लङ्यनुबन्धलोपे, लः स्थाने उत्तमपुरुषैकवचने मिप् प्रत्यये, अनुबन्धलोपे भू+मि इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे, शित्त्वेन शपः सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे, अवादेशे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अभव्+अ+मि इति जाते 'सस्थस्थमिपां तान्तन्तामः' इत्यनेन 'मि' इत्यस्य अमादेशे अभव्+अ+अम् इति जाते 'अतो गुणे' इत्यनेन पररूपत्वे 'अभवम्' इति सिद्धम् ।

अभवाम—भूधातोः 'अनद्यतने लङ्' इत्यनेन लङ्यनुबन्धलोपे, लः स्थाने उत्तमपुरुषबहुवचने मस् प्रत्यये भू+मस् इति जाते 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे, शित्त्वेन शपः सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे, अवादेशे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'अतो दीर्घो यञि' इत्यनेन दीर्घे 'नित्यं ङितः' इत्यनेन सकारलोपे 'अभवाम' इति सिद्धम् । एवम् 'अभवाव' इत्यपि बोध्यम् ।

भवेत्—भूधातोः 'विधिनिमन्त्रणाऽऽमन्त्रणा' इत्यादिना विधिलिङ्लकारे अनुबन्धलोपे, लः स्थाने प्रथमपुरुषैकवचने तिप् प्रत्यये अनुबन्धलोपे सार्वधातुकसंज्ञायां, 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे, शपः शित्त्वेन सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे, अवादेशे भव्+अ+ति इति जाते 'इतश्च' इत्यनेन इकारलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुट्यनुबन्धलोपे भव+यास्+त् इति जाते 'लिङः सलोपोऽनन्त्यस्य'

इत्यनेन यासः सलोपे प्राप्ते तम्प्रबाध्य 'अतो येयः' इत्यनेन यास इयादेशे 'आद्गुणः' इत्यनेन गुणे भवेय्+त् इति जाते 'लोपो व्योर्वलि' इत्यनेन यलोपे 'भवेत्' इति सिद्धम् ।

भवेताम्—भूधातोर्लिङि, अनुबन्धलोपे लः स्थाने प्रथमपुरुषद्विवचने तस् प्रत्यये, सार्वधातुकत्वात् शप्यनुबन्धलोपे, शपः शित्त्वेन सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे, अवादेशे भव्+अ+तस् इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुट्यनुबन्धलोपे भव+यास्+तस् इति जाते 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन तसस्तामादेशे भव+यास्+ताम् इति जाते 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन यासः सलोपे प्राप्ते ताम्प्रबाध्य 'अतो येयः' इत्यनेन यास इयादेशे 'आद् गुणः' इत्यनेन गुणे भवेय्+ताम् इति जाते 'लोपो व्योर्वलि' इत्यनेन यलोपे 'भवेताम्' इति सिद्धम् ।

भवेयुः—भूधातोर्लिङि, अनुबन्धलोपे, लः स्थाने प्रथमपुरुषबहुवचने झि प्रत्यये, सार्वधातुकत्वात् शप्यनुबन्धलोपे, शपः शित्त्वेन सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे, अवादेशे भव्+अ+झि इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुट्यनुबन्धलोपे भव+यास्+झि इति जाते 'झेर्जुस्' इत्यनेन झेर्जुसादेशे, अनुबन्धलोपे भव+यास्+उस् इति जाते 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन यासः सलोपे प्राप्ते, तम्प्रबाध्य 'अतो येयः' इत्यनेन यास इयादेशे 'आद्गुणः' इत्यनेन गुणे भवेय्+उस् इति जाते, संयोगे, सकारस्य रुत्वे विसर्गे च 'भवेयुः' इति सिद्धम् ।

भवेः—भूधातोर्लिङि, अनुबन्धलोपे, लः स्थाने मध्यमपुरुषैकवचने सिप् प्रत्यये अनुबन्धलोपे भू+सि इति जाते, सार्वधातुकत्वात् शप्यनुबन्धलोपे, शपः शित्त्वेन सार्वधातुकसंज्ञायां, 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे, अवादेशे भव्+अ+सि इति जाते 'इतश्च' इत्यनेन इकारलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे भव+यास्+स् इति जाते 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन यासः सलोपे प्राप्ते, तम्प्रबाध्य 'अतो येयः' इत्यनेन यास इयादेशे 'आद्गुणः' इत्यनेन गुणे भवेय्+स् इति जाते 'लोपो व्योर्वलि' इत्यनेन यकारलोपे, सकारस्य रुत्वे विसर्गे च 'भवेः' इति सिद्धम् ।

भवेयम्—भूधातोर्लिङि, अनुबन्धलोपे, लः स्थाने उत्तमपुरुषैकवचने मिप् प्रत्यये भू+मिप् इति जाते, सार्वधातुकत्वात् शप्यनुबन्धलोपे, शपः शित्त्वेन

सार्वधातुकसंज्ञायां, 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे, अवादेशे, भव्+अ+मिप् इति जाते 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन मिपोऽमादेशे भव्+अ+अम् इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे, अनुबन्धलोपे, भव+यास्+अम् इति जाते 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन यासः सलोपे प्राप्ते, तम्प्रबाध्य 'अतो येयः' इत्यनेन यास इयादेशे 'आद्गुणः' इत्यनेन गुणे, संयोगे 'भवेयम्' इति सिद्धम्।

भवेम—भूधातोर्लिङि, अनुबन्धलोपे, लः स्थाने उत्तमपुरुषबहुवचने मस् प्रत्यये भू+मस् इति जाते, शप्यनुबन्धलोपे, शपः शित्त्वेन सार्वधातुकसंज्ञायां, 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे, अवादेशे भव्+अ+मस् इति जाते 'नित्यं ङितः' इत्यनेन मसः सकारलोपे, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे, अनुबन्धलोपे, भव+यास्+म इति जाते 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन यासः सलोपे प्राप्ते, तम्प्रबाध्य 'अतो येयः' इत्यनेन यास इयादेशे 'आद् गुणः' इत्यनेन गुणे, भवेय्+म इति जाते 'लोपो व्योर्वलि' इत्यनेन यकारलोपे 'भवेम' इति सिद्धम्।

भूयात्—भूधातोः 'आशिषि लिङ्लोटौ' इत्यनेन आशिष्यर्थे लिङि, अनुबन्धलोपे, लः स्थाने प्रथमपुरुषैकवचने, तिप्यनुबन्धलोपे भू+ति इति जाते 'लिङाशिषि' इत्यनेन आर्धधातुकसंज्ञायां 'इतश्च' इत्यनेन तिप इकारलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे, अनुबन्धलोपे 'सुट्तिथोः' इत्यनेन सुडागमे अनुबन्धलोपे 'किदाशिषि' इत्यनेन यासुटः कित्त्वे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे प्राप्ते, 'क्ङिति च' इत्यनेन गुणनिषेधे भूयास्+स्+त् इति जाते 'स्कोः संयोगाद्योरन्ते च' इत्यनेन सकारयोर्लोपे, संयोगे 'भूयात्' इति सिद्धम्।

भूयास्ताम्—भू सत्तायामित्यस्माद्धातोः 'आशिषि लिङ्लोटौ' इत्यनेन सूत्रेणाशिषि लिङि, अनुबन्धलोपे लस्य स्थाने प्रथमपुरुषद्विवचने तस् प्रत्यये भू+तस् इति स्थिते 'लिङाशिषि' इत्यनेन सूत्रेण तस आर्धधातुकसंज्ञायाम् 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तसः तामादेशे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन सूत्रेण यासुडागमेऽनुबन्धलोपे 'सुट्तिथोः' इत्यनेन सूत्रेण सुडागमेऽनुबन्धलोपे भू+यास्+स्+ताम् इति स्थिते 'किदाशिषि' इत्यनेन यासुटः कित्संज्ञायां कित्वाद् गुणनिषेधे 'स्कोः संयोगाद्योरन्ते च' इत्यनेन सूत्रेण यासुटः सकारस्य लोपे भूयास्ताम् इति सिद्धम्।

भूयासुः—भू सत्तायामित्यस्माद्धातोः 'आशिषि लिङ्लोटौ' इत्यनेन सूत्रेण आशिषि लिङि, अनुबन्धलोपे प्रथमपुरुषबहुवचने झि प्रत्यये 'लिङाशिषि' इत्यनेन सूत्रेणार्धधातुकसंज्ञायां 'झेर्जुस्' इत्यनेन सूत्रेण झेर्जुसादेशेऽनुबन्धलोपे 'किदाशिषि' इत्यनेन सूत्रेण यासुटः कित्संज्ञायां भू+यास्+उस्, इत्यवस्थायां कित्वाद्-गुणाऽभावे संयोगे भूयासुस् इति जाते सस्य रुत्वे विसर्गे च भूयासुः इति सिद्धम्।

भूयाः—भू सत्तायामित्यस्माद्धातोः 'आशिषि लिङ्लोटौ' इत्यनेन सूत्रेणाशिषि लिङि अनुबन्धलोपे मध्यमपुरुषैकवचने भू+सिप् इत्यवस्थायां 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमेऽनुबन्धलोपे भू+यास्+स इति जाते 'लिङाशिषि' इत्यनेनार्द्धधातुकसंज्ञायां 'किदाशिषि' इत्यनेन यासुटः कित्वाद् गुणनिषेधे 'स्कोः संयोगाद्योरन्ते च' इत्यनेन यासुटः सकारलोपे भूयास् इति जाते सकारस्य रुत्वे विसर्गे च 'भूयाः' इति सिद्धम्।

भूयासम्—भू सत्तायामित्यस्माद्धातोः 'आशिषि लिङ्लोटौ' इत्यनेन सूत्रेण आशिषिलिङि अनुबन्धलोपे उत्तमपुरुषैकवचने मिपि 'यासुट्परस्मैपदेषूदात्तो-ङिच्च' इत्यनेन यासुडागमे 'तस्थास्थिमिपां तान्तन्तामः' इत्यनेन अमादेशे भू+यास+अम् इत्यवस्थायां संयोगे भूयासम् इति सिद्धम्।

भूयास्व—भू सत्तायामित्यस्माद्धातोः 'आशिषि लिङ्लोटौ' इत्यनेन आशिषि लिङ्लकारेऽनुबन्धलोपे उत्तमपुरुषद्विवचने भू+वस् इति जाते 'यासुट् परस्मै पदेषूदात्तो ङिच्च' इत्यनेन यासुडागमेऽनुबन्धलोपे भू+यास्+वस् इति जाते 'लिङाशिषि' इत्यनेनार्द्धधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे प्राप्ते 'किदाशिषि' इत्यनेन यासुटः कित्वे 'ङिच्च' इत्यनेन गुणनिषेधे 'नित्यं ङितः' इत्यनेन वसः सकारस्य लोपे भूयास्व इति सिद्धम्।

अभूत्—भू सत्तायामित्यस्माद्धातोः 'लुङ्' इत्यनेन सूत्रेण लुङ् लकारेऽनुबन्ध-लोपे भू+ल् इति स्थिते 'तिप्तस्झि·····' इत्यादिना सूत्रेण प्रथमपुरुषैक-वचने तिपि भू+तिप् इति जाते 'लृङ्लङ्लुङ्क्ष्वडुदात्तः' इत्यनेन सूत्रेणाऽडागमे-ऽनुबन्धलोपे 'च्लिलुङि' इत्यनेन सूत्रेण च्लौ अनुबन्धलोपे अभू+च्लि+ति इति स्थिते 'च्लेः सिच्' इत्यनेन च्लेः सिजादेशेऽनुबन्धलोपे अभू+स+ति इति जाते 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचः सकारस्य लुकि तिपः सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे प्राप्ते "भूसुवोस्तिङि' इत्यनेन गुणनिषेधे अभू+ति इति जाते 'इतश्च' इत्यनेन तिपः इकारलोपे अभूत् इति सिद्धम्।

अभूवन्—भू सत्तामात्रमित्यस्माद्धातोः 'लुङ्' इत्यनेन लुङ्लकारेऽनुबन्धलोपे भू + ल् इति जाते 'तिप्तस्झि.....' इत्यादिना प्रथमपुरुषबहुवचने 'लुङ्लङ्लङ्क्ष्वडुदात्तः' इत्यनेनाडागमेऽनुबन्धलोपे अभू + झि इति जाते 'झोऽन्तः' इत्यनेनाऽन्तादेशे अभू + अन्त् इति जाते 'च्लि लुङि' इत्यनेन च्ली 'च्लेः सिच्' इत्यनेन सिजादेशे अनुबन्धलोपे अभू + स् + अन्त् 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचो लोपे अभू + अन्त् इति जाते झेः सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे प्राप्ते भूसुवोस्तिङि' इत्यनेन गुणनिषेधे 'भुवो वुग्लुङ्लिटोः' इत्यनेन वुगागमेऽनुबन्धलोपे अभूव् + अन्त् इति जाते 'संयोगान्तस्य लोपः' इत्यनेन संयोगान्त तकारस्य लोपे संयोगे अभूवन् इति सिद्धम् ।

मास्म भूत्—मास्म पूर्वात् भूधातोः 'स्मोत्तरे लङ् च' इत्यनेन लङ्लकारे प्रथमपुरुषैकवचने 'लुङ्लङ्लङ्क्ष्वडुदात्तः' इत्यनेन प्राप्तोऽडागमः 'न माङ्योगे' इत्यनेन निषेधात् 'मास्म भूत्' इति सिद्धम् ।

मा भवान् भूत्—मा पूर्वात् भू धातोः 'माङि लुङ्' इत्यनेन लुङि प्रथमपुरुषैकवचने 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेनाडागमे प्राप्ते 'न माङ्योगे' इत्यनेन निषेधे 'मा भवान् भूत्' इति सिद्धम् ।

मास्म भवान् भवत्—मास्म पूर्वात् भू धातोः 'स्मोत्तरे लङ् च' इत्यनेन लङ्लकारे प्रथमपुरुषैकवचने 'लुङ्लङ्लङ्क्ष्वडुदात्तः' इत्यनेनाडागमे प्राप्ते 'न माङ्योगे' इत्यनेन निषेधे 'मास्म भवान् भवत्' इति सिद्धम् ।

लिङ्निमित्ते लृङ् क्रियातिपत्तौ ३ । ३ । १३९

'हेतुहेतुमतोर्लिङ्' 'इच्छार्थेषु लिङ्लोटौ' इत्यादि लिङो निमित्तम् । तस्मिन् लिङ्निमित्ते क्रियाऽनिष्पत्तौ 'भविष्यति मर्यादावचनेऽवरस्मिन्' इत्यतो भविष्यतीत्यनुवर्तते । ततश्च यत्र हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यदर्थे लृङ् स्यात् क्रियायामतिपत्तौ गम्यमानायामित्यर्थः ।

'सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत्' इत्यादि भावगर्भाणि वाक्यानि ज्ञातव्यानि ।

अभविष्यत्—भू सत्तायाम् इत्यस्माद्धातोः 'लिङ्निमित्ते लृङ्क्रियाऽतिपत्तौ' इत्यनेन लृङ् लकारेऽनुबन्धलोपे लस्य स्थाने तिप्तस्झिसिप्थस्थमिप्वस्.....' इत्यनेन प्रथमपुरुषैकवचने तिपि, अनुबन्धलोपे भू + ति इति जाते 'लुङ्लङ्लङ्क्ष्वडुदात्तः' इत्यनेनाऽडागमेऽनुबन्धलोपे अभू + ति इति जाते स्यतासी लृलुटोः' इत्यनेन स्यप्रत्यये अभू + स्य + ति इति जाते 'आर्धधातुकं शेषः' इत्यने-

नार्धधातुकसंज्ञायां 'अर्द्धधातुकस्येड्वलादेः' इत्यनेन इडागमेऽनुबन्धलोपे अभू+इ+स्यत् इति जाते 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अवादेशे अभ्+अव+इ+स्य+ति इति जाते 'आदेशप्रत्यययोः' इत्यनेन सकारस्य मूर्धन्यादेशे 'इतश्च' इत्यनेन तिपः इकारलोपे संयोगे च अभविष्यत् इति सिद्धम् ।

प्रणिभवति—'प्रभवति' इत्यत्रोपसर्गाणामसमस्तत्वेऽपि संहितयाः नित्यत्वम् तदुक्तमभियुक्तैः—

संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥

अर्थात् एकपदे संहिता नित्या भवति । धातूपसर्गयोरपि नित्या, समासेऽपि नित्या, किन्तु वाक्ये तु सा विवक्षामपेक्षते ।

उदाहरणानि—एकपदे—ने+अयनम्=नयनम् ।
धातूपसर्गयोः—अधि+आस्ते=अध्यास्ते ।
समासे—शिवस्यार्चनम्=शिवार्चनम् ।
वाक्ये—देवी+उवाच=देवी उवाच, देव्युवाच ।

उपसर्गास्त्रिधा भवन्ति । तथा चोक्तमभियुक्तैः—

धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते ।
विशिनष्टि तमेवार्थमुपसर्गगतिस्त्रिधा ॥

कश्चिदुपसर्गः धत्वर्थं बाधते, यथा—प्रभवति । अत्रोपसर्गः भूधातोः सत्तार्थं प्रबाध्योत्पत्त्यर्थं द्योतयति ।

कश्चिदुपसर्गं धात्वर्थस्यानुगमनं करोति, यथा—सम्भवति । अत्र समुपसर्गः भूधातोः भवनमर्थमनुगच्छति । यथा—सम्यग्भवनं सम्भवः, सम्भूतिरिति ।

कश्चिदुपसर्गः तमेव धात्वर्थं विशिनष्टि यथा—अनुभवति । अत्र अनूपसर्गः भूधातोः भवनमर्थं विशिनष्टि । यथा—अनुपश्चाद् भवनमनुभवः, अनुभूतिरिति ।

एवमुपसर्गस्य त्रिधागतिर्भवतीति विज्ञेयम् ।

उपसर्गास्त्वर्थविशेषस्य द्योतकाः । तदुक्तमभियुक्तैः—

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥

उपसर्गेण बलात् धात्वर्थो स्वार्थं परित्यज्यान्यत्र नीयते यथा—प्रहारः, आहारः, संहारः, विहारः, परिहारः ।

वस्तुतः धातूनां सत्ताद्यर्थनिर्देशः केवलमुपलक्षणमात्रम् । उपसर्ग-साहाय्येन धातवः विविधानर्थान् प्रकाशयन्ति । तत एवोक्तं धातूनामनेकार्थत्वादिति । अत एवोपसर्गा अर्थद्योतकाः न तु वाचका इति स्पष्टं ज्ञायते ।

आत—अत् सातत्यगमने इत्यस्माद्धातोः लिटि लकारे प्रथमपुरुषैकवचने लस्य स्थाने तिपि अनुबन्धलोपे तिपः स्थाने परस्मैपदानां णलतुसुस्थलथुसणल्वमाः इत्यनेन णलादेशे अनुबन्धलोपे अत् + अ इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे अत् + अत् + अ इति जाते 'पूर्वोऽभ्यासः' इत्यनेनाभ्यासस्संज्ञायां 'हलादिः शेषः' इत्यनेन लोपे अ + अत् + अ इति जातेऽभ्यासस्य 'अतो गुणे' इत्यनेन पररूपे प्राप्ते 'अत आदेः' इत्यनेनाभ्यास्यादेरतो दीर्घे 'अकः सवर्णे दीर्घः' इत्यनेन सवर्णदीर्घे आत इति सिद्धम् ।

आतीत्—अत् सातत्यगमने इत्यस्माद्धातोः लुङि लकारेऽनुबन्धलोपे लस्य स्थाने तिपि, अनुबन्धलोपे अत् + ति इति जाते 'च्लि लुङि' इति च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे अत + स् + ति इति जाते 'आडजादीनाम्' इत्यनेनाडागमे अनुबन्धलोपे आ + अत् + स + ति इति जाते 'आटश्च' इत्यनेन वृद्धौ आर्धधातुकं शेषः इत्यनेन सिचः सस्यार्धधातुकसंज्ञायां 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे 'इतश्च' इत्यनेन तिपः इकारलोपे अपृक्त एकाल्प्रत्ययः इत्यनेन अपृक्तसंज्ञायां 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे आ + अत् + इ + स + ई + त् इति जाते 'इट ईटि' इत्यनेन सिचः सकारस्य लोपे सलोपस्य त्रैपादिकत्वात् 'पूर्वत्रासिद्धम्' इत्यनेनाऽसिद्धत्वात् दीर्घत्वाऽभावे प्राप्ते 'सिज्लोप एकादेशे सिद्धो वक्तव्यः' इति वार्तिकेन सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घे आतीत् इति सिद्धम् ।

आतिषु—अत् सातत्यगमने इत्यस्माद्धातोः लुङ्लकारे प्रथमपुरुषबहुवचने अत् + झि इत्यवस्थायां 'झेर्जुस्' इत्यनेन जुसादेशेऽनुबन्धलोपे 'च्लिलुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे 'अडजादीनाम्' इत्यनेनाडागमे आ + अत् + स + उस् इत्यवस्थायां सिचोऽपृक्तसंज्ञायां सिच् आर्धधातुकत्वात् इडागमे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमेऽनुबन्धलोपे आ + अत् इस + ई + उस् इति जाते 'इटः ईटि' इत्यनेन सिचो लोपे 'अतो गुणे' इत्यनेन पररूपे प्राप्ते 'आटश्च' इत्यनेन आटः वृद्धौ इट् ईटयोश्च सवर्णदीर्घे संयोगे 'आदेशप्रत्यययोः' इत्यनेन मूर्धन्यादेशे 'आतिषुः' इति सिद्धम् ।

आतिष्ट—अत् सातत्यगमने इत्यस्माद्धातोः अनुबन्धलोपे लुङि लकारे मध्यमपुरुषबहुवचने 'तिप्तस्झि·····' इत्यादिना लस्य स्थाने थ प्रत्यये अत्+थ इति जाते 'आडजादीनाम्' इत्यनेनाडागमेऽनुबन्धलोपे 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिजागमेऽनुबन्धलोपे आ+अत्+स+थ इति जाते पररूपं प्रवाध्य 'आटश्च' इत्यनेन वृद्धयेकादेशे 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन थस्य 'त' आदेशे आर्धधातुकस्येड्वलादेः इत्यनेन सिचः इटि अनुबन्धलोपे आत्+इ+स्+त् इति जाते 'आदेशप्रत्यययोः' इत्यनेन सिचः मूर्धन्यादेशे 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वे संयोगे आतिष्ट इति सिद्धम् ।

आतीः—अत् सातत्यगमने इत्यस्माद्धातोः अनुबन्धलोपे लुङिलकारे मध्यमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थ' इत्यादिना सिपि अनुबन्धलोपे 'आडजादीनाम्' इत्यनेन अडागमे पररूपं प्रवाध्य 'आटश्च' इत्यनेन वृध्येकादेशे आत्+स्+स् इति जाते 'आर्धधातुकस्येड्वलादेः' इत्यनेन इटि सिचोऽपृक्तसंज्ञायां 'अस्ति सिचोऽपृक्ते' इत्यनेन ईटि अनुबन्धलोपे आत्+इ+स्+इ+स इति जाते 'इट् ईटि' इत्यनेन सिचः सकारस्य लोपे 'अकः सवर्णे दीर्घः' इत्यनेन इकारयोस्सवर्णदीर्घे संयोगे आतीस् इति जाते सकारस्य रुत्वे विसर्गे च आतीः इति सिद्धम् ।

आतत्—अत् सातत्यगमने इत्यस्माद्धातोः अनुबन्धलोपे लङि लकारे प्रथमपुरुषैकवचने तिपि अत्+ति इति जाते 'आडजादीनाम्' इत्यनेनाडागमेऽनुबन्धलोपे 'तिङ्शित्सार्वधातुकम्' इत्यनेन तिपः सार्वधातुकत्वे 'कर्तरि शप्' इत्यनेन शपि अनुबन्ध लोपे आ+अत्+अ+ति इति जाते 'अतो गुणे' इत्यनेन पररूपे प्राप्ते 'आटश्च' इत्यनेन वृद्धयेकादेशे 'इतश्च' इत्यनेन तिपः इकारलोपे संयोगे आतत् इति सिद्धम् ।

सिषेध—षिध गत्याम् इत्यस्माद्धातोः लिटि लकारेऽनुबन्धलोपे लस्य स्थाने प्रथमपुरुषैकवचने तिपि 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन तिपः णलादेशे अनुबन्धलोपे 'लिट् च' इत्यनेनार्धधातुकसंज्ञायां 'धात्वादेः षः सः' इत्यनेन षकारस्य स्थाने सकारादेशे अनुबन्धलोपे सिध्+अ इत्यवस्थायां 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे 'पूर्वोऽभ्यासः' इत्यनेनाभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन हलादिशेषे सिसिध्+अ इति जाते 'पुगन्तलघूपधस्य च' इत्यनेनोपधा गुणे 'आदेशप्रत्यययोः' इत्यनेन षत्वे संयोगे सिषेध इति सिद्धम् ।

सिषेधिथ—षिध गत्याम् इत्यस्माद्धातोः लिटि मध्यमपुरुषैकवचने सिपि

'परस्मैपदानां णलतुमुस्थलथुमणल्वमाः' इत्यनेन सिपः थलादेशेऽनुबन्धलोपे सिध् + थ इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे 'पूर्वोऽभ्यासः' इत्यनेनाभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन हलादिशेषे सि सिध् + थ इति जाते 'लिट् च' इत्यनेनार्धधातुकसंज्ञायां 'पुगन्तलघूपधस्य च' इत्यनेनोपधागुणे 'आदेशप्रत्यययोः' इत्यनेन सकारस्य मूर्धन्यादेशे सिषेध् + थ इति जाते 'आर्धधातुकस्येड्वलादेः' इत्यनेनेडागमे सिषेध् + इ + थ इति जाते संयोगे सिषेधिथ इति सिद्धम् ।

सिषिधतुः—षिध गत्याम् इत्यस्माद्धातोः लिटि प्रथमपुरुषद्विवचने तस् प्रत्यये 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन तसः अतुसादेशेऽनुबन्धलोपे 'धात्वादेः षः सः' इत्यनेन षकारस्य सत्वे सिध + अतुस् इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे 'पूर्वोऽभ्यासः' इत्यनेनाभ्याससंज्ञायां 'हलादिः शेषः इत्यनेन हलादिशेषे सिसिध् + अतुस् इति जाते 'लिट् च' इत्यनेनार्धधातुक संज्ञायां 'पुगन्तलघूपधस्य च' इत्यनेन गुणे प्राप्ते 'असंयोगाल्लिट् कित्' इत्यनेन लिटः कित्वात् 'क्ङिति च' इत्यनेन गुणनिषेधे 'आदेशप्रत्यययोः' इत्यनेन सकारस्य मूर्धन्यादेशे संयोगे सिषिधतुस् इति जाते सकारस्य रुत्वे विसर्गे च सिषिधतुः इति सिद्धम् ।

प्रश्नः—के धातवः षोपदेशाः ? के च न षोपदेशाः ? इति विवेकाय नियमः प्रतिपादनीयः ।

उत्तरम्—सेक् सृपसृस्तृसृजस्तृस्त्यान्ये दन्त्याऽजन्तसादयः ।
एकाचः षोपदेशाः ष्वष्क्स्विद्स्वद्स्वञ्जस्वप्स्मिङः ॥१॥

दन्त्यश्च अच्च दन्त्याचौ तौ अन्तौ अव्यवहितपरौ यस्य स दन्त्याजन्तः, तथाविधः सः (सकारः) आदिर्येषां ते दन्त्याजन्तसादयः दन्त्यपरकः अचपरकश्च सकारः तदादयः एकाचो धातवः षोपदेशाः धातवो भवन्ति । अतिव्याप्तिदोषं परिहर्तुं सेकादिसमभिन्नत्वं लक्षणे निविषम् । अव्याप्तिदोषं परिहर्तुं ष्वस्कादीनां परिगणनं कृतम् ।

निषेधति—'नि' इत्युपसर्गपूर्वकात् षिध गत्याम् इत्यस्माद्धातोः परस्मैपदे लटि प्रथमपुरुषैकवचने तिपि 'धात्वादेः षः सः' इत्यनेन षकारस्य सत्वेऽनुबन्धलोपे निसिध् + ति इति जाते 'तिङशित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे संयोगे 'पुगन्तलघूपधस्य च' इत्यनेन इकारस्यैकारे गुणे निसेधति इति जाते 'उपसर्गात्सुनोतिसुणति·····' इत्यादिना सस्य मूर्धन्यत्वे निषेधति इति सिद्धम् ।

न्यषेधत्—'नि' इत्युपसर्गात् षिध गत्याम् इत्यस्माद्धातोः लङि प्रथमपुरुषैकवचने तिपि 'धात्वादेः षः सः' इत्यनेन षकारस्य सकारादेशे अनुबन्धलोपे नि+सिध्+ति इति जाते 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेनाडागमेऽनुबन्धलोपे नि+अ+सिध्+ति इति जाते 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे 'पुगन्तलघूपधस्य च' इत्यनेनोपधागुणे 'प्राक्सितादड्व्यवायेऽपि' इत्यनेन सस्य षत्वे 'इतश्च' इत्यनेन तिपः इकारस्य लोपे न्यषेधत् इति सिद्धम् ।

न्यषेधीत्—'नि' उपसर्गपूर्वात् षिध गत्याम् इत्यस्माद्धातोः लुङिप्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'धात्वादेः षः सः' इत्यनेन षकारस्य सत्वे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेनाडागमे अनुबन्धलोपे नि+अ+सिध्+ति इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे नि+अ+सिध्+स+ति इति जाते 'आर्धधातुकं शेषः' इत्यनेनार्धधातुकसंज्ञायां 'आर्धधातुकस्येड्बलादेः' इत्यनेन इडागमेऽनुबन्धलोपे 'अपृक्त एकाल्प्रत्ययः' इत्यनेन सिचोऽपृक्तसंज्ञायां 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे,अनुबन्धलोपे नि+अ+सिध्+इ+स्+ई+ति इति जाते 'इको यणचि' इत्यनेन यणादेशे 'पुगन्तलघूपधस्य च' इत्यनेन उपधा गुणे 'इतश्च' इत्यनेन तिपः इकारलोपे संयोगे न्यसेधीत् इति जाते अडागमव्यवधानात् 'उपसर्गात् सुनोतिसुवति·····' इत्यादिना षत्वाप्राप्तौ 'प्राक्सितादड्व्यवायेऽपि' इत्यनेन षत्वे न्यषेधीत् इति सिद्धम् ।

निषिषेध—'नि' उपसर्गपूर्वात् षिध गत्याम् इत्यस्माद्धातो लिटि प्रथमपुरुषैकवचने अनुबन्धलोपे लस्य स्थाने तिबागमे नि+सिध+ति इति जाते 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन णलि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे नि+सिध्+सिध्+अ इति जाते 'पूर्वोभ्यासः' इत्यनेनाऽभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन हलादिशेषे नि+सि+सिध्+अ इति जाते 'उपसर्गात् सुनोतिसुवति·····' इत्यादिनाऽभ्याससकारस्य मूर्धन्यादेशे 'स्थादिष्वभ्यासेन चाभ्यासस्य' इत्यनेनाऽभ्यासव्यवहितस्य सकारस्यापि मूर्धन्यादेशे 'लिट् च' इत्यनेनार्धधातुकसंज्ञायां 'पुगन्तलघूपधस्य च' इत्यनेनोपधागुणे निषिषेध इति सिद्धम् ।

निषिषिधतुः—'नि' उपसर्गपूर्वात् षिध गत्याम् इत्यस्माद्धातोः अनुबन्धलोपे लिटि प्रथमपुरुषद्विवचने नि+षिध्+तस् इति जाते 'धात्वादेः षः सः' इत्यनेन षकारस्य सकारादेशे 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन तसः

अतुस् आदेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे 'पूर्वोऽभ्यासः' इत्यनेनाऽभ्याससंज्ञायां नि+सि+सिध+अतुस् इति जाते 'उपसर्गात्सुनोतिसुवति···' इत्यादिनाऽभ्याससकारस्य मूर्धन्यत्वेऽनभ्याससकारस्य च 'स्थादिष्वभ्यासेन चाभ्यासस्य' इत्यनेन मूर्धन्यादेशे 'लिट् च' इत्यार्द्धधातुकसंज्ञायां 'पुगन्तलघूपधस्य च' इत्यनेनोपधागुणे प्राप्ते 'असंयोगाल्लिट्कित्' इत्यनेन लिडादेशस्यातुसः कित्वे 'क्ङिति च' इत्यनेन गुणनिषेधे निषिषिधतुस् इति जाते सकारस्य रुत्वे विसर्गे च निषिषिधतुः इति सिद्धम् ।

विसेधति—'वि' उपसर्गपूर्वकात् षिध गत्याम् इत्यस्माद्धातोः परस्मैपदे लट्प्रथमपुरुषैकवचने रूपम् । अत्र 'उपसर्गात् सुनोतिसुवति·····' इत्यादिना । सकारस्य षत्वे प्राप्ते 'सेधतेर्गतौ' इत्यनेन सूत्रेण तन्निषेधात् विसेधतीति सिद्धम् ।

प्रणिगदति—'प्र' 'नि' उपसर्गपूर्वकात् गद्व्यक्तायां वाचि इत्यस्माद्धातोः प्रनिगदति इत्यत्र 'नेर्गदनदपतपद·····' इत्यादिना नेरुपसर्गस्थनकारस्य णत्वे प्राणिगदति इति सिद्धम् ।

जगाद—गद व्यक्तायां वाचि इत्यस्माद्धातोः परस्मैपदे लिटि प्रथमपुरुषैकवचने तिपि 'परस्मैपदानां णलतुसुस्थल·····' इत्यादिना णलादेशेऽनुबन्धलोपे गद्+अ इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे पूर्वोऽभ्यासः इत्यनेनाभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन हलादिशेषे ग+गद्+अ इति 'कुहोश्चुः' इत्यनेन गकारस्य स्थाने जकारादेशे 'अत उपधायाः' इत्यनेन उपधावृद्धौ जगाद इति सिद्धम् ।

जगद—गद व्यक्तायां वाचि इत्यस्माद्धातोः उत्तमपुरुषैकवचने णलि द्वित्वे हलादिशेषे गकारस्य जकारादेशे जगद इति जाते 'अत उपधायाः' इत्यनेन नित्ये उपधादीर्घे प्राप्ते 'णलुत्तमो वा' इत्यनेन वैकल्पिकवृद्धौ वृद्ध्यभावे जगद् इति रूपम्, वृद्धौ च जगाद इति रूपं सिध्यति ।

अगदीत्—गद व्यक्तायां वाचि इत्यस्माद्धातोः परस्मैपदे 'लुङ्' इत्यनेन लुङ्लकारेऽनुबन्धलोपे लस्य स्थाने तिपि गद्+ति इति जाते 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेनाडागमे अनुबन्धलोपे अ+गद्+ति इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन च्लेः सिजादेशेऽनुबन्धलोपे अ+गद+स+ति इति जाते 'आर्धधातुकं शेषः' इत्यनेनार्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इत्यनेनेडागमे 'अपृक्त एकाल्प्रत्ययः' इत्यनेन अपृक्तत्वे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे अनुबन्धलोपे अ+गद्+इ+स+ई+ति इति जाते 'इट ईटि'

इत्यनेन सिचो लोपे इकारयोः सवर्णदीर्घे इतश्च' इत्यनेन तिप इकारस्य लोपे सर्वसंयोगे अगदीत् इति जाते 'अतो हलादेर्लघोः' इत्यनेन वैकल्पिकोपधावृद्धौ वृध्यभावपक्षे अगदीत्, वृद्धिपक्षे च अगादीत् इति सिद्धम् ।

प्रश्नः—णोपदेशाः के धातवः सन्ति ? कथञ्च तेषां निर्णयो भवितुमर्हति ? विविच्य लेखनीयम् ।

उत्तरम्—णोपदेशास्त्वनर्द-नाटि-नाथ-नाध-नन्द-नक्क-नृ-नृतः । इति धातु-विभागेन मध्यसिद्धान्तकौमुद्यां निर्णयो विहितः । नर्द-नाटि-नाथ-नाध-नन्द-नक्क-नृ-नृत इत्येतान् नकारादीन् धातून् वर्जयित्वाऽन्ये नकारादयो धातवः णोपदेशाः भवन्तीत्यर्थः । इमे धातवोऽत्र सार्थाः प्रदर्श्यन्ते सुखबोधाय । तथाहि-नर्दशब्दे, नट् अवस्कन्दने, नाथृ नाधृ याच्ञोपतापैश्वर्याशीष्षु, टुनदि समृद्धौ, नक्क नाशने, नॄ नये, नृती गात्रविक्षेपे । इत्यष्टौ धातवो णोपदेशाः न सन्ति शेषास्तु सर्वे नकारादयः णोपदेशाः सन्तीति बोध्यम् ।

प्रणदति—'प्र' उपसर्ग पूर्वात् णद् अव्यक्ते शब्दे इत्यस्माद्धातोः 'णो नः' इत्यनेन णकारस्य नकारादेशे प्रथमपुरुषैकवचने तिपि रूपम् । तत्र प्रनदति इति जाते 'उपसर्गादसमासेऽपि णोपदेशस्य' इत्यनेन नकारस्य णकारादेशे प्रणदति इति सिद्धम् ।

प्र णिनदति—'प्र' 'नि' उपसर्गपूर्वात् णद् अव्यक्ते शब्दे इत्यस्माद्धातोः लट् लकारे प्रथमपुरुषैकवचने तिपि प्रनिनदति इत्यवस्थायां 'नेर्गदनदपतपदघूमा···' इत्यादिना नेरुपसर्गस्य णकारादेशे प्रणिनदति इति सिद्धम् ।

ने दतुः—णद् अव्यक्ते शब्दे इत्यस्माद्धातोः परोक्षे लिट् इत्यनेन लिटि प्रथमपुरुषद्विवचने अनुबन्धलोपे लस्य 'तिपतस्झि·····' इत्यादिना तस् प्रत्यये 'परस्मैपदानां णलतुसुस्·····' इत्यादिना तसः अतुसादेशेऽनुबन्धलोपे 'णो नः' इत्यनेन णकारस्य नकारादेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे नद + नद + अतुस् इति जाते 'पूर्वोऽभ्यासः' इत्यनेनाऽभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन हलादिशेषे न + नद + अतुस् इति जाते 'अत एकहल्मध्येऽनादेशादेर्लिटि' इत्यने-नाऽभ्यासलोपे नदधातोरुपधाया अकारस्य एत्वे च नेदतुस् इति जाते सकारस्य रुत्वे विसर्गे च नेदतुः इति सिद्धम् ।

आनर्च—अर्च पूजायामित्यस्माद्धातोः 'परोक्षे लिट्' इत्यनेन लिटि लकारे-ऽनुबन्धलोपे लस्य स्थाने तिपि अर्च् + तिप् इति जाते 'परस्मैपदानां णलतुसुस्-थलथुसणल्वमाः' इत्यनेन तिपो णलादेशेऽनुबन्धलोपे अर्च + अ इति जाते 'लिटि

धातोरनभ्यासस्य' इत्यनेन अर्च् धातोर्द्वित्वे अर्च + अर्च + अ इति जाते 'पूर्वोऽभ्यासः' इत्यनेनाऽभ्याससंज्ञायाम् 'हलादिः शेषः' इत्यनेन हलादिशेषे अ + अर्च् इति जाते 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घे प्राप्ते तं प्रबाध्य 'अतो गुणे' इत्यनेन पररूपे प्राप्ते तं प्रबाध्य 'अत आदेः' इत्यनेनाभ्यासस्याऽकारस्य दीर्घे आ + अर्च् + अ इति जाते 'तस्मान्नुड् द्विहलः' इत्यनेनाऽभ्यासस्य नुडागमेऽनुबन्धलोपे आ + न् + अर्च् + अ इति जाते सर्वेषां हलामचाञ्च संयोगे आनर्च इति सिद्धम् ।

नेदिथ - णद् अव्यक्ते शब्दे इत्यस्माद्धातोः लिटि मध्यमपुरुषैकवचने थलि 'णो नः' इत्यनेन नकारादेशे नद् + थ इति स्थिते 'लिटि धातोरनभ्यासस्य' इत्यनेन नद् धातोर्द्वित्वे, पूर्वोऽभ्यासः इत्यनेन द्वित्वे नद् + नद् + थ इति जाते 'हलादिः शेषः' इत्यनेन हलादिशेषे न + नद + थ इति जाते 'आर्धधातुकस्येड्वलादेः इत्यनेनेडागमेऽनुबन्धलोपे 'थलि च सेटि' इत्यनेन अभ्यासलोपे उपधायाश्च एत्वे नेदिथ इति सिद्धम् ।

चुश्च्योत्—श्च्युतिर् क्षरणे इत्यस्माद्धातोः 'इर इत्संज्ञा वाच्या' इत्यनेन इरः इत्संज्ञायां लोपे च लिट्लकारे प्रथमपुरुषैकवचने तिपि तस्य 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन णलादेशेऽनुबन्धलोपे श्च्युत् + अ इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे श्च्युत् + श्च्युत् + अ इति जाते 'शर्पूर्वाः खयः' इत्यनेन शर्पूर्वस्य खयः यकारस्य शेषे (श् य् इत्यनयोर्लोपे) चकारस्य उकारेण संयोगे चुश्च्युत् + अ इति जाते 'पुगन्तलघूपधस्य च' इत्यनेनोपधागुणे चुश्च्योत इति सिद्धम् ।

अश्च्युतत्—श्च्युतिर क्षरणे इत्यस्माद्धातो, 'इर इत्संज्ञावाच्या' इत्यनेनेत्संज्ञायां तस्य लोपः इत्यनेन लोपे लुङ्लकारेऽनुबन्धलोपे लस्य स्थाने तिपि श्च्युत् + तिप् इत्यवस्थायां 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि प्राप्ते 'इरितो वा' इत्यनेन वैकल्पिके अङादेशे अनुबन्धलोपे अश्च्युत् + अ + तिप् इति जाते 'इतश्च' इत्यनेन तिप इकारलोपे संयोगे अश्च्युतत् इति सिद्धम् । अत्राङो ङित्वादुपधागुणेन अङाभावे अश्च्युत + च्लि इत्यत्र 'च्लेः सिच्' इत्यनेन सिजादेशेऽनुबन्धलोपे अश्च्युत् + स् + ति इति जाते आर्धधातुकस्येड्वलादेः' इत्यनेन इटि 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि अनुबन्धलोपे अश्च्युत् + इ + स + ई + ति इति जाते 'पुगन्तलघूपधस्य च' इत्यनेनोपधागुणे 'इटः ईटि' इत्यनेन सिपः इकारस्य लोपे संयोगे अश्च्योतीत् इति सिद्धम् ।

चुश्च्योत—श्च्युतिर् आसेचने इत्यस्माद्धातोः लिट्लकारे अनुबन्धलो 'इर इत्संज्ञा वाच्या' इत्यनेनेरो लोपे श्च्युत्+ल इति जाते लस्य स्थाने तिबादे 'परस्मैपदानां णल·····' इत्यादिना णलादेशे अनुबन्धलोपे 'लिटि धातोरन भ्यासस्य' इत्यनेन द्वित्वे श्च्युत्+श्च्युत्+अ इति जाते 'पूर्वोऽभ्यासः' इत्यनेन ऽभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन हलादिशेषे प्राप्ते तं प्रबाध्य 'शर्पूर्वाः खय इत्यनेन शर्पूर्वस्य खयः चकार उकारेण सह शेषे जाते अन्येषाञ्च हलां लोपे चु श्च्युत्+अ इति जाते 'पुगन्तलघूपधस्य च' इत्यनेनाऽनभ्यासस्य उकारस्य गु संयोगे च चुश्च्योत इति सिद्धम् ।

नन्द्यात्—टुनदि समृद्धौ इत्यस्माद्धातोः आशिषि लिङि प्रथमपुरुषैकवच सिपि 'आदिर्ञिटुडवः' इत्यनेनानुबन्धस्य 'टु' इत्यस्य संज्ञायां लोपे च 'उपदेशे ऽजनुनासिक' इत इत्यनेनेकारस्येत्संज्ञायां लोपे च नद्+ति इति जाते 'इदितो नुम्धातोः' इत्यनेन नुमागमे 'मिदचोन्त्यात्परः' इत्यनेन मित्त्वादन्त्याच प कृते अनुबन्धलोपे नन्द्+ति इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यने यासुडागमेऽनुबन्धलोपे नन्द्+यास्+ति इति जाते 'स्कोः संयोगाद्योरन्ते च इत्यनेन सकारस्य लोपे 'इतश्च' इत्यनेन तिप् इकारस्य लोपे संयोगे च नन्द्या इति सिद्धम् । अत्र इदित्वान्नकारलोपो न ।

आनर्च—अर्च पूजायाम् इत्यनेन लिटि प्रथमपुरुषैकवचने तिपि ति 'परस्मैपदानां णलतुसु·····' इत्यादिना णलादेशेऽनुबन्धलोपे अर्च+आ इ जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे अर्च्+अर्च्+अ इति जा 'पूर्वोऽभ्यासः' इत्यनेनाभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन 'र्च' इत्यस्य लो अ+अर्च+अ इति जाते 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घादेशे प्राप्ते तं प्रबा 'अतो गुणे' इत्यने पूर्वरूपे प्राप्ते तं प्रबाध्य 'अत आदेः' इत्यनेन अभ्यासाकार दीर्घे 'तस्मान्नुड् द्विहलः' इत्यनेन नुडागमेऽनुबन्धलोपे आ+न्+अर्च+अ इ जाते संयोगे आनर्च इति सिद्धम् ।

ववनतुः—वन् संभक्तौ इत्यस्माद्धातोः लिटि प्रथमपुरुषद्विवचने वन अतुस् इत्यत्र धातोरनुबन्धलोपे वन+अतुस् इत्यत्र 'लिटि धातोरनभ्यास इत्यनेन वन् धातोर्द्वित्वे वन्+वन्+अतुस् इति जाते 'पूर्वोऽभ्यासः इत्यने भ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन हलादि शेषे व+वन्+अतुस् इति 'अत एकहल्मध्ये·····' इत्यादिना प्राप्ते एत्वाभ्यासलोपे परत्वादपवादत्वा

'नशसद्दवादिगुणानाम्' इत्यनेन तद्बाधिते संयोगे च ववनतुस् इति जाते सकारस्य रुत्वे विसर्गे च ववनतुः इति सिद्धम् ।

सायात्—षण सम्भक्तौ इत्यस्माद्धातोः आशिषि लिङि प्रथमपुरुषैकवचने तिपि उभयोरनुबन्धलोपे 'धात्वादेः षः सः' इत्यनेन धातोर्मूर्धन्यषकारस्य सकारादेशे सन्+ति इति जाते यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे सन्+यास्+ति इति जाते 'किदाशिषि' इत्यनेन यासुटः कित्त्वात् 'ये विभाषा' इत्यनेन वैकल्पिके आत्वे कृते स+आ+यास्+ति इति जाते 'स्कोः संयोगाद्योरन्ते च' इत्यनेन सकारलोपे 'इतश्च' इत्यनेन इकारलोपे स+आ+या+त् इति जाते सवर्णदीर्घे संयोगे च सायात् इति सिद्धम् । आत्वाऽभावे सन्यात् इति सिद्धम् ।

अव्राजीत्—व्रजगतौ इत्यस्माद्धातोः अनुबन्धलोपे 'लुङ्' इत्यनेन लुङ् लकारेऽनुबन्धलोपे लस्य स्थाने तिबादेशेऽनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेनाडागमे अनुबन्धलोपे 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे अ+व्रज्+स+ति इति जाते 'आर्धधातुकं शेषः' इत्यनेनार्धधातुकसंज्ञायां 'आर्धधातुकस्येड्बलादेः इत्यनेनेडागमे सकारस्य 'अपृक्त एकाल्प्रत्ययः' इत्यनेनापृक्तसंज्ञायां 'अस्ति सिचोऽपृक्ते' इत्यनेन ईडागमे अ+व्रज+इ+स्+ई+ति इति जाते 'इट ईटि' इत्यनेन व्रजाकारस्य वृद्धौ अ+व्राज्+इ+ई+ति इति जाते संयोगे 'इतश्च' इत्यनेन तिपः इकारस्य लोपे संयोगे च अव्राजीत् इति सिद्धम् ।

अकटीत्—कटे वर्षावरणयोः इत्यस्माद्धातोः लुङ् लकारे प्रथमपुरुषैकवचने तिपि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'इतश्च' इत्यनेन तिप इकारलोपे अ+कट्+त् इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे अ+कट्+स्+ति इति जाते 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्बलादेः' इत्यनेन इडागमे अनुबन्धलोपे 'अपृक्त एकाल्प्रत्ययः' इत्यनेन तिपः तकारस्य अपृक्तसंज्ञायां 'अस्ति सिचोऽपृक्ते' इत्यनेन सिच ईडागमे 'इट ईटि' इत्यनेन सिचो लोपे अ+कट्+इ+ई+त् इति जाते 'अतो हलादेर्लघोः' इत्यनेनोपधावृद्धौ प्राप्तायां 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्' इत्यनेन निषेधे 'इट ईटि' इत्यस्य त्रैरादिकत्वात् 'पूर्वत्रासिद्धम्' इत्यनेन सलोपस्यासिद्धत्वेन 'अकः सवर्णे दीर्घः' इत्यनेन सवर्णदीर्घत्वाप्राप्तौ 'सिज्लोप एकादेशे सिद्धो वक्तव्यः' इत्यनेन सिज्लोपस्यासिद्धत्वाभावेन सवर्णदीर्घे संयोगे अकटीत् इति सिद्धम् ।

प्रश्नः—सनादयः के प्रत्ययाः भवन्ति ?

उत्तरम्—सन्–क्यच्–काम्यच्–क्यङ्–क्यषोऽथाचारकिब् णिच्क्यङौ तथा।
यक्–आय–ईयङ्–णिङ् चेति द्वादशामी सनादयः॥

१—सन्, २—क्यच्, ३—काम्यच्, ४—क्यङ्, ५—क्यष्, ६—आचारार्थे क्विप्, ७—णिच्, ८—क्यङ्, ९—यक्, १०—आय्, ११—ईयङ्, १२—णिङ्। इत्येते द्वादश प्रत्ययाः सनादय उच्यन्ते।

गोपायति—गुपूरक्षणे इत्यस्माद्धातोः 'गुपूधूपविच्छिपणिपनिभ्य आयः' इत्यनेन स्वार्थे आय प्रत्यये 'आर्द्धधातुकं शेषः' इत्यनेनार्धधातुकसंज्ञायां 'पुगन्तलघूपधस्य च' इत्यनेन उपधागुणे 'सनाद्यन्ता धातवः' इत्यनेन गोपाय इत्यस्य धातुसंज्ञायां लट्लकारे प्रथमपुरुषैकवचने तिपि गोपाय+तिप् इति जाते अनुबन्धलोपे 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप् प्रत्यये अनुबन्धलोपे गोपाय+अ+ति इति जाते सवर्णदीर्घे प्राप्ते 'अतो गुणे' इत्यनेन पररूपे संयोगे गोपायति इति सिद्धम्।

गोपायाञ्चकार—गुपूरक्षणे इत्यस्माद्धातोः 'परोक्षे लिट्' इत्यनेन लिट् प्राप्ते 'गुपूधूपविच्छिपणिपनिभ्य आयः' इत्यनेन नित्ये आयप्रत्यये प्राप्ते 'आयादय आर्धधातुके वा' इत्यनेन विकल्पेन आयप्रत्यये 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायां 'पुगन्तलघूपधस्य च' इत्यनेन उपधागुणे गोपाय इत्यस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायाम् 'परोक्षे लिट्' इत्यनेन लिट् लकारे प्रथमपुरुषैकवचने तिपि 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन तिपो णलादेशे अनुबन्धलोपे गोपाय+अ इति जाते 'कास्यनेकाचआम्वक्तव्यो लिटि' इत्यनेन आम् प्रत्यये गोपाय+आम्+अ इति जाते 'अतो लोपः' इत्यनेनायप्रत्ययस्थाऽकारस्य लोपे 'आमः' इत्यनेन लिटो लुकि लिटः कृत्वात् प्रत्ययलक्षणेन 'गोपायाम्' इत्यस्य कृदन्तत्वात् प्रातिपदिकत्वेन सुबुत्पत्तौ 'कृन्मेजन्तः' इत्यनेन अव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इति तस्यापि लुकि 'गोपायाम्' इत्यवशिष्टे 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिटि कृञि अनुप्रयुज्यमाने गोपायाम्+कृ+लिट् इति जाते लस्य स्थाने प्रथमपुरुषैकवचने तिपि तिपो णलादेशेऽनुबन्धलोपे गोपायाम्+कृ+अ इति जाते द्वित्वे अभ्यासत्वे च गोपायाम्+कृ+कृ+अ इति जाते 'उरत्' इत्यनेन ऋकारस्य अकारे रपरत्वे च गोपायाम्+कर्+कृ+अ इति जाते 'कुहोश्चुः' इत्यनेन चकारादेशे: 'हलादिः शेषः' इत्यनेन रकारस्य लोपे 'अचो ञ्णिति' इत्यनेन वृद्धौ

मस्यानुस्वारत्वे 'अनुस्वारस्य ययि परसवर्णः' इत्यनेन परसवर्णे गोपायाञ्चक्र + अ इति जाते 'अचो ञ्णिति' इत्यनेन वृद्धौ संयोगे च गोपायाञ्चकार इति सिद्धम् । एवमेव असधात्वनुप्रयोगे गोपायामास, भूधात्वनुप्रयोगे गोपायाम्बभूव, कृञ्चादीनामप्रयोगे जुगोप इति सिध्यति । एवं गुप धातोः लिट् लकारे चत्वारि रूपाणि भवन्ति ।

जुगोपिथ—गुपूरक्षणे इत्यस्माद्धातोः आयप्रत्ययाभावे लिटि मध्यमपुरुषैकवचने थलि अनुबन्धलोपे गुप् + थ इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे गुप् + गुप् + थ इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्यासंज्ञायां 'हलादिः शेषः' इत्यनेन अभ्यासपकारस्य लोपे 'कुहोश्चुः' इत्यनेन आन्तर्तम्यात् गकारस्य जकारादेशे जुगुप् + थ इति जाते 'लिट् च' इत्यार्धधातुकसंज्ञायां 'पुगन्तलघूपधस्य च' इत्यनेन गुणे जुगोप् + थ इति जाते 'आर्धधातुकस्येड्वलादेः' इत्यनेन नित्ये इटि प्राप्ते 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन वैकल्पिके इटि अनुबन्धलोपे जुगोपिथ इति सिद्धम् । इडभावपक्षे जुगोप्थ इति सिद्धम् ।

अगोपीत्—गुपू रक्षणे इत्यस्माद्धातोः अनुबन्धलोपे लुङ्लकारे प्रथमपुरुषैकवचने तिपि लुङ आर्धधातुकत्वात् 'आयादय आर्धधातुके वा' इत्यनेन आयप्रत्ययाभावे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ + गुप् + ति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे अ + गुप + स + ति इति जाते 'आर्धधातुकस्येड्वलादेः' इत्यनेन नित्ये इटि प्राप्ते 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन वैकल्पिके इटि 'अस्ति सिचोऽपृक्ते' इत्यनेन ईटि च-अ + गुप् + इ + स + ई + ति इति जाते 'इट ईटि' इत्यनेन सिचो लोपे 'वदव्रजहलन्तस्याचः' इत्यनेन वृद्धौ प्राप्तायां 'नेटि' इत्यनेन निषेधे 'पुगन्तलघूपधस्य च' इत्यनेन गुणे 'इतश्च' इत्यनेन तिप इकारलोपे संयोगे अगोपीत् इति सिद्धम् । इडभावपक्षे सिचो लोपाभावे 'वदव्रजहलन्तस्याचः' इत्यनेन वृद्धौ अगौप्सीत् इति सिध्यति । आयपक्षे अगोपायीत् इति सिध्यति ।

अगौप्ताम्—गुपू रक्षणे इत्यस्माद्धातोः अनुबन्धलोपे लुङ् लकारे प्रथमपुरुषद्विवचने आम्प्रत्ययाभावे तस् प्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन तसः तामादेशे 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिजादेशे अनुबन्धलोपे अ + गुप्

+स्+ताम् इति जाते 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन इडभावपक्षे 'वदव्रजहलन्तस्याचः' इत्यनेन वृद्धौ 'झलो झलि' इत्यनेन सिचो लोपे अगौषाम् इति सिद्धम्। इट्पक्षे तु अगोषिष्टाम्, आयप्रत्ययपक्षे अगोपायिष्टाम् इति त्रीणि रूपाणि भवन्ति।

अगोपायिष्यत्—गुपूरक्षणे इत्यस्माद्धातोः 'गुपूधूपविच्छिपणिपनिभ्य आयः' इत्यनेन आय प्रत्यये तस्यार्धधातुकसंज्ञायां 'पुगन्तलघूपधस्य इत्यनेन उपधागुणे 'गोपाय' इति जाते 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां धातुत्वात् लङ्-लकारेऽनुबन्धलोपे लस्य स्थाने प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'लुङ्लङ्-लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'स्यसासीलृलुटोः' इत्यनेन स्य प्रत्यये 'आर्धधातुकं शेषः' इत्यनेन स्यप्रत्ययस्याऽर्धधातुकसंज्ञायां 'आर्धधातुकस्येड्-बलादेः' इत्यनेन इडागमे अनुबन्धलोपे 'अतो लोपः' इत्यनेनायप्रत्ययगताकार-लोपे 'इतश्च' इत्यनेन तिप इकारलोपे 'आदेशप्रत्यययोः' इत्यनेन सस्य षत्वे अगोपायिष्यत् इति सिद्धम्। आयप्रत्ययाऽभावे इडभावे च अगोऽयत् इति जायते।

प्रश्नः—इड्विधायकानि सूत्राणि विलिख्य सेटामनिटाञ्च धातूनां सम्यक् निर्णयः कार्यः।

उत्तरम्— **आर्धधातुकस्येड्वलादेः ॥७।२।३५॥**

आर्धधातुकस्य बलादेरिडागमो भवति।

स्वरतिसूतिसूयतिधूञूदितो वा ॥७।२।४४॥

स्वरति, सूति, सूयति, धूञ् इत्येतेभ्यः ऊदिद्भ्यश्चोत्तरस्य बलादेरार्ध-धातुकस्य वा इडागमो भवति।

अचस्तास्वत्थल्यनिटो नित्यम् ॥७।२।६१॥

तासौ ये नित्याऽनिटो धातवोऽजन्तास्तेभ्यस्तासाविव थलीडागमो न भवति।

उपदेशेऽत्वतः ॥७।२।६२॥

उपदेशे यो धातुरकारवान् तासौ नित्यानिट् तस्मात्तासाविव थलीडागमो न भवति।

ऋतो भारद्वाजस्य ॥७।२।६३॥

ऋकारान्ताद्धातोर्भारद्वाजस्याचार्यस्य मतेन तासाविव नित्यानिटस्थलि इडागमो न भवति।

एकाच उपदेशेऽनुदात्तात् ॥७।२।१०॥

उपदेशे य एकाच् धातुरनुदात्तश्च तस्मादिडागमो न भवति ।

के पुरनुदात्ताः ? ये अनुदात्तस्वरयुक्ता धातवः पठ्यन्ते । तेषां परिगणनमग्रे करिष्यते ।

कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥७।२।१३॥

कृ, सृ, भृ, वृ, स्तु, द्रु, स्रु, श्रु इत्येतेषामेव लिटिप्रत्यये इडागमो न भवति । अन्यस्यानिटोऽपि भवति । तदत्रानुदात्तधातूनां संग्रहः क्रियते—

ऊदृदन्तैर्यौतिरुक्ष्णुशीस्नुनुक्षुश्विडीङ्-श्रिभिः ।
वृङ्-वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥

ऊकारान्ताः, ऋकारान्ताः, युरु, क्ष्णु, शीङ्, स्नु, नु, क्षु, श्वि, डीङ्, श्रि, वृङ्, वृञ् एतान्धातून् वर्जयित्वा सर्वे एकाचः अजन्ताः धातवः अनुदाताः भवन्ति ।

हलन्तेषु धातुषु त्र्युत्तरशतं धातवः अनुदात्ताः सन्ति । तदुक्तमभियुक्तैः—

अनुदात्ताः हलन्तेषु धातवस्त्र्यधिकं शतम् ।

क्रमशोऽत्र ते गण्यन्ते

कान्तेषु—शक् इत्येकः । चान्तेषु—पच्, मुच्, रिच्, वच्, विच्, सिच् इति षट् । छान्तेषु—प्रच्छ् इत्येकः । जान्तेषु—त्यज्, निज्, भज्, भञ्ज् भुज्, भ्रस्ज्, मस्ज्, यज्, युज्, रुज्, रञ्ज्, विज् सञ्ज्, स्वञ्ज्, सृज् पञ्चदश । दान्तेषु—अद्, क्षुद् खिद्, छिद्, तुद्, नुद्, पद्, भिद्, विद्, विनद्, विन्द्, शद्, सद्, स्विद्, स्कन्द्, हद् षोडश । धान्तेषु—क्रुध्, क्षुध्, बुध्, बन्ध्, युध्, रुध्, राध्, व्यध्, शुध्, साध्, सिध् एकादश । नान्तेषु—मन्, हन् द्वौ । पान्तेषु—अप्, क्षिप्, छुप्, तप्, तिप्, तृप्, दृप्, लिप्, लुप्, वप्, शप्, स्वप्, सृप् इति त्रयोदश । भान्तेषु—यभ्, रभ्, लभ्, इति त्रयः । मान्तेषु—गम्, रम्, नम्, यम् इति चत्वारः । शान्तेषु—कुश्, दंश्, दिश्, दृश्, मृश्, रिश्, रुश्, लिश्, विश्, स्पृश् इति दश । षान्तेषु—कृष्, त्विष्, तुष्, द्विष्, दुष्, पुष्, पिष्, विष्, शिष्, शुष्, श्लिष् एकादश । सान्तेषु—घस्, वस् इति द्वौ । हान्तेषु—दह्, दुह्, दिह्, नह्, मिह्, रुह्, लिह् वह् इत्यष्टौ । एवमिमे हलन्ता त्र्युत्तरशतं धातवोऽनुदात्ताः गणिताः ।

तदत्र छात्राणां सारल्येन इडागमबोधाय संग्रहः क्रियते—

अजन्तोऽकारवान्वा यस्तास्यनिट् थलिवेडयम् ।
ऋदन्त ईदृङ् नित्यानिट् क्राद्यन्तो लिटि सेड् भवेत् ॥

अस्याः कारिकायाः सम्यगर्थश्छात्रैरेवं बोध्यः—कृ-सृ-भृ-वृ-स्तु-द्रु-स्रु-श्रुवो लिटि, अचस्तास्वत्थल्यनिटो नित्यम्, उपदेशे त्वतः, ऋतो भारद्वाजस्य, इति चतुर्णां सूत्राणां संग्रहोऽत्र वक्ष्यते । अजन्तः इति—यो धातुः ऋदन्तभिन्नोऽजन्तो ह्रस्वाकारवान् वा तासौ नित्यानिट् सोऽयं थलि विकल्पितेट्को भवतीति पूर्वार्धस्यार्थः । अत्र ईदृक् इत्यस्य तासौ नित्यानिडित्यर्थः । यः ऋदन्तस्तासौ नित्यानिट् सः थलि नित्यानिडित्यर्थः । 'अचस्तास्वत्थल्यनिटो नित्यम्' इति पाणिनिमते 'ऋतो भारद्वाजस्य' इति भारद्वाजमतेऽपि तस्य अनिट्कत्वादिति भावः । क्राद्यन्य इति । क्राद्यष्टाभ्योऽन्यो धातुः लिटि नित्यं सेड् भवतीत्यर्थः । क्राद्यष्टभ्य एव परस्य लिटि नेडिति "कृ-सृ-भृ-वृ" इत्यादिसूत्रेण नियमितत्वादिति भावः ।

क्षीयात्—क्षि क्षये इत्यस्माद्धातोः आशिष् लिङ् लकारे प्रथमपुरुषैकवचने तिपि 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे क्षि+याट्+ति इति जाते 'इतश्च' इत्यनेन तिप इकारलोपे 'स्कोः संयोगाद्योरन्ते च' इत्यनेन सकारलोपे 'अकृत सार्वधातुकयोर्दीर्घः' इत्यनेन इकारस्य दीर्घे क्षीयात् इति सिद्धम् ।

अक्षैषीः—क्षि क्षये इत्यस्माद्धातोः लुङ् लकारे मध्यमपुरुषैकवचने सिपि अनुबन्धलोपे 'च्लि लुङि' इत्यनेन च्लि प्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः सिजादेशे अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः इत्यनेन अडागमे अनुबन्धलोपे अ+क्षि+स्+सि इति जाते 'इतश्च' इत्यनेन सिप इकार लोपे सस्य 'अपृक्त एकाल्प्रत्ययः' इत्यनेनापृक्तसंज्ञायां 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे अनुबन्धलोपे अ+क्षि+स्+ई+स् इति जाते 'सिचि वृद्धिः परस्मैपदेषु' इत्यनेन वृद्धौ संयोगे अक्षैसीस् इति जाते 'आदेशप्रत्यययोः' इत्यनेन सिचः सकारस्य षत्वे सिपः सकारस्य रुत्वे विसर्गे च अक्षैषीः इति सिद्धम् ।

अक्षैषीत्—क्षि क्षये इत्यस्माद्धातोः 'लुङ्' इत्यनेन लुङ् लकारेऽनुबन्धलोपे लस्य प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे इतश्चेति इकारलोपे 'च्लि लुङि' इति च्लौ 'च्लेः सिच्' इत्यनेन सिचि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ+क्षि+स+त् इति जाते 'आर्धधातुकं शेषः' इत्यनेन सिच आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड्वलादेः' इत्यनेन इटि प्राप्ते 'एकाच उपदेशे-

ऽनुदात्तात्' इत्यनेन निषेधे 'अपृक्त एकाल्प्रत्ययः' इत्यनेन तिपस्तकारस्यापृक्त-संज्ञायां 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे अनुबन्धलोपे अ+क्षि+स+ई+त् इति जाते 'सिचि वृद्धिः परस्मैपदेषु' इत्यनेन क्षिधातोर्वृद्धौ संयोगे 'आदेशप्रत्यययोः' इत्यनेन सकारस्य षत्वे अक्षैषीत् इति सिद्धम् ।

निष्टपति—निसुपसर्गात् तप सन्तापे इत्यस्माद्धातोः प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'कर्तरि शप्' इत्यनेन शबागमेऽनुबन्धलोपे । निस्+तप्+अ+ति इति जाते 'निसस्तपतावनासेवने' इत्यनेन सकारस्य षत्वे 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वे संयोगे च निष्टपति इति सिद्धम् ।

क्राम्यति—क्रमु पादविक्षेपे इत्यस्माद्धातोः लट् लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'तिङ् शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शपि प्राप्ते 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' इत्यनेन विकल्पेन श्यन् प्रत्ययेऽनुबन्धलोपे क्रम+य+ति इति जाते 'क्रमः परस्मैपदेषु' इत्यनेनोपधादीर्घे संयोगे क्राम्यति इति सिद्धम् । श्यन्प्रत्ययाभावे शबागमे क्रामति इति रूपं जायते ।

स्नुक्रमोरनात्मनेपदनिमित्ते ॥ ७।२।३६ ॥

आत्मनेपदनिमित्ताऽभावे सति स्नुक्रमाभ्यां परस्य बलाद्यार्धधातुकस्य इडागमः स्यात् ।

क्रमिति—क्रमु पादविक्षेपे इत्यस्माद्धातोः लुट्लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे कर्तरि शप् इत्यनेन शपि प्राप्ते तं प्रबाध्य 'स्यतासी ल्लुटोः' इत्यनेन तास् प्रत्यये तस्य 'आर्धधातुकं शेषः' इत्यनेनार्धधातुकसंज्ञायां 'आर्धधातुकस्येड्बलादेः' इत्यनेन इडागमे प्राप्ते तं प्रबाध्य 'स्नुक्रमोरनात्मनेपदनिमित्ते' इत्यनेन नियामके इडागमे अनुबन्धलोपे क्रम+इ+तास्+ति इति जाते 'लुटः प्रथमस्य डारौरसः' इत्यनेन तिपः डादेशे अनुबन्धलोपे डित्वसामर्थ्यात् तास् प्रत्यये टिभागस्य लोपे क्रम+इ+त्+आ इति जाते संयोगे क्रमिता इति सिद्धम् ।

अक्रमीत्—क्रमुपादविक्षेपे इत्यस्माद्धातोः लुङ्लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिजादेशे अनुबन्धलोपे अ+क्रम्+स्+ति इति जाते इतश्च इत्यनेन इकारस्य लोपे 'आर्धधातुकं शेषः' इत्यनेन सिच आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड्बलादेः' इत्यनेन इडागमे प्राप्ते तं प्रबाध्य स्नुक्रमोरनात्मनेपदनिमित्ते इत्यनेन नियामके इडागमे अनुबन्धलोपे

'अपृक्त एकाल्प्रत्ययः' इत्यनेन तकारस्यापृक्तसंज्ञायां 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे अनुबन्धलोपे अ+कम्+इ+स्+ई+त् इति जाते 'इट ईटि' इत्यनेन सिचो लोपे 'अतो हलादेर्लघोः' इत्यनेन उपधावृद्धौ प्राप्तायां 'ह्म्यन्तक्षणश्वसजागृ···' इत्यादिना निषेधे सवर्णदीर्घे संयोगे च अक्रमीत् इति सिद्धम् ।

आचामति—आङ्पूर्वात् चमु अदने इत्यस्माद्धातोः लट्लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शबागमे अनुबन्धलोपे आ+चम्+अ+ति इति स्थिते 'ष्ठिवुक्लमुचमां शिति' इत्यनेन दीर्घे प्राप्ते 'आङि चम इति वक्तव्यम्' इति वार्तिकेन नियामके उपधादीर्घे संयोगे च आचामति इति सिद्धम् ।

अस्खालीत्—स्खल संचलने इत्यस्माद्धातोः लङ्लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे इतश्च इति तिप इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'च्लि लुङि' इत्यनेन च्लौ तस्य 'च्लेः सिच्' इत्यनेन सिजादेशे अनुबन्धलोपे अ+स्खल्+स्+त् इति जाते सिचः 'आर्धधातुकं शेषः' इत्यनेनार्धधातुकसंज्ञायां 'आर्धधातुकस्येड्बलादेः' इत्यनेन इडागमे अनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे अ+स्खल्+इ+स्+ई+त् इति जाते 'इट ईटि' इत्यनेन सिचो लोपे सवर्णदीर्घे 'अतो ल्रान्तस्य' इत्यनेन धातोरतो वृद्धौ संयोगे च अस्खालीत् इति सिद्धम् ।

पिबति—पा पाने इत्यस्माद्धातोः प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे पा+ति इति जाते 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शबागमेऽनुबन्धलोपे पा+अ+ति इति जाते 'पाघ्राध्मास्था···' इत्यादिना पा धातोः पिबादेशे तस्यादन्तत्वात् उपधागुणाभावे पिब+अ+ति इति जाते सवर्णदीर्घे प्राप्ते परत्वात् 'अतो गुणे' इत्यनेन पररूपे पिबति इति सिद्धम् ।

पपौ—पा पाने इत्यस्माद्धातोः 'परोक्षे लिट्' इत्यनेन लिट् लकारे अनुबन्धलोपे लस्य स्थाने तिपि तिपः 'परस्मैपदानां णलतुसुस्थल···' इत्यादिना णलादेशे अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्विर्भावे पा+पा+अ इति जाते 'आत औ णलः' इत्यनेन णलः औकारादेशे पा+पा+औ इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायां 'ह्रस्वः' इत्यनेन अभ्यासस्य ह्रस्वत्वे प+पा+औ इति जाते । 'आतो लोप इटि च' इत्यनेन आकारलोपे संयोगे पपौ इति सिद्धम् ।

पपतुः—पा पाने इत्यस्माद्धातोः 'परोक्षे लिट्' इत्यनेन लिट् लकारे अनुबन्धलोपे लस्य स्थाने प्रथमपुरुषद्विवचने तस् प्रत्यये तस्य 'परस्मैपदानाणलतुसुस्थल....' इत्यादिना अतुस् प्रत्यये पा+अतुस् इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे पा+पा+अतुस् इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्यासत्वे 'ह्रस्वः' इत्यनेन ह्रस्वत्वे प+पा+अतुस् इति जाते 'आतो लोप इटि च' इत्यनेन अकारस्य लोपे संयोगे सकारस्य रुत्वे विसर्गे च पपतुः इति सिद्धम् ।

पपिथ—पा रक्षणे इत्यस्माद्धातोः लिङ्लकारे मध्यमपुरुषैकवचने थलि प्रत्यये अनुबन्धलोपे द्वित्वे अभ्यासत्वे ह्रस्वत्वे च प+पा+थ इति जाते 'आतो लोप इटि च' इत्यनेन आकारलोपे 'ऋतो भारद्वाजस्य' इति नियमात् वैकल्पिक इडागमे प+प्+इ+थ इति जाते संयोगे पपिथ इति सिद्धम् । इडभावे पपाथ इति जायते ।

अपात्—पा रक्षणे इत्यस्माद्धातोः 'लुङ्' इत्यनेन लुङ् लकारे अनुबन्धलोपे लस्य स्थाने प्रथमपुरुषैकवचने तिपि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ+पा+ति इति जाते 'च्लि लुङि' इत्यनेन च्लि प्रत्यये 'च्लेः सिच्' इत्यनेन सिच् प्रत्यये अनुबन्धलोपे अ+पा+स+ति इति जाते 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचो लोपे 'इतश्च' इत्यनेन तिप इकारलोपे संयोगे च अपात् इति सिद्धम् ।

अपुः—पा रक्षणे इत्यस्माद्धातोः लुङ् लकारे अनुबन्धलोपे लस्य स्थाने प्रथमपुरुषबहुवचने झि प्रत्यये पा+झि इति जाते 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'अ+पा+झि' इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिजादेशे अनुबन्धलोपे अ+पा+स्+झि इति जाते 'गातिस्थाघुपाभूभ्यः परस्मैपदेषु' इत्यनेन सिचो लुकि 'आतः' इत्यनेन झेर्जुसादेशे अनुबन्धलोपे अ+पा+उस् इति जाते 'आद्गुणः' इत्यनेन गुणे प्राप्ते 'उस्यपदान्तात्' इत्यनेन पररूपे संयोगे सकारस्य रुत्वे विसर्गे च अपुः इति सिद्धम् ।

ग्लेयात्—ग्लै हर्षक्षये इत्यस्माद्धातोः आशिषि लिङ्लकारे अनुबन्धलोपे लस्य तिपि 'लिङाशिषि' इत्यनेन लिङ् लकारस्यार्धधातुकत्वात् शबभावे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यनेन नित्ये ऐकारस्यात्वे प्राप्ते 'वान्यस्य संयोगादेः' इत्यनेन वैकल्पिके एत्वे सुट् तिथोः इत्यनेन च सुटि अनुबन्धलोपे ग्ले+यास्+स्+ति इति जाते 'स्कोः

संयोगाद्योरन्ते च' इत्यनेनोभयोः सकारयोर्लोपे इतश्च इत्यनेन तिप इकारलोपे ग्लेयात् इति सिद्धम् । एत्वाभावपक्षे ग्लायात् ।

अग्लासीत्—ग्लै हर्षक्षये इत्यस्माद्धातोः 'लुङ्' इत्यनेन लुङ् लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यनेन आत्वे 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे 'यमरमनमातां सक् च' इत्यनेन सिचः सकागमे इडागमे च अनुबन्धलोपे 'अपृक्त एकाल्प्रत्ययः' इत्यनेन अपृक्तसंज्ञायां 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे 'इट ईटि' इत्यनेन सिचो लोपे अ+ग्ला+स्+इ+ई+त् इति जाते 'अकः सवर्णे दीर्घः' इत्यनेन सवर्णदीर्घे कर्तव्ये 'पूर्वत्राऽसिद्धम्' इत्यनेन सिज्लोपस्यासिद्धत्वे प्राप्ते 'सिज्लोप एकादेशे सिद्धो वक्तव्यः' इति वार्तिकेन सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घे संयोगे च अग्लासीत् इति सिद्धम् ।

अधात्—धेट् पाने इत्यस्माद्धातोः लुङ्लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यनेनाऽऽत्वे धा+ति इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ+धा+स+ति इति जाते 'विभाषाघ्राधेट्शाच्छासः' इत्यनेन विकल्पेन सिचो लुकि 'इतश्च' इत्यनेन इकारलोपे संयोगे च अधात् इति सिद्धम् ।

अधासीत्—धेट् पाने इत्यस्माद्धातोः लुङ्लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यनेनाऽऽत्वे अ+धा+ति इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिजागमे अनुबन्धलोपे अ+धा+स+ति इति जाते 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायां 'यमरमनमातां सक्च' इत्यनेन सकागमे इडागमे अनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे च अ+धा+स्+इ+स्+ई+ति इति जाते 'इट ईटि' इत्यनेन सिचो लोपे 'सिज्लोप एकादेशे सिद्धो वक्तव्यः' इत्यनेन सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घे संयोगे अधासीत् इति सिद्धम् ।

अदधत्—धेट् पाने इत्यस्माद्धातोः लुङ्लकारे अनुबन्धलोपे लस्य स्थाने प्रथमपुरुषैकवचने तिपि 'आदेच उपदेशेऽशिति' इत्यनेन एकारस्य आत्वे अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'च्लि लुङि' इत्यनेन च्लौ 'विभाषाधेट्श्योः' इत्यनेन विकल्पेन च्लिलुङि अनुबन्धलोपे अ+धा+

+ति इति जाते 'चङि' इत्यनेन द्वित्वे 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायां ह्रस्वः' इत्यनेन अभ्यासस्य ह्रस्वत्वे 'अभ्यासे चर्च' इत्यनेन चर्त्वे आन्ततर्म्यात् कारस्य दकारे अ+द+धा+अ+ति इति जाते 'आतो लोप इटि च' इत्यनेन आकारस्य लोपे 'इतश्च' इत्यनेन तिप इकारलोपे अदधत् इति सिद्धम्।

दायति—दैप् शोधने इत्यस्माद्धातो अनुबन्धलोपे लट्लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे दै+अ+ति इति जाते 'एचोऽयवायावः' इत्यनेन आयादेशे संयोगे च दायति इति सिद्धम्।

दायात्—दैप् शोधने इत्यस्माद्धातोः 'आशिषि लिङ्लोटौ' इत्यनेन आशिष् लिङ्लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे दै+ति इति जाते यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे दै+यास्+ति इति जाते लिङाशिषि इत्यनेन आर्धधातुकसंज्ञायां 'आदेच उपदेशेऽशिति' इत्यनेन धातोरैकारस्य आत्वे 'स्कोः संयोगाद्योरन्ते च' इत्यनेन यासः सकारस्य लोपे दा+या+ति इति जाते 'इतश्च' इत्यनेन तिप इकारस्य लोपे दायात् इति सिद्धम्।

अदासीत्—दैप् शोधने इत्यस्माद्धातोः लुङ्लकारे परस्मैपदे प्रथमपुरुषैकवचने तिपि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यनेन दै धातोरैकारस्यात्वे अ+दा+ति इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिजागमे अनुबन्धलोपे 'आर्धधातुकं शेषः' इत्यनेनार्धधातुकसंज्ञायां 'यमरमनमातां सक् च' इत्यनेन सिचि सकागमे इडागमे 'इतश्च' इति तिप इकारलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे च अनुबन्धलोपे 'इट ईटि' इत्यनेन सिचो लोपे अ+दा+स्+इ+ई+त् इति जाते 'सिज्लोप एकादेशे सिद्धो वक्तव्यः' इति वार्तिकेन सिज्लोपस्य सिद्धत्वात् 'अकः सवर्णे दीर्घः' इत्यनेन सवर्णदीर्घे संयोगे च अदासीत् इति सिद्धम्।

जिघ्रति—घ्रा गन्धोपादाने इत्यस्माद्धातोः लट् लकारे प्रथमपुरुषैकवचने तिपि 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे 'पाघ्राध्मास्थेटित्यादिना' जिघ्रादेशे जिघ्र+अ+ति इति जाते 'अकः सवर्णे दीर्घे' इत्यनेन दीर्घे प्राप्ते 'अतो गुणे' इत्यनेन पररूपे जिघ्रति इति सिद्धम्।

पपौ—पा पाने इत्यस्माद्धातोः प्रथमपुरुषैकवचने तिपि तस्य णल पा+णल् इत्यत्र 'आत औ णलः' इत्यनेन णलः औकारादेशे 'लिटि धातो नभ्यासस्य' इत्यनेन द्वित्वे पा+पा+औ इति जाते 'पूर्वोऽभ्यासः' इत्य अभ्याससंज्ञायां 'ह्रस्वः' इत्यनेन ह्रस्वत्वे प+पा+औ इति जाते 'लिट इत्यनेनार्धधातुकसंज्ञायां 'आतो लोप इटि च' इत्यनेन आकारलोपे प+प्+ इति जाते संयोगे पपौ इति सिद्धम्।

स्थेयात्—ष्ठा गतिनिवृत्तौ इत्यस्माद्धातोः 'धात्वादेः षः सः' इत्य मूर्धन्यस्य दन्त्यादेशे स्था इत्यस्मात् आशिषि लिङि प्रथमपुरुषैकवचने तिपि बन्धलोपे स्था+ति इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्य यासुडागमे अनुबन्धलोपे 'ऐलिङि' इत्यनेन एत्वे स्थे+यास्+ति इति 'इतश्च' इत्यनेन इकारलोपे 'स्कोः संयोगाद्योरन्ते च' इत्यनेन सकारल स्थेयात् इति सिद्धम्।

ह्वर्यात्—ह्वृ कौटिल्ये इत्यस्माद्धातोः आशिषि लिङि प्रथमपुरुषैकव तिपि ह्वृ+ति इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडा अनुबन्धलोपे ह्वृ+या+ति इति जाते 'लिङाशिषि' इत्यनेन यासुट आर्धधातु संज्ञायां 'गुणोर्ति संयोगाद्योः' इत्यनेन गुणे ह्वर्+या+ति इति जाते 'इत इत्यनेन तिप इकारलोपे संयोगे ह्वर्यात् इति सिद्धम्।

जह्वार—ह्वृ कौटिल्ये इत्यस्माद्धातोः लिट् लकारे प्रथमपुरुषैकव तिपः स्थाने णलादेशे अनुबन्धलोपे द्वित्वे ह्वृ+ह्वृ+अ इति जाते 'पूर्वोऽभ्या इत्यनेन अभ्याससंज्ञायां 'उरत्' इत्यनेन ऋकारस्य अतादेशे रपरत्वे च ह्वर ह्वृ+अ इति जाते 'हलादिः शेषः' इत्यनेन हलादिशेषे ह+ह्वृ+अ इति 'कुहोश्चुः' इत्यनेन चुत्वे आन्तर्तम्यात् हकारस्य झकारादेशे 'अभ्यासे चर्च' नेन जश्त्वे ज+ह्वृ+अ इति जाते 'अचो ञ्णिति' इत्यनेन प्राप्तां वृद्धिं प्रव 'ऋतश्च संयोगादेर्गुणः' इत्यनेन गुणे संयोगे जह्वर्+अ इति जाते 'उपधा इत्यनेन वृद्धौ जह्वार इति सिद्धम्।

जह्वर्थ—ह्वृ कौटिल्ये इत्यस्माद्धातोः 'परोक्षे लिट्' इत्यनेन लिट्लक ञनुबन्धलोपे लस्य स्थाने सिपि तस्य 'परस्मैपदानां णलतुसुस्थलथुसणल्व इत्यनेन थ आदेशे जह्वृ+थ इति जाते 'ऋतश्च संयोगादेर्गुणः' इत्यनेन गुणे 'अ धातुकस्येड्वलादेः' इत्यनेन इटि प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इत्य निषेधे संयोगे जह्वर्थ इति सिद्धम्।

ह्वरिष्यति—ह्वृ कौटिल्ये इत्यस्माद्धातोः 'लृट् शेषे च' इत्यनेन भविष्यति लृट् लकारे अनुबन्धलोपे लस्य स्थाने तिपि अनुबन्धलोपे 'स्यतासी लृलुटोः' इत्यनेन स्य प्रत्यये 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'आर्धधातुकस्येड्बलादेः' इत्यनेन इटि प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इत्यनेन निषेधे 'ऋद्धनोस्ये' इत्यनेन इडागमेऽनुबन्धलोपे आदेशप्रत्यययोः' इत्यनेन सस्य मूर्धन्यत्वे संयोगे ह्वरिष्यति इति सिद्धम् ।

ह्वर्यात्—ह्वृ कौटिल्ये इत्यस्माद्धातो 'आशिषि लिङ्लोटौ' इत्यनेन लिङ् लकारे अनुबन्धलोपे लस्य स्थाने तिपि अनुबन्धलोपे 'लिङाशिषि' इत्यनेन तिप आर्धधातुकत्वात् 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुट् प्रत्यये 'किदाशिषि' इत्यनेन तस्य आर्धधातुकत्वेऽनुबन्धलोपे ह्वृ + यास् + ति इति जाते 'सार्वधातुकोः संयोगादेरन्ते च' इत्यनेन सकारलोपे 'इतश्च' इत्यनेन इकारलोपे ह्वृ + या + त् इति जाते यासुटः कित्वात् गुणाभावे प्राप्ते 'गुणोर्तिसंयोगाद्योः' इत्यनेन गुणे संयोगे ह्वर्यात् इति सिद्धम् ।

अह्वार्षीत्—ह्वृ कौटिल्ये इत्यस्माद्धातोः लुङ्लकारे प्रथमपुरुषैकवचने तिपि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ + ह्व + ति इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन तस्य सिचि अनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे अनुबन्धलोपे अ + ह्वृ + स् + ई + ति इति जाते सिचः सकारस्य आर्धधातुकत्वे 'आर्धधातुकस्येड्बलादेः' इति इटि प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इत्यनेन निषेधे 'इतश्च' इत्यनेन तिप इकारलोपे 'सिचि वृद्धिः परस्मैपदेषु' इत्यनेन वृद्धौ रपरत्वे अ + ह्वार् + स + ई + त् इति जाते 'आदेशप्रत्यययोः' इत्यनेन मूर्धन्यत्वे संयोगे अह्वार्षीत् इति सिद्धम् ।

तिष्ठति—ष्ठा गतिनिवृत्तौ इत्यस्माद् भ्वादिगणस्थाद्धातोः, लट्लकारे तिपि ष्ठा + ति इति जाते 'धात्वादेः षः सः' इत्यनेन मूर्धन्यस्य सकारादेशे षकारे कृते प्रकृतिः ठकारः तकारो जातः । तेन स्था + ति इति जाते 'पाघ्राध्मा.....' इत्यादिना तिष्ठ आदेशे 'तिङ्शित् सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे तिष्ठ + अ + ति इति जाते 'अतो गुणे' इत्यनेन पररूपं तिष्ठति इति सिद्धम् ।

अधितष्ठौ—अधिउपसर्गात् ष्ठा गतिनिवृत्तौ इत्यस्माद्धातोः लिट् लकारे प्रथमपुरुषैकवचने तिपः स्थाने णल् आदेशे अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायां 'शर्पूर्वाखयः'

इत्यनेन द्वितीयाक्षरस्य शेषे था+स्था+णल् इति जाते 'ह्रस्वः' इ
अभ्यासस्य ह्रस्वत्वे 'अभ्यासे चर्च' इत्यनेन चर्त्वे 'आत औ णलः' इत्यनेन
स्थाने औकारादेशे, त+स्था+औ इति जाते 'वृद्धिरेचि' इत्यनेन वृद्धौ
'स्थादिष्वभ्यासेन चाभ्यासस्य' इत्यनेन सकारस्य मूर्धन्यादेशे 'ष्टुना
इत्यनेन ष्टुत्वे थकास्य ठकारे अधितष्ठौ इति रूपं सिद्धम् ।

प्रश्नः—ष्ठा गतिनिवृत्तौ इति धातोः स्थेयात् इत्यादौ षकारस्य सत्वे
ठकारस्य निवृत्तिः कथं स्यादित्येतत्सम्यग्व्याख्यायताम् ।

उत्तरम्—अत्र मध्यसिद्धान्तकौमुदीकारः प्रमाणत्वेनेमं श्लोकमुपन्यस्यति

नकारजावनुस्वारपञ्चमौ झलि धातुषु ।
सकारजः शकारश्च षाट्वर्गस्तवर्गजः ॥

धातुषु मध्ये झलिपरतः यौ नकाराज्जातौ अनुस्वारपञ्चमौ तथा
सकाराज्जातः शकारस्तथा च षकारात्परो विद्यमानः तवर्गाज्जातष्टवर्ग
प्रकृतिस्थितिं लभते । तेन षकारात्परो तवर्गस्थकारो मूलस्थितिं ल
ठकारस्य थकाराज्ज ानत्वादिति भावः ।

सस्वर्थ—स्वृशब्दोपतापयोः इत्यस्माद्धातोः लिट्लकारे अनुबन्धलोपे
स्थाने मध्यमपुरुषैकवचने थलि अनुबन्धलोपे 'लिटि धातोरनभ्यास्य' इ
द्वित्वे स्वृ+स्वृ+थ इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायां 'ह
शेषः' इत्यनेन हलादिशेषे स+स्वृ+थ इति जाते 'लिट् च' इत्यनेन आर्धधा
संज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इत्यनेन इटि प्राप्ते 'एकाच उपदेशेऽनुदात्
इत्यनेन निषेधे 'ऋतो भारद्वाजस्य' इत्यनेन विकल्पेन इटि प्राप्ते 'कृसृभृ
द्रुस्रुश्रुवो लिटि' इति क्रादिनियमात् निषेधे 'स्वरतिसूतिसूयतिधूञूदितो
इत्यनेन विकल्पेन इडागमे जाते, इडाभावपक्षे स+स्वृ+थ इति जाते तथा
पक्षे स+स्वृ+इ+थ इति जाते 'गुणोर्तिसंयोगाद्योः' इत्यनेन उभयत्र
संयोगे च सस्वर्थ पक्षे सस्वरिथ इति सिद्धम् ।

सस्वरिव—स्वृ शब्दोपतापयोः इत्यस्माद् भ्वादिगणस्थाद् धातोः
लकारे उत्तमपुरुषद्विवचने स्वृ+वस् इति जाते 'परस्मैपदानां णलतु
इत्यादिना व आदेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे 'पूर्वोऽभ्य
इत्यनेन अभ्यासत्वे 'उरत्' इत्यनेन अभ्यासऋकारस्य अकारादेशे
'हलादिः शेषः' इत्यनेन हलादिशेषे स+स्वृ+व इति जाते 'स्वरति
सूयति...' इत्यादिना प्राप्तं वैकल्पिकमिटं प्रबाध्य 'श्र्युकः किति' इ

निषेधे प्राप्ते 'कृसृभृवृस्तुद्रुश्रुवो लिटि' इत्यनेन क्रादि नियमात् नित्ये इटि स+स्वृ+इ+व इति जाते 'लिट् च' इत्यनेन आर्धधातुकसञ्ज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे रपरत्वे संयोगे च सस्वरिव इति सिद्धम् ।

स्रियात्—सृ गतौ इत्यस्माद् भुवादिगणस्थाद् धातोः 'आशिषि लिङ्लोटौ' इत्यनेन आशिष् लिङ् लकारे अनुबन्धलोपे लस्य स्थाने तिपि अनुबन्धलोपे सृ+ति इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे 'सुट् तिथोः' इत्यनेन सुडागमे अनुबन्धलोपे सृ+यास्+स्+ति इति जाते 'रिङ् शयग्लिङ्क्षु' इत्यनेन ऋकारस्य रिङादेशे अनुबन्धलोपे स्+रि+यास्+स्+ति इति जाते 'लिङः सलोपोऽनन्त्यस्य' इत्यनेनोभयोः सकारयोर्लोपे 'इतश्च' इत्यनेन तिप इकारलोपे संयोगे च स्रियात् इति सिद्धम् । अत्र सृ धातोः ऋकारस्य रिङ् विधानसामर्थ्यात् 'अकृतसार्वधातुकयोर्दीर्घः' इत्यनेन दीर्घो न भवति ।

पश्यति—दृशिर् प्रेक्षणे इत्यस्माद् भ्वादिगणस्थाद् धातोः लट्लकारे प्रथमपुरुषैकवचने तिपि 'इर इत्संज्ञा वाच्या' इत्यनेनानुबन्धलोपे दृश्+ति इति जाते 'पाघ्राध्मा···' इत्यादिना पश्य् आदेशे 'कर्तरि शप्' इत्यनेन शप् प्रत्यये अनुबन्धलोपे पश्य्+अ+ति इति जाते संयोगे पश्यति इति सिद्धम् ।

ददृशतु—दृशिर प्रेक्षणे इत्यस्माद् भ्वादिगणस्थाद् धातोः लिट्लकारप्रथमपुरुषद्विवचने दृश्+अतुस् इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे 'पूर्वोऽभ्यासः' इत्यनेन अभ्यासत्वे 'उरत्' इत्यनेन अभ्यासऋकारस्य अकारादेशे रपरत्वे दर्+दृश्+अतुस् इति जाते 'हलादिः शेषः' इत्यनेन हलादिशेषे ददृश्+अतुस् इति जाते 'लिट् च' इत्यनेन आर्धधातुकसंज्ञायाम् 'पुगन्तलघूपधस्य च' इत्यनेन गुणे प्राप्ते 'ऋदुपधेभ्यो लिटः कित्वं 'गुणात्पूर्वविप्रतिषेधेन' इत्यनेन निषेधे संयोगे च ददृशतुः इति सिद्धम् ।

द्रक्ष्यति—दृशिर् प्रेक्षणे इत्यस्माद् भ्वादिगणस्थाद् धातोः 'लृट् शेषे च' इत्यनेन लृट् लकारे अनुबन्धलोपे लस्य स्थाने तिपि अनुबन्धलोपे दृश्+ति इति जाते 'स्यतासी लृलुटोः' इत्यनेन स्य प्रत्यये 'सृजिदृशोर्झल्यमकिति' इत्यनेन अमागमे अनुबन्धलोपे दृ+अ+स्य+ति इति जाते 'इको यणचि' इत्यनेन यणादेशे द्+र्+अ+श्+स्य+ति इति जाते 'व्रश्चभ्रस्ज' इत्यादिना दृशः शकारस्य षत्वे 'षढो कः सि' इत्यनेन षकारस्य ककारादेशे संयोगे द्रक्+

स्य + ति इति जाते 'आदेशप्रत्यययोः' इत्यनेन सस्य मूर्धन्यादेशे संयोगे द्रक्ष्यति इति सिद्धम् ।

अद्राक्षीत्—दृशिर् प्रेक्षणे इत्यस्माद् भ्वादिगणस्थाद् धातोः 'लुङ्' इत्यनेन लुङ् लकारे 'इर इत्संज्ञा वाच्या' इत्यनेन अनुबन्धलोपे लस्य स्थाने तिपि अनुबन्धलोपे 'लुङ्लङ्लङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ+दृश्+ति इति जाते 'च्लि लुङि' इत्यनेन च्ली 'च्लेः सिच्' इत्यनेन सिचि प्राप्ते 'इरितो वा' इत्यनेन विकल्पेन च्लेरङादेशे अङाऽभावपक्षे 'शल इगुपधात्' निटः क्सः' इत्यनेन 'च्लेः क्स' आदेशे प्राप्ते 'नदृशः' इत्यनेन निषेधे 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे अ+दृश्+स+ति इति जाते 'व्रश्चभ्रस्ज...' इत्यादिना शकारस्य षत्वे 'षढोः कः सि' इत्यनेन षकारस्य ककारादेशे 'सृजिदृशोझल्यमकिति' इत्यनेन अमादेशे 'इको यणचि' इत्यनेन यणादेशे 'वदव्रजहलन्तस्याचः' इत्यनेन अकारस्य वृद्धौ च 'इतश्च' इत्यनेन तिप इकारलोपे अ+द्रा+क्+स+त् इति जाते 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि 'आदेशप्रत्यययोः' इत्यनेन षत्वे अ+द्रा+क्+ष्+ई+त् इति जाते संयोगे च अद्राक्षीत् इति सिद्धम् ।

अदर्शत्—दृशिर प्रेक्षणे इत्यस्माद् भ्वादि गणस्थाद् धातोः 'इर इत्संज्ञा वाच्या' इत्यनेन अनुबन्धलोपे 'लुङ्' इत्यनेन लुङ्लकारे अनुबन्धलोपे लस्य स्थाने तिपि अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अ+दृश्+ति इति जाते 'च्लि लुङि' इत्यनेन च्ली 'च्लेः सिच्' इत्यनेन सिचि प्राप्ते 'इरितो वा' इत्यनेन विकल्पेन च्लेरङादेशे अनुबन्धलोपे अ+दृश्+अ+ति इति जाते अङो ङित्वात् 'पुगन्तलघूपधस्य' इत्यनेन प्राप्तगुणस्य निषेधे 'ऋदृशो ङि गुणः' इत्यनेन ऋकारस्य गुणे रपरत्वे 'इतश्च' इत्यनेन तिप इकारलोपे अदर्शत् इति सिद्धम् ।

शृणोति—श्रु श्रवणे इत्यस्माद् भ्वादिगणस्थाद् धातोः लट्लकारे प्रथम पुरुषैकवचने तिपि अनुबन्धलोपे 'श्रुवः शृ च' इत्यनेन शृ आदेशे श्नु प्रत्यये अनुबन्धलोपे च शृ+नु+ति इति जाते 'ऋवर्णान्नस्य णत्वं वाच्यम्' इत्यनेन नस्य णत्वे 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे संयोगे च श्रणोति इति सिद्धम् ।

शृण्वः—श्रु श्रवणे इत्यस्माद् भ्वादिगणस्थाद् धातोः लट्लकारे उत्तमपुरुषे द्विवचने वस् प्रत्यये 'श्रुवः शृ च' इत्यनेन शृ आदेशे श्नु प्रत्यये च अनुबन्धलोपे

शृ+नु+वस् इति जाते 'ऋवर्णान्नस्य णत्वं वाच्यम्' इत्यनेन नकारस्य णत्वे 'सार्वधातुकमपित्' इत्यनेन वस् प्रत्ययस्य ङित्वे ङित्वाद् गुणाभावे शृ+णु+वस् इति जाते 'लोपश्चास्यान्यतरस्यां म्वोः' इत्यनेन विकल्पेन श्नु प्रत्ययस्य उकारस्य लोपे सस्य रुत्वे विसर्गे च लोपपक्षे शृण्वः इति रूपं सिद्धम्। लोपाऽभावपक्षे शृणुवः इति रूपं जायते।

शृण्वन्ति—श्रु श्रवणे इत्यस्माद् भ्वादिगणस्थाद् धातोः लट्लकारे प्रथमपुरुषबहुवचने झि प्रत्यये 'झोऽन्तः' इत्यनेन झेः अन्तादेशे शृ+अन्ति इति जाते 'ऋवर्णान्नस्य णत्वं वाच्यम्' इत्यनेन नकारस्य णत्वे शृ+णु+अन्ति इति जाते 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकत्वे 'सार्वधातुकार्धधातुकयोः' इत्यनेन नुवर्ति उकारस्य गुणे प्राप्ते 'सार्वधातुकमपित्' इत्यनेन ङित्वे ङित्वाद्गुणाऽभावे प्राप्ते 'अचि श्नुधातुभ्रुवां.....' इत्यादिना उवङादेशे प्राप्ते तं प्रबाध्य 'हुश्नुवोः सार्वधातुके' इत्यनेन यणादेशे संयोगे च शृण्वन्ति इति सिद्धम्।

शृणु—श्रु श्रवणे इत्यस्माद् भ्वादिगणस्थाद् धातोः लोट्लकारे मध्यमपुरुषैकवचने सिपि 'श्रुवः शृ च' इत्यनेन श्रुधातोः शृ आदेशे श्नु प्रत्यये अनुबन्धलोपे शृ+नु+सि इति जाते 'सेर्ह्यपिच्च' इत्यनेन सेः हि आदेशे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इत्यनेन नकारस्य णत्वे शृ+णु+हि इति जाते 'सार्वधातुकमपित्' इत्यनेन हि प्रत्ययस्य ङित्वेन गुणाऽभावे 'उतश्च प्रत्ययादसंयोगपूर्वात्' इत्यनेन हेर्लोपे संयोगे च शृणु इति सिद्धम्।

शृणुयुः—श्रु श्रवणे इत्यस्माद् भ्वादिगणस्थाद् धातोः 'विधि निमन्त्रणा...' इत्यादिना विधिलिङि प्रथमपुरुषबहुवचने झि प्रत्यये 'झेर्जुस्' इत्यनेन झेः जुसादेशे 'श्रुवः शृ च' इत्यनेन श्रु धातोः शृ आदेशे श्नु प्रत्यये च शृ+नु+उस् इति जाते 'ऋवर्णान्नस्य णत्वं वाच्यम्' इत्यनेन नकारस्य णत्वे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे शृ+णु+यास्+उस् इति जाते 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन यासुटः सकारलोपे शृ+णु+या+उस् इति जाते 'आद् गुणः' इत्यनेन गुणे प्राप्ते 'उस्यपदान्तात्' इत्यनेन पररूपे संयोगे सकारस्य रुत्वे विसर्गे च शृणुयुः इति सिद्धम्।

अशृणवम्—श्रु श्रवणे इत्यस्माद् भ्वादिगणस्थाद् धातोः लुङ्लकारे उत्तमपुरुषैकवचने सिप् प्रत्यये अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'श्रुवः शृ च' इत्यनेन श्रुवः शृ आदेशे श्नुप्रत्यये अनुबन्धलोपे च

अ+शृ+नु+मि इति जाते 'ऋवर्णान्नस्य णत्वं वाच्यम्' इत्यनेन नकारस्य णत्वे 'तस्थस्थामिपां तान्तन्तामः' इत्यनेन मिपः अमादेशे अ+शृ+णु+अम् इति जाते 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायाम् 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे अयादेशे संयोगे च अशृणवम् इति सिद्धम् ।

गच्छति—गम्लृ गतौ इत्यस्माद् भ्वादिगणस्थाद् धातोः लट् लकारे प्रथमपुरुषैकवचने सिपि अनुबन्धलोपे 'तिङ्शित्सार्वधातुकम्' इत्यनेन तिङः सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इत्यनेन शप् प्रत्यये अनुबन्धलोपे गम्+अ+ति इति जाते 'इषुगमियमां छः' इत्यनेन सर्वादेशे प्राप्ते 'अलोऽन्त्यस्य' इति नियमात् मकारस्य छकारादेशे गछ्+अ+ति इति जाते 'छे च' इत्यनेन तुकि अनुबन्धलोपे कित्वादन्त्यावयवे जाते ग+त्+छ+अ+ति इति जाते 'स्तोः श्चुनाश्चुः' इत्यनेन श्चुत्वे संयोगे च गच्छति इति सिद्धम् ।

जगाम—गम्लृ गतौ इत्यस्माद् भ्वादिगणस्थाद् धातोः लिट् लकारे प्रथमपुरुषैकवचने तिपि 'परस्मैपदानां णलतुसुस्.....' इत्यादिना तिपः णलादेशे अनुबन्धलोपे गम्+अ इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे गम्+गम्+अ इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन हलादिशेषे ग+गम्+अ इति जाते 'कुहोश्चुः' इत्यनेन कुत्वे आन्तर्तम्यात् गकारस्य जकारे 'अत उपधायाः' इत्यनेन उपधावृद्धौ संयोगे च जगाम इति सिद्धम् ।

जग्मतुः—गम्लृ गतौ इत्यस्माद्धातोः लिट्लकारे प्रथमपुरुषद्विवचने अतुस् प्रत्यये अनुबन्धलोपे द्वित्वत्वे हलादिशेषे ग+गम्+अतुस् इति जाते 'कुहोश्चुः' इत्यनेन गकारस्य जकारे ज+गम्+अतुस् इति जाते 'असंयोगाल्लिट् कित्' इत्यनेन अतुस् प्रत्ययस्य कित्वे 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्यनेन गमधातोरुपधाऽकारलोपे संयोगे च जग्मतुस् इति जाते सस्य रुत्वे विसर्गे च जग्मतुः इति सिद्धम् ।

जगमिथ, जगन्थ—गम्लृगतौ इत्यस्माद् धातोः लिट्लकारे मध्यमपुरुषैकवचने थलि प्रत्यये 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे गम्+गम्+थ इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्यासत्वे 'हलादिः शेषः' इत्यनेन हलादिशेषे ग+गम्+थ इति जाते 'कुहोश्चुः' इत्यनेन गकारस्य जकारे जगम+थ इति जाते 'ऋतो भारद्वाजस्य' इत्यनेन विकल्पेन इटि इट्पक्षे जगमिथ, इडभावपक्षे जगन्थ इति सिद्धम् ।

गमिष्यति—गम्लृ गतौ इत्यस्माद् भ्वादिगणस्थाद् धातोः 'लृट् शेषे च' इत्यनेन लृट् लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'स्यतासी लृलुटोः' इत्यनेन स्य प्रत्यये गम+स्य+ति इति जाते 'गमेरिट् परस्मैपदेषु' इत्यनेन इडागमे 'आदेशप्रत्यययोः' इत्यनेन षत्वे गमिष्यति इति सिद्धम्।

अगमत्—गम्लृगतौ इत्यस्माद् भ्वादिगणस्थाद् धातोः लुङ्लकारे प्रथमपुरुषैकवचने तिपि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'च्लिलुङि' इत्यनेन च्लौ च्लेः सिचि प्राप्ते 'पुषादिद्युतादिलृदितः परस्मैपदेषु' इत्यनेन च्लेः अङादेशे अनुबन्धलोपे अ+गम्+अ+ति इति जाते 'इतश्च' इत्यनेन तिप इकारलोपे संयोगे अगमत् इति सिद्धम्।

स्रप्ता, सर्प्ता—सृप्लृ गतौ इत्यस्माद् भ्वादिगणस्थाद् धातोः लुट् लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे सृप्+ति इति जाते 'लुटः प्रथमस्य डारौरसः' इत्यनेन तिपः डा आदेशे अनुबन्धलोपे 'स्यतासीलृलुटोः इत्यनेन तास् प्रत्यये अनुबन्धलोपे सृप्+त्+आ इति जाते 'अनुदात्तस्य चर्दुपधान्यतरस्याम्' इत्यनेन विकल्पेन अमागमे मित्त्वादन्त्याच: परे कृते सृ+अ+प्+त्+आ इति जाते 'इको यणचि' इत्यनेन यणादेशे संयोगे स्रप्ता अमागमाभावपक्षे 'पुगन्तलघूपधस्य च' इत्यनेन उपधागुणे 'सर्प्ता' इति सिद्धम्।

अक्ष्णोति—अक्षू व्याप्तौ इत्यस्माद् भ्वादिगणस्थाद् धातोः लट्लकारे प्रथमपुरुषैकवचने तिपि 'तिङ्शित्सार्वधातुकम्' इत्यनेन तिपः सार्वधातुकत्वे शपि प्राप्ते 'अक्षोऽन्यतरस्याम्' इत्यनेन विकल्पेन श्नु प्रत्यये अनुबन्धलोपे अक्ष्+नु+ति इति जाते 'सार्वधातुकार्धधातुकयोः इत्यनेन गुणे नकारस्य णत्वे 'अक्ष्णोति' इति सिद्धम्। पक्षे शपि अक्षति इति रूपं जायते।

तक्ष्णोति—तक्षू तनूकरणे इत्यस्माद् भ्वादिगणस्थाद् धातोः लट् लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे तक्ष+ति इति जाते 'तनूकरणे तक्षः' इत्यनेन विकल्पेन श्नुप्रत्यये अनुबन्धलोपे तक्ष्+नु+ति इति जाते नकारस्य णत्वे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे तक्ष्णोति इति सिद्धम्। श्नुप्रत्ययाऽभावे तक्षति इति जायते।

अशिक्षत्—शिष हिंसायाम् इत्यस्माद् भ्वादिगणस्थाद् धातोः लुङ्लकारे प्रथमपुरुषैकवचने तिपि 'लुङ्लङ्लङ्क्ष्वाडुदात्तः' इत्यनेन अडागमे अ+शिष्+तिप् इति जाते अनुबन्धलोपे 'इतश्च' इत्यनेन तिप इकारलोपे 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि प्राप्ते 'शल इगुपधादनिटः क्सः' इत्यनेन च्लेः

क्स आदेशे अनुबन्धलोपे आशिष्+स+त् इति जाते 'षढोः कः सि' इत्यने षकारस्य कत्वे 'आदेशप्रत्यययोः' इत्यनेन सस्य षत्वे संयोगे च अशिक्षत् इ सिद्धम् ।

रोषिता—रुष् हिंसायां इत्यस्माद् भ्वादिगणस्थाद् धातोः लुट्लकारे प्रथ पुरुषैकवचने तिपि अनुबन्धलोपे रुष्+ति इति जाते 'लुटः प्रथमस्य डारौरस इत्यनेन तिपः डादेशे अनुबन्धलोपे 'स्यतासी ल्लुटोः' इत्यनेन तास् प्रत्यये अ बन्धलोपे रुष्+त्+आ इति जाते 'आर्धधातुकं शेषः' इत्यनेन तासः आर्धधातु संज्ञायाम् 'तीषसहलुभरुषरिषः' इत्यनेन विकल्पेन इडागमे इट् पक्षे रुष्+इ+ त्+आ इति जाते 'पुगन्तलघूपधस्य च' इत्यनेन गुणे रोषिता इडभावपक्षे रोष्टा इति सिद्धम् ।

आनष्ठ, आनक्षिथ—अक्षू व्याप्तौ इत्यस्माद् भ्वादिगणस्थाद् धातोः लिट् लकारे मध्यकमपुरुषैकवचने सिपि 'परस्मैपदानां णलथुसुस्...' इत्यादिन सिपः थलादेशे अनुबन्धलोपे अक्ष+थ इति जाते 'लिटि धातोरनभ्यासस्य' इत्यने द्वित्वे अक्ष्+अक्ष्+थ इति जाते पूर्वोऽभ्यासः इत्यनेन पूर्वस्य अभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन आद्यचः शेषे अ+अक्ष्+थ इति जाते 'अत आदेः' इत्यनेन अभ्यास अकारस्य दीर्घे आ+अक्ष्+थ इति जाते 'तस्मान्नुड् द्विहलः' इत्यनेन नुडागमे अनुबन्धलोपे आ+न्+अक्ष+थ इति जाते 'स्वरतिसूतिसूयति इत्यादिना विकल्पेन इटि इडभावपक्षे 'स्कोः संयोगाद्योरन्ते च' इत्यनेन क्षवर्ति ककारस्य लोपे संयोगे आनष्+थ इति जाते 'ष्टुनाः ष्टुः' इत्यनेन ष्टुत्वे आनष्ठ इति सिद्धम् । इट्पक्षे आनक्षिथ इति जायते ।

अताक्षीत्, अतक्षीत्—तक्षू तनूकरणे इत्यस्माद् भ्वादिगणस्थाद् धातोः लुङ्लकारे अनुबन्धलोपे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ+तक्ष्+ति इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे अ+तक्ष+स्+ति इति जाते 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन विकल्पेन इडागमे 'अस्तिसिचोऽपृक्ते' इत्यनेन इडभावपक्षे अ+तक्ष्+स्+ई+ति इति जाते स्कोः संयोगाद्योरन्ते च' इत्यनेन तक्षधातुस्थककारस्य लोपे षकारस्य च 'षढोः कः सि' इत्यनेन ककारादेशे अ+तक्+स्+ई+ति इति जाते 'वदव्रजहलन्तस्याचः' इत्यनेनोपधावृद्धौ 'आदेशप्रत्यययोः' इत्यनेन सिचः सकारस्य षत्वे संयोगे 'इतश्च' इत्यनेन तिप इकारलोपे अताक्षीत् इति सिद्धम् । इट्पक्षे च अ+तक्ष्+इ+स्+

ई+ति इति जाते 'इट ईटि' इत्यनेन सिचो लोपे अतक्ष्+इ+ति इति जाते सवर्णदीर्घे तिपइकारलोपे संयोगे च अतक्षीत् इति सिद्धम् ।

मूर्वति—मुर्वी बन्धने इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे लट् लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे 'उपधायाञ्च' इत्यनेन उकारस्य दीर्घे मूर्वति इति सिद्धम् ।

अपोषीत्—पुष्पुष्टौ इत्यस्माद् भ्वादिगणस्थाद् धातोः लुङ् लकारे प्रथमपुरुषैकवचने तिपि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ+पुष्+ति इति जाते 'च्लिलुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन च्लेः सिचि अनुबन्धलोपे अ+पुष्+स्+ति इति जाते 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि अ+पुष्+इ+स्+ई+ति इति जाते 'इट ईटि' इत्यनेन सिचो लोपे 'पुगन्तलघूपधस्य च' इत्यनेनोपधा गुणे अ+पोष्+इ+ई+ति इति जाते सवर्णदीर्घे 'इतश्च' इत्यनेन तिप इकारलोपे संयोगे अपोषीत् इति सिद्धम् । अयं भौवादिकः पुष् धातुः उदात्तत्वात्सेट् अनिट्कारिकायामनुदात्तस्य पुष्यतेः दैवादिकस्यैव ग्रहणात् । तेनात्र इडागमो इति ।

॥ इति परस्मैपदप्रक्रिया ॥

अथात्मनेपदम्

एधते—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद्धातोः लट्लकारे अनुबन्धलोपे प्रथमपुरुषैकवचने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे त प्रत्यये एध+त इति जाते 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप्प्रत्यये अनुबन्धलोपे एध्+अ+त इति जाते 'टित आत्मनेपदानां टेरे' इत्यनेन तकारवर्ति अकारस्य एत्वे संयोगे च एधते इति सिद्धम् ।

एधेते—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः लट्लकारे अनुबन्धलोपे प्रथमपुरुषद्विवचने आताम् प्रत्यये एध+आताम् इति जाते 'तिङशित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इत्यनेन शप् प्रत्यये अनुबन्धलोपे एध+अ+आताम् इति जाते 'सार्वधातुकमपित्' इत्यनेन आताम् विभक्तेः ङित् सञ्ज्ञायाम् 'आतो ङितः' इत्यनेन आताम् प्रत्ययस्य टेः इय् आदेशे अनुबन्धलोपे एध्+अ+इते इति जाते संयोगे 'आद्गुणः' इत्यनेन गुणे एधेते इति सिद्धम् ।

एधन्ते—एध् वृद्धौ इत्यस्माद् धातोः लट्लकारे अनुबन्धलोपे प्रथमपुरुष-

बहुवचने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे झ प्रत्यये 'झोऽन्तः' इत्यनेन अन्तादेशे 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे एध+अ+अन्त इति जाते 'टित आत्मनेपदानां टेरे' इत्यनेन अन्ताकारस्य एत्वे एध्+अ+अन्ते इति जाते 'अतो गुणे' इत्यनेन पररूपे एधन्ते इति सिद्धम् ।

एधसे—एध वृद्धौ इत्यस्माद् धातोः लट्लकारे अनुबन्धलोपे मध्यमपुरुषैकवचने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे थास् प्रत्यये एध+थास् इति जाते 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे 'थासः से' इत्यनेन थास् प्रत्ययस्य से आदेशे एध्+अ+से जाते संयोगे एधसे इति सिद्धम् ।

एधध्वे—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः लट्लकारे अनुबन्धलोपे 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे मध्यमपुरुषबहुवचने ध्वम् प्रत्यये एध+ध्वम् इति जाते 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे एध+अ+ध्वम् इति जाते 'टित आत्मनेपदानां टेरे' इत्यनेन ध्वम् प्रत्ययस्य टेः एत्वे संयोगे च एधध्वे इति सिद्धम् ।

एधे—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः लट्लकारे अनुबन्धलोपे 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे उत्तमपुरुषैकवचने इट् प्रत्यये अनुबन्धलोपे 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे एध्+अ+इ इति जाते 'टित आत्मनेपदानां टेरे' इत्यनेन इटः एत्वे एध्+अ+ए इति जाते 'अतो गुणे' इत्यनेन पररूपे संयोगे च एधे इति सिद्धम् ।

एधावहे—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः लट्लकारे अनुबन्धलोपे 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे उत्तमपुरुषद्विवचने वहिङ् प्रत्यये 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधाकसंज्ञायाम् 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे एध+अ+वहिङ् इति जाते 'टित आत्मने पदानां टेरे' इत्यनेन वहिङ्प्रत्ययस्य टेः एत्वे एध्+अ+वहे इति जाते संयोगे एध+वहे इति जाते 'अतो दीर्घो यञि' इत्यनेन अकारस्य दीर्घादेशे एधावहे इति सिद्धम् ।

एधाञ्चक्रे—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे 'परोक्षे लिट्' इत्यनेन लिट् लकारे एध+लिट् इति जाते, 'इजादेश्च गुरुमतोऽनृच्छः' इत्यनेन आम् प्रत्यये एध+आम्+लिट् इति जाते 'आमः' इत्यनेन लिटो लुकि

'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिटपरककृञोऽनुप्रयोगे एध्+आम्+कृ+लिट् इति जाते 'आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य' इत्यनेन आत्मनेपदे लिटः स्थाने त प्रत्यये 'लिटस्तझयोरेशिरेच्' इत्यनेन त प्रत्ययस्य स्थाने एश् आदेशे अनुबन्धलोपे एधाम्+कृ+ए इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन कृञो द्वित्वे एधाम्+कृ+कृ+ए इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायाम् 'उरत्' इत्यनेन अभ्यासऋवर्णस्य अकारत्वे 'उरणरपरः' इत्यनेन रपरत्वे एधाम्+कर्+कृ+ए इति जाते 'हलादिः शेषः' इत्यनेन हलादिशेषे एधाम्+क+कृ+ए इति जाते 'कुहोश्चुः' इत्यनेन अभ्यासककारस्य चकारे जाते एधाम्+च+कृ+ए इति जाते 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकत्वे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे प्राप्ते 'असंयोगाल्लिट् कित्' इत्यनेन लिटः कित्त्वाद् गुणनिषेधे 'इको यणचि' इत्यनेन यणादेशे एधाम्+चक्रे इति जाते 'नश्चापदान्तस्य झलि' इत्यनेन मकारस्य अनुस्वारे 'अनुस्वारस्य ययि परसवर्णः' इत्यनेन परसवर्णे अकारे कृते एधाञ्चक्रे इति सिद्धम्।

एधाञ्चक्राते—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे 'परोक्षे लिट्' इत्यनेन लिट्लकारे एध्+लिट् इति जाते 'इजादेश्च गुरुमतोऽनृच्छः' इत्यनेन आम् प्रत्यये एध्+आम्+लिट् इति जाते 'आमः' इत्यनेन लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परककृञोऽनुप्रयोगे एधाम्+कृ+लिट् इति जाते 'आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य' इत्यनेन आत्मनेपदे लिटः स्थाने आताम् प्रत्यये 'टित आत्मनेपदानां टेरे' इत्यनेन आताम् प्रत्ययस्य टेः एत्वे एधाम्+कृ+आते इति जाते, 'लिटि धातोरनभ्यासस्य' इत्यनेन कृञो द्वित्वे एधाम्+कृ+कृ+आते इति जाते 'पूर्वोऽभ्यासः' इत्यनेन पूर्वस्य अभ्याससंज्ञायाम् 'उरत्' इत्यनेन अभ्यासऋकारस्य अकारे 'उरण रपरः' इत्यनेन रपरत्वे एधाम्+कर्+कृ+आते इति जाते 'हलादिः शेषः' इत्यनेन हलादिशेषे 'कुहोश्चुः' इत्यनेन ककारस्य चकारे एधाम्+च+कृ+आते इति जाते 'नश्चापदान्तस्य झलि' इत्यनेन मकारस्य अनुस्वारे 'अनुस्वारस्य ययि परसवर्णः' इत्यनेन परसवर्णे एधाञ्चकृ+आते इति जाते 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे प्राप्ते असंयोगाल्लिट्कित् इत्यनेन आताम् विभक्तेः कित्वे कित्वात् गुणनिषेधे 'इको यणचि' इत्यनेन यणादेशे एधाञ्चक्राते इति सिद्धम्।

एधाञ्चक्रुवे—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे

लिट् लकारे एध+लिट् इति जाते 'इजादेश्च गुरुमतोऽनृच्छः' इत्यनेन आम् प्रत्यये एध्+आम्+लिट् इति जाते 'आमः' इत्यनेन लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन कृञोऽनुप्रयोगे एधाम्+कृ+लिट् इति जाते 'आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य' इत्यनेन आत्मनेपदे मध्यमपुरुषैकवचने थास्प्रत्यये 'थासः से' इत्यनेन से आदेशे एधाम्+कृ+से इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन कृ इत्यस्य द्वित्वे एधाम् कृ+कृ+से इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायाम् 'उरत्' इत्यनेन अभ्यास ऋकारस्य अकारे 'उरणरपरः' इत्यनेन रपरत्वे एधाम्+कर्+कृ+से इति जाते 'हलादिः शेषः' इत्यनेन हलादिशेषे 'नश्चापदान्तस्य झलि' इत्यनेन मकारस्य अनुस्वारे 'अनुस्वारस्य ययि परसवर्णः' इत्यनेन परसवर्णे 'आदेशप्रत्यययोः' इत्यनेन से प्रत्ययस्थसकारस्य मूर्धन्यत्वे एधाञ्चकृषे इति सिद्धम्। अत्र 'असंयोगाल्लिट् कित्' इत्यनेन सेप्रत्ययस्य कित्वात् 'क्ङिति च' इति गुणनिषेधः।

एधाञ्चकृढ्वे—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे 'परोक्षे लिट्' इत्यनेन लिट्लकारे 'इजादेश्च गुरुमतोऽनृच्छः' इत्यनेन आम् प्रत्यये एध्+आम्+लिट् इति जाते 'आमः' इत्यनेन लिटो लोपे 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परककृञोऽनुप्रयोगे एध्+आम्+कृ+लिट् इति जाते 'आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य' इत्यनेन आत्मनेपदे मध्यमपुरुषबहुवचने ध्वम् प्रत्यये एध्+आम्+कृ+ध्वम् इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन कृ इत्यस्य द्वित्वे एधाम्+कृ+कृ+ध्वम् इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्यासत्वे 'उरत्' इत्यनेन अभ्यास ऋकारस्य अकारे 'उरणरपरः' इत्यनेन रपरत्वे एधाम्+कर्+कृ+ध्वम् इति जाते 'हलादिः शेषः' इत्यनेन हलादिशेषे एधाम्+क+कृ+ध्वम् इति जाते 'कुहोश्चुः' इत्यनेन ककारस्य चकारे 'नश्चापदान्तस्य झलि' इत्यनेन मकारस्य अनुस्वारे 'अनुस्वारस्य ययि परसवर्णः' इत्यनेन परसवर्णे एधाञ्चकृ+ध्वम् इति 'टित आत्मनेपदानां टेरे' इत्यनेन ध्वम् प्रत्ययस्य टेः एत्वे एधाञ्च कृ+ध्वे इति जाते 'इणः षीध्वं लुङ्लिटां धोऽङ्गात्' इत्यनेन धकारस्य ढकारे संयोगे एधाञ्चकृढ्वे इति सिद्धम्।

एधामास—एध वृद्धौ इत्यस्मात् धातोः लिट्लकारे प्रथमपुरुषैकवचने 'इजादेश्च गुरुमतोऽनृच्छः' इत्यनेन आम् प्रत्यये 'आम्' इत्यनेन 'लिटो लुकि' 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परकअस्धातोरनुप्रयोगे लस्य स्थाने तिपि तिपो णलि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन अस् इत्यस्य

द्वित्वे एध्+आम्+अस्+अस्+अ इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्यासत्वे 'हलादिः शेषः' इत्यनेन हलादिशेषे 'अतो गुणे' इत्यनेन पररूपे प्राप्ते 'अत आदेः' इत्यनेन अभ्यासस्य दीर्घादेशे एध्+आम्+अस्+अ इति जाते सवर्णदीर्घे संयोगे च एधामास इति सिद्धम् ।

एधाम्बभूव—एध वृद्धौ इत्यस्माद् धातोः लिट्लकारे लिट्परकभूधातोरनुप्रयोगे एध+आम्+भू+लिट् इति जाते इटो लोपे लस्य स्थाने भूधातोः परस्मैपदत्वात् प्रथमपुरुषैकवचने तिपि तिपः स्थाने णलादेशे अनुबन्धलोपे 'भुवोवुग्लुङ्लिटोः' इत्यनेन वुगागमे अनुबन्धलोपे भूवो द्वित्वे एध्+आम्+भूव+भूव+अ इति जाते अभ्यासत्वे हलादिशेषे अभ्यासस्य ह्रस्वत्वे 'भवतेरः' इत्यनेन अभ्यासस्य अकारत्वे भकारस्य चर्त्वेन बकारे संयोगे च एधाम्बभूव इति सिद्धम् ।

एधस्व—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः 'लोट् च' इत्यनेन लोट् लकारे अनुबन्धलोपे लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे मध्यमपुरुषैकवचने लस्यस्थाने थास् प्रत्यये एध्+थास् इति जाते 'थासः से' इत्यनेन थासः से आदेशे एध+से इति जाते 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे एध्+अ+से इति जाते 'आमेतः' इत्यनेन एकारस्यामादेशे प्राप्ते तं प्रबाध्य 'सवाभ्यां वामौ' इत्यनेन सेप्रत्ययस्थस्य एकारस्य व आदेशे एध्+अ+स्व इति जाते संयोगे एधस्व इति सिद्धम् ।

एधै—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे 'लोट् च' इत्यनेन लोट्लकारस्य अनुबन्धलोपे 'अनुदत्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे लस्य स्थाने उत्तमपुरुषैकवचने एध+इट् प्रत्यये 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे एध्+अ+इट् इति जाते 'टित आत्मनेपदानां टेरे' इत्यनेन इटः एत्वे एध+अ+ए इति जाते 'एत ऐ' इत्यनेन एकारस्य ऐकारादेशे एध्+अ+ऐ इति जाते 'आडुत्तमस्य पिच्च' इत्यनेन आडागमे अनुबन्धलोपे एध्+अ+आ+ऐ इति जाते 'अकःसवर्णे दीर्घः' इत्यनेन सवर्णदीर्घे एध्+आ+ऐ इति जाते 'आटश्च' इत्यनेन वृद्धौ संयोगे च एधै इति सिद्धम् ।

एधावहै—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः 'लोट् च' इत्यनेन लोट्लकारे अनुबन्धलोपे लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन

आत्मनेपदे उत्तमपुरुषद्विवचने वहिङ् प्रत्यये अनुबन्धलोपे एध+वहि इति जाते 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे एध्+अ+वहि इति जाते 'आडुत्तमस्य पिच्च' इत्यनेन आडागमे अनुबन्धलोपे एध्+अ+आ+वहि इति जाते 'अकः सवर्णे दीर्घः' इत्यनेन सवर्णदीर्घे 'टित आत्मनेपदानां टेरे' इत्यनेन वहि प्रत्ययस्य इकारस्य एकारे 'एत ऐ' इत्यनेन एकारस्य ऐकारादेशे एध्+आ+वहै इति जाते संयोगे एधावहै इति सिद्धम् ।

एधेत—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातो 'विधिनिमन्त्रणामन्त्रणा ·····' इत्यादिना विधिलिङि अनुबन्धलोपे एध+ल इति जाते लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे प्रथमपुरुषैकवचने त प्रत्यये एध+त इति जाते 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप् प्रत्यये अनुबन्धलोपे एध्+अ+त इति जाते 'लिङः सीयुट्' इत्यनेन सीयुटि अनुबन्धलोपे सुट् तथोः' इत्यनेन सुटि अनुबन्धलोपे एध्+अ+सीय+स्+त इति जाते 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन उभयोः सकारयोर्लोपे एध्+अ+ईय्+त इति जाते 'लोपो व्योर्वलि' इत्यनेन यकारस्य लोपे एध्+अ+ई+त इति जाते 'आद्गुणः' इत्यनेन अकार-ईकारयोः स्थाने गुणे संयोगे एधेत इति सिद्धम् ।

एधेरन्—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे विधिनिमन्त्रणामन्त्रणा·····' इत्यादिना विधिलिङ्लकारे अनुबन्धलोपे लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे प्रथमपुरुषबहुवचने झ प्रत्यये 'झस्य रन्' इत्यनेन झस्य रनादेशे एध्+रन् इति 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे एध्+अ+रन् इति जाते 'लिङः सीयुट्' इत्यनेन सीयुटि अनुबन्धलोपे एध्+सीय्+रन् इति जाते 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन सीयुटः सकारलोपे एध्+अ+ईय्+रन् इति जाते 'आद्गुणः' इत्यनेन अकारईकारयोः स्थाने एकारे गुणे 'लोपो व्योर्वलि' इत्यनेन यकारलोपे संयोगे च एधेरन् इति सिद्धम् ।

एधेय—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे 'विधिनिमन्त्रणामन्त्रणा·····' इत्यादिना विधिलिङि 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे उत्तमपुरुषैकवचने इट प्रत्यये अनुबन्धलोपे एध+इ इति जाते 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इत्यनेन

शपि अनुबन्धलोपे 'इटो अत्' इत्यनेन इट् प्रत्ययस्य अतादेशे अनुबन्धलोपे एध्+अ+अ इति जाते 'लिङः सीयुट्' इत्यनेन सीयुटि अनुबन्धलोपे 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन सीयुटः सकारलोपे एध्+अ+ईय्+अ इति जाते संयोगे एध+ईय इति जाते आद्गुणः इत्यनेन गुणे एधेय इति सिद्धम् ।

एधिषीष्ट—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः 'आशिषि लिङ्लोटौ' इत्यनेन आशिषि लिङि अनुबन्धलोपे 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे प्रथमपुरुषैकवचने त प्रत्यये एध्+त इति जाते 'लिङाशिषि' इत्यनेन तकारस्य आर्धधातुकसंज्ञायाम् 'लिङः सीयुट्' इत्यनेन सीयुडागमे 'सुट तिथोः' इत्यनेन सुडागमे एध+इ+सीय्+स+त इति जाते आर्धधातुकस्येड् बलादेः इत्यनेन इडागमे 'लोपो व्योर्वलि' इत्यनेन यकारस्य लोपे एध्+सी+स+त इति जाते 'आदेशप्रत्यययोः' इत्यनेन उभयोः सकारयोः षत्वे 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वे संयोगे च एधिषीष्ट इति सिद्धम् ।

एधिषीयास्ताम्—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः 'आशिषि लिङ्लोटौ' इत्यनेन आशिषि लिङि अनुबन्धलोपे 'अनुदात्तङित आत्मनेपदम्' इत्यनेन लस्य स्थाने आत्मनेपदे प्रथमपुरुषद्विवचने आताम् प्रत्यये एध+आताम् इति स्थिते 'लिङ सीयुट्' इत्यनेन सीयुटि अनुबन्धलोपे 'लिङाशिषि' इत्यनेन आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड्बलादेः' इत्यनेन इटि 'सुट्तिथोः' इत्यनेन आताम् प्रत्यये आकारात्पश्चात् तकारात्पूर्वं सुडागमे अनुबन्धलोपे एध्+इ+सीय+आ+स्+ताम् इति जाते 'आदेशप्रत्यययोः' इत्यनेन सीयुटः सकारस्य मूर्धन्यत्वे एधिषीय्+आ+स्+ताम् इति जाते संयोगे एधिषीयास्ताम् इति सिद्धम् ।

एधिष्ट—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे 'लुङ्' इत्यनेन लुङ्लकारे अनुबन्धलोपे लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे प्रथमपुरुषैकवचने त प्रत्यये एध+त इति जाते 'आडजादीनाम्' इत्यनेन आडागमे आ+एध्+त इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे आ+एध+स्+त इति जाते 'आटश्च' इत्यनेन वृद्धौ 'आर्धधातुकस्येड्बलादेः' इत्यनेन सिच इडागमे अनुबन्धलोपे एध+इ+स+त इति जाते 'आदेशप्रत्यययोः' इत्यनेन सिचः सकारस्य मूर्धन्यादेशे 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वे संयोगे च ऐधिष्ट इति सिद्धम् ।

एधिषत—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः 'लुङ्' इत्यनेन लुङ्-

लकारे अनुबन्धलोपे लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे प्रथमपुरुषबहुवचने झ प्रत्यये 'आत्मनेपदेष्वनतः' इत्यनेन झ प्रत्ययस्यादेः अत् आदेशे एध्+अत्+अ इति जाते 'आडजादीनाम्' इत्यनेन आडागमे 'आटश्च' इत्यनेन वृद्धौ 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे ऐध्+स+अत्+अ इति जाते 'आर्धधातुकं शेषः' इत्यनेन सिचः आर्धधातुकत्वे 'आर्धधातुकस्येड्बलादेः' इत्यनेन इडागमे अनुबन्धलोपे ऐध्+इ+स+अत्+अ इति जाते 'आदेशप्रत्यययोः' इत्यनेन सिचः सकारस्य मूर्धन्यत्वे 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वे संयोगे च ऐधिषत इति सिद्धम् ।

ऐधिढ्वम्—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः 'लुङ्' इत्यनेन लुङ्लकारे अनुबन्धलोपे लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे मध्यमपुरुषबहुचने ध्वम् प्रत्यये एध्+ध्वम् इति जाते 'आडजादीनाम्' इत्यनेन आडागमे अनुबन्धलोपे आ+एध्+ध्वम् इति जाते 'आटश्च' इत्यनेन वृद्धौ 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे ऐध्+स+ध्वम् 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्बलादेः' इत्यनेन इडागमे अनुबन्धलोपे ऐधि+स+ध्वम् इति जाते 'धि च' इत्यनेन सिचः सकारलोपे 'इणः षीध्वं लुङ्लिटां धोऽङ्गात्' इत्यनेन ध्वमो ढकारस्य ढत्वे संयोगे ऐधिढ्वम् इति सिद्धम् ।

एधिताहे—एध वृद्धौ इत्यस्माद् धातोः अनुबन्धलोपे 'अनद्यतने लुट्' इत्यनेन लुट्लकारे अनुबन्धलोपे लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे उत्तमपुरुषैकवचने इटि प्रत्यये एध्+इट् इति जाते 'स्यतासी लृलुटोः' इत्यनेन तास प्रत्यये एध्+तास्+इट् इति जाते 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकत्वे 'आर्धधातुकस्येड्बलादेः' इत्यनेन इडागमे अनुबन्धलोपे एध्+इ+तास्+इ इति जाते 'टित आत्मनेपदानां टेरे' इत्यनेन इकारस्य एत्वे एध्+इ+तास्+ए इति जाते 'ह एति' इत्यनेन तासः सकारस्य हकारादेशे संयोगे च एधिताहे इति सिद्धम् ।

एधिष्यामहे—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः 'लृट्शेषे च' इत्यनेन लृट्लकारे अनुबन्धलोपे लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे उत्तमपुरुषबहुवचने महिङ्प्रत्यये अनुबन्धलोपे एध्+महि इति जाते 'स्यतासी लृलुटोः' इत्यनेन स्य प्रत्यये एध+स्य+महि इति जाते 'टित आत्मनेपदानां टेरे' इत्यनेन महि प्रत्ययस्य इकारस्य एकारे 'आर्धधातुकं शेषः'

इत्यनेन स्य प्रत्ययस्य आर्तधातुकत्वे 'आर्धधातुस्येड्बलादेः' इत्यनेन इडागमे अनुबन्धलोपे एध्+इ+स्य+महे इति जाते 'आदेशप्रत्यययोः' इत्यनेन स्य-सकारस्य मूर्धन्यादेशे 'अतो दीर्घो यञि' इत्यनेन स्य प्रत्ययस्थ अकारस्य दीर्घे संयोगे च एधिष्यामहे इति सिद्धम् ।

ऐधिष्यत—एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः 'लिङ्निमित्ते लृङ्-क्रियातिपत्तौ' इत्यनेन लृङ्लकारे अनुबन्धलोपे 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे प्रथमपुरुषैकवचने लस्य स्थाने त प्रत्यये 'आडजादीनाम्' इत्यनेन आडागमे अनुबन्धलोपे 'आटश्च' इत्यनेन वृद्धौ ऐध्+त इति जाते 'स्यतासी लृलुटोः' इत्यनेन स्यप्रत्यये अनुबन्धलोपे 'आर्द्धधातुकं शेषः' इत्यनेन स्य प्रत्ययस्य आर्द्धधातुकसंज्ञायां 'आर्धधातुकस्येड्बलादेः' इत्यनेन इडागमे ऐध्+इ+स्य+त इति जाते 'आदेशप्रत्यययोः' इत्यनेन सकारस्य मूर्धन्यादेशे संयोगे च ऐधिष्यत इति सिद्धम् ।

कामयते—कमु कान्तौ इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे 'कमेर्णिङ्' इत्यनेन णिङ् प्रत्यये अनुबन्धलोपे 'अत उपधायाः' इत्यनेनोपधा-वृद्धौ कामि इति जाते 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लट्लकारे 'लः कर्मणि च भावे चाकर्मकेभ्यः' इत्यनेन कर्त्रर्थे 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे प्रथमपुरुषैकवचने त प्रत्यये कामि+त इति जाते 'तिङ्शित्सार्वधातुकम्' इत्यनेन त प्रत्ययस्य सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे कामि+अ+त इति जाते 'सार्वधातुकार्धधातुकयोः' इत्यनेन इकारस्य गुणे कामे+अ+त इति जाते 'एचोऽयवायावः' इत्यनेन अयादेशे कामय्+अ+त इति जाते 'टित आत्मनेपदानां टेरे' इत्यनेन तकारस्य अकारस्य एत्वे संयोगे च कामयते इति सिद्धम् ।

कामयाञ्चक्रे—कमु कान्तौ इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे 'कमेर्णिङ्' इत्यनेन नित्ये णिङ् प्रत्यये प्राप्ते 'आयादय आर्धधातुके वा' इत्यनेन वैकल्पिके अनुबन्धलोपे 'अत उपाधायाः' इत्यनेनोपधावृद्धौ कामि इत्यस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायाम् 'परोक्षे लिट्' इत्यनेन लिट् लकारे 'कास्यनेकाचाम् वक्तव्यः' इति सहयोगेन 'कासप्रत्ययादामन्त्रे लिटि' इत्यनेन आम् प्रत्यये कामि+आम्+लिट् इति जाते 'आमः' इत्यनेन लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परक कृधातोरनुप्रयोगे कामि+आम्+कृ+लिट् इति जाते 'णेरनिटि' इत्यनेन णिङो लोपे प्राप्ते 'अयामन्ताल्वा-

ण्येत्विष्णुषु' इत्यनेन णिङ इकारस्य अयादेशे कामय+आम+कृ+लिट् इति जाते लिटोऽनुबन्धलोपे 'आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य' इत्यनेन आत्मनेपदे लस्य स्थाने प्रथमपुरुषैकवचने तप्रत्यये 'लिटस्तझयोरेशिरेच्' इत्यनेन तस्य स्थाने एश् आदेशे कामयाम्+कृ+ए इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन कृ इत्यस्य द्वित्वे कामयाम्+कृ+कृ+ए इति जाते 'पूर्वोऽभ्यासः' इत्यनेन पूर्वस्य अभ्यासत्वे 'उरत्' इत्यनेन अभ्यास ऋकारस्य अत्वे रपरत्वे च कामयाम् कर+कृ+ए इति जाते 'हलादिः शेषः' इत्यनेन हलादिशेषे 'कुहोश्चुः' इत्यनेन ककारस्य चकारे कामयाम्+च+कृ+ए इति जाते 'इको यणचि' इत्यनेन ऋकारस्य यणादेशे मकारस्य 'नश्चापदान्तस्य झलि' इत्यनेन मकारस्य अनुस्वारे 'अनुस्वारस्य ययि परसवर्णः' इत्यनेन परसवर्णे कामयाञ्चक्रे इति सिद्धम्। णिङ प्रत्ययाऽभावपक्षे कम्+लिट् इत्यत्र अनुबन्धलोपे प्रथमपुरुषैकवचने त प्रत्यये तस्य एशादेशे अनुबन्धलोपे द्वित्वे अभ्यासत्वे क+कम्+ए इति जाते 'कुहोश्चुः' इत्यनेन ककारस्य चकारे संयोगे चकमे इति साधुः।

अचीकमत—कमुकान्तौ इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे 'कमेर्णिङ्' इत्यनेन नित्ये णिङ् प्रत्यये प्राप्ते 'आयादय आर्धधातुके वा' इत्यनेन विकल्पेन 'णिङ्' प्रत्यये अनुबन्धलोपे 'अत उपाधायाः' इत्यनेन उपधा वृद्धौ कामि इत्यस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायाम् 'लुङ' इत्यनेन लुङ्लकारे अनुबन्धलोपे णिङो ङित्वात् 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे प्रथमपुरुषैकवचने त प्रत्यये 'च्लि लुङि' इत्यनेन च्लौ च्लेः सिचि प्राप्ते 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यनेन च्लेः चङादेशे अनुबन्धलोपे 'लुङलङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ+कामि+अ+त इति जाते 'णेरनिटि' इत्यनेन णिलोपे 'णौ चङ्युपधाया ह्रस्वः' इत्यनेन उपधाह्रस्वत्वे अ+कम्+अ+त इति जाते 'चङि' इत्यनेन द्वित्वे अ+कम्+कम्+अ+त इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायाम् 'हलादिः शेषः' इत्यनेन हलादिशेषे 'कुहोश्चुः' इत्यनेन अभ्यासककारस्य चकारे अ+च+कम्+त इति जाते 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इत्यनेन सन्वद्भावे 'सन्यतः' इत्यनेन अभ्यासस्य इत्वे 'दीर्घो लघोः' इत्यनेन अभ्यासेकारस्य दीर्घे संयोगे च अचीकमत इति सिद्धम्। णिङभावपक्षे—कमु धातोः अनुबन्धलोपे लुङ्लकारे प्रथमपुरुषैकवचने त प्रत्यये अडागमे अनुबन्धलोपे अ+कम्+त इति जाते च्लौ च्लेः सिचि प्राप्ते 'कमेश्च्लेश्चङ् वाच्यः' इत्यनेन च्लेः चङादेशे अनुबन्धलोपे अ+

कम्+अ+त इति जाते 'चङि' इत्यनेन द्वित्वे अभ्यासकार्ये हलादिशेषे 'कुहोश्चुः' इत्यनेन अभ्यासककारस्य चकारे अ+च+कम्+अ+त इति जाते संयोगे च अचकमत इति रूपं सिद्धम् ।

अकामयिष्यत—कमु कान्तौ इत्यस्माद् धातोः 'कमेर्णिङ्' इत्यनेन णिङ् प्रत्यये अनुबन्धलोपे 'अत उपधायाः' इत्यनेन उपधावृद्धौ कामि इत्यस्य 'सनाद्यन्ता धातवः' इत्यनेन धातु संज्ञायाम् 'लिङ्निमित्ते लृङ्क्रियातिपत्तौ' इत्यनेन लृङ् लकारे अनुबन्धलोपे लस्य स्थाने कमेर्ङित्वात् 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे प्रथमपुरुषैकवचने तप्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ+कामि+त इति जाते 'स्यतासी लृलुटो' इत्यनेन स्य प्रत्यये अनुबन्धलोपे 'आर्धधातुकं शेषः' इत्यनेन स्यप्रत्ययस्यार्धधातुकत्वे 'आर्द्धधातुकस्येड् वलादेः' इत्यनेन इडागमे अनुबन्धलोपे अ+कामि+इ+स्य+त इति जाते 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे अ+कामे+इ+स्य+त इति जाते 'एचोऽयवायावः' इत्यनेन आयादेशे 'आदेशप्रत्यययोः' इत्यनेन सस्य षत्वे संयोगे च अकामयिष्यत इति सिद्धम् ।

अद्युतत्—द्युत दीप्तौ इत्यस्माद् भ्वादिगणस्थाद् धातोः 'लुङ्' इत्यनेन लुङ्लकारे अनुबन्धलोपे 'द्युद्भ्यो लुङि' इत्यनेन लुङ परस्मैपदसंज्ञायाम् लस्य स्थाने प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ+द्युत्+ति इति जाते 'च्लिलुङि' इत्यनेन च्लौ च्लेः सिचि प्राप्ते 'पुषादिद्युतादिलृदितः परस्मैपदेषु' इत्यनेन च्लेरङि अनुबन्धलोपे अ+द्युत्+अ+ति इति जाते 'इतश्च' इत्यनेन तिप इकारलोपे संयोगे च अद्युतत् इति सिद्धम् ।

अद्योतिष्ट—द्युत दीप्तौ इत्यस्माद् धातोः लुङ्लकारे परस्मैपदाभावपक्षे अ+द्युत्+त इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे अ+द्युत्+ए+त इति जाते 'आर्धधातुकं शेषः' इत्यनेन सिच आर्धधातुकत्वे आर्धधातुकस्येड्वलादेः' इत्यनेन इटि, अ+द्युत्+इ+स+त इति जाते 'पुगन्तलघूपधस्य च' इत्यनेन उपधागुणे 'आदेशप्रत्यययोः' इत्यनेन सिचः षत्वे 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वे संयोगे च अद्योतिष्ट इति सिद्धम् ।

चक्षम्वहे, चक्षमिवहे—क्षमूष् सहने इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे 'परोक्षे लिट्' इत्यनेन लिट् लकारे अनुबन्धलोपे लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे उत्तमपुरुष द्विवचने क्षम+वहि इति

जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे क्षम+क्षम+वहि इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससञ्ज्ञायाम् 'हलादिः शेषः' इत्यनेन हलादिशेषे क+क्षम+वहि इति जाते 'कुहोश्चुः' इत्यनेन ककारस्य चकारे च+क्षम्+वहि इति जाते 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन विकल्पे इटि इडभावपक्षे 'म्वोश्च' इत्यनेन मकारस्य नकारे 'रषाभ्यां नो णः समानपदे' इत्यनेन नकारस्य णत्वे च 'टित आत्मनेपदानां टेरे' इत्यनेन वहिप्रत्ययस्य टेरेत्वे संयोगे चक्षण्वहे। इट्पक्षे तु चक्षमिवहे इति सिद्धम्।

विद्युते—द्युत दीप्तौ इत्यस्माद् धातोः 'परोक्षे लिट्' इत्यनेन लिट् लकारे अनुबन्धलोपे लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे प्रथमपुरुषैकवचने त प्रत्यये 'लिटस्तझयोरेशिरेच्' इत्यनेन तस्य एश् आदेशे 'अनुबन्धलोपे द्युत्+ए इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे द्युत+द्युत+ए इति जाते 'पूर्वोऽभ्यासः इत्यनेन अभ्याससंज्ञायाम् 'द्युति स्वाप्योः सम्प्रसारणम्' इत्यनेन अभ्यासयकारस्य सम्प्रसारणे दि+उ+त्+द्युत+ए इति जाते 'सम्प्रसारणाच्च' इत्यनेन पूर्वरूपे च दित्+द्युत्+ए इति जाते 'हलादिः शेषः' इत्यनेन हलादिशेषे दि+द्युत्+ए इति जाते संयोगे च दिद्युते इति सिद्धम्।

कूर्दते—कुर्द क्रीडायाम् इत्यस्माद् भ्वादिगणस्थाद् धातोः लट् लकारे प्रथमपुरुषैकवचने त प्रत्यये 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायाम् 'कर्तरि शप् इत्यनेन शपि अनुबन्धलोपे कुर्द+अ+त इति जाते 'उपधायाञ्च' इत्यनेन उपधा उकारस्य दीर्घत्वे कूर्द ते इति सिद्धम्।

प्रश्नः—ननु ऊह वितर्के इत्यस्माद्धातोः अयगतौ इत्यास्माद्धातोश्चानयोरनुदात्तेत्तत्वात् 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदत्वात् 'अनुक्तमप्यूहति पण्डितो जनः' 'उदयति यदि भानुः पश्चिमेदिग्विभागे' इत्यभियुक्तोक्तिः कथं सिद्ध भवेत्?

उत्तरम्—चक्षिङ् व्यक्तायां वाचि इत्यस्यानुदात्तत्वादेवात्मनेपदे सिद्धे यदयङित करोति तद्व्यर्थं सञ्ज्ञापयति यत् 'अनुदात्तेत्व लक्षणमात्मनेपदमनित्यम्' तेनेयमभियुक्तोक्तिः सिद्धा जायते।

पलायते—परा उपसर्गात् अयगतौ इत्यस्माद् भ्वादिगणस्थाद् धातोः लट् लकारे आत्मनेपदे प्रथमपुरुषैकवचने त प्रत्यये 'उपसर्गस्यायतौ' इत्यनेन रकारस्य लकारे पलाय्+त इति जाते 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुक संज्ञा

याम् 'कर्तरि शप्' इत्यनेन शप् प्रत्यये अनुबन्धलोपे पलाय् + अ + त इति जाते 'टित आत्मनेपदानां टेरे' इत्यनेन तकारस्य टेरेत्वे संयोगे च पलायते इति सिद्धम् ।

ववृते—वृतु वर्तने इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे 'परोक्षे लिट्' इत्यनेन लिट् लकारे अनुबन्धलोपे लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे प्रथमपुरुषैकवचने तप्रत्यये 'लिटस्तझयोरेशिरेच्' इत्यनेन तकारस्य एशादेशे अनुबन्धलोपे वृत् + ए इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे वृत् + वृत् + ए इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायाम् हलादिशेषे वृ + वृत् + ए इति जाते 'उरत्' इत्यनेन ऋकारस्य अकारादेशे रपरत्वे पुनः हलादिशेषे संयोगे च ववृते इति जाते अत्र 'लिट् च' इत्यनेन लिट आर्धधातुकत्वात् 'पुगन्तलघूपधस्य च' इत्यनेनोपधागुणे प्राप्ते 'ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन' इत्यनेन लिटः कित्त्वात् 'क्ङिति च' इत्यनेन गुणनिषेधे ववृते इति सिद्धम् ।

वर्त्स्यति—वृतु वर्तने इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे 'लृट् शेषे च' इत्यनेन लृट् लकारे अनुबन्धलोपे लस्य स्थाने 'वृद्भ्यः स्यसनोः' इत्यनेन विकल्पेन परस्मैपदे प्रथमपुरुषैकवचने तिपि वृत् + स्य + ति इति जाते 'आर्धधातुकं शेषः' इत्यनेन स्यप्रत्ययस्यार्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इत्यनेन इडागमे प्राप्ते 'न वृद्भ्यश्चतुर्भ्यः' इत्यनेन परस्मैपदे इण्निषेधे 'पुगन्तलघूपधस्य च' इत्यनेनोपधागुणे वर्त्स्यति इति सिद्धम् ।

वर्तिष्यते—वृतु वर्तने इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे लृट् लकारे परस्मैपदाभावे अनुदात्तत्वात् आत्मनेपदे प्रथमपुरुषैकवचने तप्रत्यये 'स्यतासी ललुटोः' इत्यनेन स्य प्रत्यये वृत् + स्य + त इति जाते 'टित आत्मनेपदानां टेरे' इत्यनेन तकारस्य टेरेत्वे वृत् + स्य + ते इति जाते 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इत्यनेन इडागमे वृत् + इ + स्य + ते इति जाते 'पुगन्तलघूपधस्य च' इत्यनेन गुणे 'आदेशप्रत्यययोः' इत्यनेन सस्य षत्वे वर्तिष्यते इति सिद्धम् ।

अनुष्यन्दते जलम्—अनुपूर्वात् स्यन्दू प्रस्रवणे इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे 'वर्तमाने लट्' इत्यनेन लट्लकारे अनुबन्धलोपे लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे प्रथमपुरुषैकवचने तप्रत्यये अनुस्यन्द् + त इति जाते 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायाम्

'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे अनुस्यन्द्+अ+त इति जाते 'टित आत्मनेपदानां टेरे' इत्यनेन तकारस्य टेरेत्वे संयोगे च अनुस्यन्दते इति जाते 'अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु' इत्यनेन सस्य विकल्पेन षत्वे अनुष्यन्दते इति सिद्धम्। पक्षे—अनुस्यन्दते इति जायते।

कल्प्स्यति—कृपू सामर्थ्ये इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे लृट्लकारे 'लुटि च क्लृप्' इत्यनेन विकल्पे परस्मैपदे लुटः प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'स्यतासी लृलुटोः' इत्यनेन स्य प्रत्यये कृप्+स्य+ति इति जाते 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायाम् 'पुगन्तलघूपधस्य च' इत्यनेन उपधागुणे कर्प्+स्य+ति इति जाते 'कृपो रो लः' इत्यनेन रकारस्य लकारे 'आर्धधातुकस्येड् वलादेः' इत्यनेन इटि प्राप्ते 'तासि च क्लृपः' इत्यनेन इण्निषेधे कल्प्स्यति इति सिद्धम्। परस्मैपदाऽभावे 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे प्रथमपुरुषैकवचने त प्रत्यये कृप्+स्य+त इति जाते 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन विकल्पेन इडागमे अनुबन्धलोपे पुगन्तलघूपधस्य च' इत्यनेन गुणे कर्प्+इ+स्य+त इति जाते 'कृपो रो लः' इत्यनेन रकारस्य लकारे 'आदेशप्रत्यययोः' इत्यनेन सकारस्य षत्वे 'टित आत्मनेपदानां टेरे' इत्यनेन तकारस्य टेरेत्वे कल्पिष्यते इति सिद्धम्। इडभावपक्षे कल्प्स्यते इति जायते।

प्रश्नः—'लिङ्सिचावात्मनेपदेषु' अस्य सूत्रस्यार्थो लेख्यः।

उत्तरम्—इक् समीपादिति, झलादीति किदिति चानुवर्तते ततश्चायमर्थः—इक्समीपाद्धलः परो झलादी लिङ् आत्मनेपदपरः सिच्चेत्येतौ कितौ भवतः। उदाहरणानि—क्लृप्सीष्ट, अक्लृपत्, अकल्पिष्ट, अक्लृप्त।

कल्पिषीष्ट—कृपू सामर्थ्ये इत्यस्माद् धातोः अनुबन्धलोपे 'आशिषि लिङ्लोटौ' इत्यनेन आशिषि लिङि अनुबन्धलोपे लस्य स्थाने 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे प्रथमपुरुषैकवचने त प्रत्यये कृप+त इति जाते 'लिङः सीयुट्' इत्यनेन सीयुटि अनुबन्धलोपे 'सुट् तिथोः' इत्यनेन सुटि अनुबन्धलोपे कृप्+सीय्+स्+त इति जाते 'लिङाशिषि' इत्यनेन आर्धधातुकसंज्ञायाम् 'पुगन्तलघूपधस्य च' इत्यनेन उपधागुणे 'कृपो रो लः' इत्यनेन रकारस्य लकारे कल्प्+सीय्+स्+त इति जाते 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन विकल्पेन इडागमे कल्प+इ+सीय्+स+त इति जाते 'आदेशप्रत्यययोः' इत्यनेन उभयोः सकारयोः षत्वे 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वे 'लोपो व्योर्वलि' इत्यनेन

यकारलोपे संयोगे 'कल्पिषीष्ट' इति सिद्धम्। इडभावपक्षे तु क्लृप्+सीय्+स्+त इति जाते 'लोपो व्योर्वलि' इत्यनेन यलोपे 'आदेशप्रत्यययोः' इत्यनेन सस्य षत्वे 'लिङ्सिचावात्मनेपदेषु' इत्यनेन कित्त्वे 'क्ङिति च' इत्यनेन गुणनिषेधे क्लृप्सीष्ट इति सिद्धम्।

अचीकमत—कमु कान्तौ इत्यस्मात् भ्वादिगणस्थाद् धातोः 'कमेर्णिङ्' इत्यनेन स्वार्थे णिङ् प्रत्यये अनुबन्धलोपे कम्+इ इति जाते 'अत उपधायाः' इत्यनेन उपधावृद्धौ कामि इत्यस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायाम् 'लुङ्' इत्यनेन लुङ्लकारे अनुबन्धलोपे लः स्थाने प्रथमपुरुषैकवचने त आदेशे 'च्लि लुङि' इत्यनेन च्लौ 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यनेन च्लेः चङि अनुबन्धलोपे कम्+इ+अ+त इति जाते 'णेरनिटि' इत्यनेन णेर्लोपे काम्+अ+त इति जाते 'णौ चङ्युपधाया ह्रस्वः' इत्यनेन प्रत्ययलक्षणत्वेन णेश्चङ् परत्वादुपधाया ह्रस्वत्वे कम्+अ+त इति जाते 'चङि' इत्यनेन कम् इत्यस्य द्वित्वे कम्+कम्+अ+ति इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्यासंज्ञायां 'हलादिः शेषः' इत्यनेन हलादिशेषे क+कम्+अ+त इति जाते 'कुहोश्चुः' इत्यनेन अभ्यासककारस्य चकारे कृते च+कम्+अ+त इति जाते 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इत्यनेन सन्वद्भावे 'सन्यतः' इत्यनेन अभ्यासस्याकारस्य इत्वे चि+कम्+अ+त इति जाते 'दीर्घो लघोः' इत्यनेन अभ्यास इकारस्य दीर्घे कृते 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे टित्वादाद्यावयवे जाते संयोगे कृते अचीकमत इति सिद्धम्। पक्षे 'आयादय आर्धधातुके वा' इत्यनेन णिङ्भावपक्षे 'कमेश्च्लेश्चङ्वाच्यः' इत्यनेन चङि अचकमत इत्यपि भवति।

अद्युतत्—द्युत दीप्तौ इत्यस्माद् भ्वादिगणस्थाद् धातोः 'लुङ्' इत्यनेन लुङ्लकारे अनुबन्धलोपे लस्य स्थाने 'द्युद्भ्यो लुङि' इत्यनेन विकल्पेन परस्मैपदसंज्ञायाम् प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन च्ले सिचि प्राप्ते 'पुषादिद्युताद्यलृदितः परस्मैपदेषु' इत्यनेन च्लेरङादेशे अनुबन्धलोपे अ+द्युत्+अ+ति इति जाते लुङः आर्धधातुकत्वात् 'पुगन्तलघूपधस्य च' इत्यनेन उपधागुणे प्राप्ते अङ्प्रत्ययस्य ङित्वात् 'क्ङिति च' इत्यनेन गुणनिषेधे 'इतश्च' इत्यनेन तिप इकारलोपे संयोगे च अद्युतत् इति सिद्धम्। पक्षे—अद्योतिष्ट इति भवति।

अद्योतिष्ट—द्युत दीप्तौ इत्यस्माद् भ्वादिगणस्थाद् धातोः 'लुङ्' इत्यनेन

लुङ्लकारे अनुबन्धलोपे लस्य स्थाने 'द्युद्भ्यो लुङि' इत्यनेन विकल्पेन लस्य स्थाने प्रथमपुरुषैकवचने त प्रत्यये द्युत्+त इति जाते 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ+द्युत्+त इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे अ+द्युत्+त इति जाते 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इत्यनेन इडागमे अनुबन्धलोपे 'आदेशप्रत्यययोः' इत्यनेन सिचः सकारस्य मूर्धन्यषकारे 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वे संयोगे च अद्योतिष्ट इति सिद्धम् ।

ववृते—वृतु वर्तने इत्यस्माद् भ्वादिगणस्थाद् धातोः लिट् लकारे आत्मनेपदे प्रथमपुरुषैकवचने त प्रत्यये द्वित्वे अभ्यासत्वे वृत्+वृत्+त इति जाते 'उरत्' इत्यनेन ऋकारस्य अकारे रपरत्वे हलादिशेषे उपधागुणे प्राप्ते 'ऋदुपधेभ्यो लिटः कित्त्वं गुणात् पूर्वप्रतिषेधेन' इत्यनेन वार्तिकेन लिटः कित्त्वाद् गुणनिषेधे 'लिटस्तझयोरेशिरेच्' इत्यनेन तप्रत्ययस्य एशादेशे अनुबन्धलोपे संयोगे च ववृते इति सिद्धम् ।

क्लृप्सीष्ट—कृपू सामर्थ्ये इत्यस्माद् भ्वादिगणस्थाद् धातोः लट्लकारे आत्मनेपदे आशिषि लिङ्लकारे प्रथमपुरुषैकवचने क्लृप्+त इति जाते 'लिङः सीयुट्' इत्यनेन सीयुडागमे 'सुट् तिथोः' इत्यनेन सुडागमे च क्लृप्+सीय्+स्+त इति जाते 'स्वरतिसूतिसूयति·····' इत्यादिना विकल्पेन इडागमे इडभावे 'पुगन्त·····' इत्यादिना गुणे प्राप्ते 'लिङ्सिचावात्मनेपदेषु' इत्यनेन लिङः कित्त्वं 'किङति च' इत्यनेन गुणनिषेधे ष्टुत्वे 'लोपो व्योर्वलि' इत्यनेन यकारलोपे संयोगे क्लृप्सीष्ट इति सिद्धम् । इडागमपक्षे च क्लृप्+इ+सी+स्+त इति स्थिते 'पुगन्त·····' इत्यादिना गुणे 'कृपो रो लः' इत्यनेन लत्वे 'आदेशप्रत्यययोः' इत्यनेन उभयोः सकारयोः षत्वे संयोगे च कल्पिषीष्ट इति सिद्धम् ।

त्रेपे—त्रपूष् लज्जायाम् इत्यस्माद् भ्वादिगणस्थाद् धातोः लिट्लकारे प्रथमपुरुषैकवचने त प्रत्यये अनुबन्धलोपे त्रप्+त इति जाते 'लिटस्तझयोरेशिरेच्' इत्यनेन तप्रत्ययस्य एशादेशे अनुबन्धलोपे द्वित्वे त्रप्+त्रप्+ए इति जाते 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायाम् 'हलादिः शेषः' इत्यनेन हलादिशेषे 'तृफलभजत्रपश्च' इत्यनेन एत्वाभ्यासलोपयोः संयोगे त्रेपे इति सिद्धम् ।

अशिश्रियत्—श्रिञ् सेवायाम् इत्यस्माद् भ्वादिगणस्थाद् धातोः लुङ्लकारे प्रथमपुरुषैकवचने तिपि 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि प्राप्ते 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यनेन च्लेः चङि अनुबन्धलोपे 'चङि' इत्य-

नेन द्वित्वे अभ्यासत्वे अभ्यासकार्ये च शि+श्रि+अ+ति इति जाते 'इतश्च' इत्यनेन तिप इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति इयङादेशे अनुबन्धलोपे संयोगे च अशिश्रियत् इति सिद्धम् ।

वर्त्स्यति—वृतु वर्तने इत्यस्माद् भ्वादिगणस्थाद् धातोः लृट्लकारे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे 'स्यतासी ललुटोः' इत्यनेन स्यप्रत्यये वृत्+स्य+ति इति जाते 'आर्धधातुकं शेषः' इत्यनेन स्यप्रत्ययस्य आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इत्यादिना गुणे प्राप्ते 'न वृद्भ्यश्चतुर्भ्यः' इत्यनेन इट्-निषेधे 'पुगन्तलघूपधस्य च' इत्यादिना गुणे रपरत्वे संयोगे च वर्त्स्यति इति सिद्धम् ।

भ्रियात्—भृञ् भरणे इत्यस्माद् भ्वादिगणस्थाद् धातोः आशिषि लिङ् लकारे परस्मैपदे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे भ्रि+ति इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे 'सुट् तिथोः' इत्यनेन सुटि उभयोः अनुबन्धलोपे भ्रि+यास्+स्+ति इति जाते 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन उभयोः सकारयोर्लोपे 'इतश्च' इत्यनेन तिप इकारलोपे भृ+या+त् इति जाते यासुटः कित्त्वाद् गुणनिषेधे 'रिङ्शयग्लिङ्क्षु' इत्यनेन ऋतः रिङादेशे अनुबन्धलोपे भ्+रि+या+त् इति जाते संयोगे भ्रियात् इति सिद्धम् ।

जहार—हृञ् हरणे इत्यस्माद् भ्वादिगणस्थाद् धातोः लिट्लकारे परस्मैपदे प्रथमपुरुषैकवचने तिपि तिपः 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन णलादेशे अनुबन्धलोपे हृ+अ इति जाते द्वित्वे अभ्यासत्वे हृ+हृ+अ इति जाते 'उरत्' इत्यनेन अभ्यास-ऋकारस्य अकारे रपरत्वे हलादिशेषे ह+हृ+अ इति जाते 'कुहोश्चुः' इत्यनेन रकारस्य आन्तर्तम्यात् झकारे 'अभ्यासे चर्च' इत्यनेन चर्त्वेन जकारे ज+हृ+अ इति जाते 'अचो ञ्णिति' इत्यनेन वृद्धौ रपरत्वे सयोगे च जहार इति सिद्धम् ।

भ्राजे—टुभ्राजृ दीप्तौ इत्यस्माद् भ्वादिगणस्थाद् धातोः अनुबन्धलोपे लिट्-लकारे प्रथमपुरुषैकवचने तप्रत्यये तस्य 'लिटस्तझयोरेशिरेच्' इत्यनेन एशादेशे अनुबन्धलोपे भ्राज्+ए इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे भ्राज्+भ्राज्+ए इति जाते पूर्वोऽभ्यासः इत्यनेन अभ्यासत्वे 'हलादिः शेषः' इत्यनेन हलादिशेषे भ्रा+भ्राज्+ए इति जाते 'ह्रस्वः' इत्यनेन ह्रस्वत्वे भ्र+भ्राज्

+ए इति जाते 'फणाञ्च सप्तानाम्' इत्यनेन अभ्यासलोपे उपधाएत्वे च भ्रेज्+ए इति जाते संयोगे भ्रेजे इति सिद्धम् ।

इयाज—यज् देवपूजासङ्गतिकरणदानेषु इत्यस्माद् भ्वादिगणस्थाद् धातोः लिट्लकारे परस्मैपदे प्रथमपुरुषैकवचने तिपि तस्य स्थाने णलादेशे अनुबन्धलोपे यज्+अ इति जाते द्वित्वे अभ्यासादिकार्ये च य+यज्+अ इति जाते 'लिटयभ्यासस्योभयेषाम्' इत्यनेन अभ्यासस्य यकारस्य सम्प्रसारणे इ+अ+यज् इति जाते 'सम्प्रसारणाच्च' इत्यनेन पूर्वरूपे 'अत उपधायाः' इत्यनेन उपधावृद्धौ संयोगे च इयाज इति सिद्धम् ।

ईजतुः—यज् देवपूजासङ्गतिकरणदानेषु इत्यस्माद् भ्वादिगणस्थाद् धातोः लिट्लकारे प्रथमपुरुषद्विवचने तस् प्रत्यये यज्+तस् इति जाते 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन तसः अतुसादेशे यज्+अतुस् इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे प्राप्ते 'सम्प्रसारणं तदाश्रयञ्च कार्यं बलवत्' इति वार्तिकेन तं प्रबाध्य 'वचिस्वपियजादीनां किति' इत्यनेन पूर्वं सम्प्रसारणे पूर्वरूपे च इज्+अतुस् इति जाते 'पुनः प्रसङ्गविज्ञानात् सिद्धम्' इति परिभाषाबलात् द्वित्वे अभ्यासादिकार्ये च इ+इज्+अतुस् इति जाते सवर्णदीर्घे संयोगे च ईजतुस् इति जाते सस्य रुत्वे विसर्गे च ईजतुः इति सिद्धम् ।

उवाह—वह प्रापणे इत्यस्माद् भ्वादिगणस्थाद् धातोः लिट्लकारे परस्मैपदे प्रथमपुरुषैकवचने तिपि तस्य 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन णलादेशे अनुबन्धलोपे द्वित्वे अभ्यासत्वे हलादिशेषे व+वह्+अ इति जाते 'लिटयभ्यासस्योभयेषाम्' इत्यनेनाभ्यासस्य सम्प्रसारणे अ+उ+वह+अ इति जाते 'सम्प्रसारणाच्च' इत्यनेन पूर्वरूपे 'अत उपधायाः' इत्यनेन उपधावृद्धौ संयोगे उवाह इति सिद्धम् ।

अवोढाम्—वह प्रापणे इत्यस्माद् भ्वादिगणस्थाद् धातोः लुङ्लकारे परस्मैपदे प्रथमपुरुषद्विवचने तस् प्रत्यये तत्स्थाने तामादेशे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ+वह्+ताम् इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे अ+वह्+स्+ताम् इति जाते 'झलो झलि' इत्यनेन एकारस्य लोपे 'हो ढः' इत्यनेन धातोः हकारस्य ढकारे 'झषस्तथोर्धोऽधः' इत्यनेन ताम्प्रत्ययस्य तकारस्य धकारे 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वे 'ढो ढे लोपः' इत्यनेन पूर्वढकारस्य लोपे 'सहिवहोरोदवर्णस्य' इत्यनेन वकारस्याकारस्य ओकारादेशे संयोगे च अवोढाम् इति सिद्धम् ।

अयाक्षीत्—यज् देवपूजासङ्गतिकरणदानेषु इत्यस्माद् भ्वादिगणस्थाद् धातोः लुङ्लकारे परस्मैपदे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ+यज्+ति इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे अ+यज्+स्+ति इति जाते 'इतश्च' इत्यनेन तिप इकारलोपे सिच आर्धधातुकत्वाद् 'आर्धधातुकस्येड् वलादेः' इत्यनेन इटि प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इत्यनेन इण्निषेधे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि अनुबन्धलोपे 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इत्यनेन जकारस्य षत्वे 'षढोः कः सि' इत्यनेन षकारस्य ककारादेशे 'आदेशप्रत्यययोः' इत्यनेन सिचः सकारस्य मूर्धन्यादेशे क्ष्संयोगे क्षकारे जाते अ+य+क्ष्+इ+त् इति जाते 'वदव्रजहलन्तस्याचः' इत्यनेन उपधावृद्धौ संयोगे च अयाक्षीत् इति सिद्धम् ।

अवाक्षीत्—वह प्रापणे इत्यस्माद् भ्वादिगणस्थाद् धातोः लङ्लकारे परस्मैपदे प्रथमपुरुषैकवचने तिपि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे अ+वह+ति इति जाते 'च्लि लुङि' इत्यनेन च्लौ 'च्लेः सिच्' इत्यनेन सिचि अनुबन्धलोपे अ+वह+स+ति इति जाते 'इतश्च' इत्यनेन तिप इकारलोपे 'वदव्रजहलन्तस्याचः' इत्यनेन उपधावृद्धौ 'हो ढः' इत्यनेन हकारस्य ढत्वे अ+वाढ्+स+त् इति जाते 'षढोः कः सि' इत्यनेन ढकारस्य ककारे 'आदेशप्रत्यययोः' इत्यनेन सकारस्य मूर्धन्ये षकारे संयोगे च अवाक्षीत् इति सिद्धम् ।

इति भ्वादिप्रकरणं समाप्तम्

अथ कारकप्रकरणम्

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा २ । ३ । ४६

नियतोपस्थितिकः प्रातिपदिकार्थः । प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्चेति प्रातिपदिकार्थलिङ्गपरिमाणवचनानि । तान्येव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रं तस्मिन् प्रथमाविभक्तिः स्यात् । द्वन्द्वादौ द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इति न्यायात् मात्रपदेन प्रत्येकं सम्बध्यते । तेन प्रातिपदिकार्थमात्रे, लिङ्गमात्रे, परिमाणमात्रे, वचनमात्रे इत्याद्यर्थलाभः । जाति-

द्रव्यलिङ्गसंख्याकारकाणि एतत्पञ्चकं प्रातिपदिकार्थः इति पक्षे लिङ्गग्रहणवैयर्थ्यात् नियता उपस्थितिः यस्य सः नियतोपस्थितिकः। अर्थात् यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेन मानं सः प्रातिपदिकार्थ इत्यर्थः। 'प्रातिपदिकार्थमात्रे' इत्यस्योदाहरणं उच्चैः, नीचैः, श्रीः, ज्ञानम् इत्यादि। अव्यये कस्यापि लिङ्गस्यानुपस्थितिरिति अव्ययं प्रातिपदिकार्थमात्रस्योदाहरणं युक्तम्। एवं रामकृष्णबलरामशब्देषु पुंस्त्वस्य, श्रीः, लक्ष्मीः धरा इत्यादिशब्देषु स्त्रीत्वस्य ज्ञानफलकर्मादिशब्देषु च नपुंसकस्य नियमेन मानमस्ति, तेषां नियतलिङ्गत्वेन प्रातिपदिककार्यान्तर्भावात् 'प्रातिपदिकार्थमात्रे' इत्यस्योदाहरणं निर्बाधमेति।

'लिङ्गमात्राधिक्ये' इत्यस्योदाहरणं तटः, तटी, तटम् 'तटं त्रिषु' इत्यमरकोपादत्र लिङ्गानामनियतोपस्थितिकया प्रातिपदिकार्थान्तर्भावरहितत्वात् लिङ्गमात्राद्याधिक्यस्योदाहरणं युक्तमेव।

'परिमाणमात्रे' इत्यस्योदाहरणं 'द्रोणो व्रीहिः' इत्यत्र द्रोणः इति उदाहरणं ज्ञेयम्। अत्र द्रोणपदात् द्रोणत्वद्रोणपुंस्त्वार्थानां नियमेनोपस्थितया प्रातिपदिकार्थत्वेऽपि परिमाणत्वेन परिमाणस्य नियमेनानुपस्थितेः प्रातिपदिकार्थत्वाऽभावात् परिमाणरूपेऽर्थे परिमाणग्रहणे प्रथमा। तथा च द्रोणपदेन द्रोणत्वावच्छिन्नद्रोणत्वस्योपस्थित्या तस्य सुप्रत्ययार्थपरिमाणस्य व्रीहिपदेनोपस्थितव्रीह्यर्थे इत्यादावपि आकाङ्क्षामात्रस्य परिच्छेद्य-परिच्छेदकभावसम्बन्धेनान्वयः इति 'द्रोणरूपं यत् परिमाणं तत्परिच्छिन्नो व्रीहिः' इत्यर्थः। द्रोणपदात् प्रातिपदिकार्थमात्रे प्रथमाप्रवृत्तौ तु 'नामार्थयोरभेदादतिरिक्तसम्बन्धोऽव्युत्पन्नः' इति व्युत्पत्त्या द्रोणव्रीहिपदार्थयोरभेदेनैवाऽन्वयः स्यादिति द्रोणाऽभिन्नो व्रीहिरित्यनिष्टार्थाऽपत्तिः स्यादिति।

'संख्यामात्रे' इत्यस्योदाहरणम् एकः, द्वौ, बहवः इत्यादि। नन्वत्र एकत्वद्वित्वबहुत्वानां नियमेनोपस्थित्या 'प्रातिपदिकार्थे' इत्यनेनैव सिद्धे सूत्रे वचनग्रहणं व्यर्थमेवेति चेन्न। प्रकृतिभिरेव एकत्वादीनामुक्तत्वात् 'उक्तार्थानामप्रयोगः' इति न्यायेन प्रथमाविभक्तेरप्राप्तौ तदर्थवचनग्रहणस्यावश्यकत्वात्।

कर्तुरीप्सिततमं कर्म १।४।४९

अत्र 'कारके' इत्यनुवृत्तं प्रथमया विपरिणम्यते आप्तुमिष्यमाणम् ईप्सितम्, अतिशयेन ईप्सितम् ईप्सिततमम्। धातूपात्तव्यापाराश्रयः कर्ता। केनाप्तुमित्याकाङ्क्षायां कर्तुर्विशेषणीभूतव्यापारेणेत्यर्थाल्लभ्यते। ततश्च 'कर्तुः क्रियया ऽऽप्तु-

मिष्टतमं कारकं कर्मसंज्ञं स्यात्' इत्ययं सूत्रार्थः सम्पद्यते। उदाहरणं तु 'हरिं भजति' इत्यादि। पूजादिव्यापारेण हरिं तोषयतीत्यर्थः। कर्तृनिष्ठपूजादिव्यापारप्रयोज्यतुष्टिरूपफलाश्रयत्वाद् हरिः कर्म।

गां दोग्धि पयः—'गोः सकाशात् पयो दोग्धि' इति शाब्दबोधः। अत्र गोः अपादानत्वाऽविवक्षया कर्मत्वविवक्षायाम् 'अकथितञ्च' इत्यनेन कर्मसंज्ञायां 'कर्मणि द्वितीया' इत्यनेन द्वितीयाविभक्तिर्भवति।

गर्गान् शतं दण्डयति—ताडनादिना गर्गेभ्यः सुवर्णशतं गृह्णातीत्यर्थः। अत्र 'गर्गेभ्यः' इत्यत्र अपादानत्वमनादृत्य कर्मत्वविवक्षायाम् 'अकथितञ्च' इत्यनेन कर्मसञ्ज्ञायाम् 'कर्मणि द्वितीया' इत्यनेन द्वितीया विभक्तिर्भवति।

बलिं भिक्षते वसुधाम्—'अकथितञ्च' इति सूत्रे 'अर्थनिबन्धनेयं संज्ञा' इति कैयटादिभिर्व्याख्यातत्वेन दुह्याचाद्यर्थकधात्वन्तरयोगे द्विकर्मत्वं लभ्यते। ततश्चात्र याचनार्थक'भिक्ष'धातुयोगेऽपि बलेरपादानत्वाऽविवक्षायां कर्मत्वविवक्षायां कर्मत्वाद् द्वितीया भवति।

कुरून् स्वपिति—कुरुषु निद्रां करोतीत्यर्थः। कुरुप्रभृतयः शब्दाः जनपदविशेषेषु स्वभावान्नित्यबहुवचनान्ताः। अत्र 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वार्तिकेन कर्मत्वाद् द्वितीयाविभक्तिर्भवति।

हृक्रोरन्यतरस्याम् १।४।५३

हृक्रोरणौ यः कर्ता स णौ वा कर्म भवतीत्यर्थः। हारयति कारयति वा भृत्यं भृत्येन वा कटम् इत्युदाहरणम्। हरति करोति वा कटं भृत्यः, तं देवदत्तः हारयति कारयति वेत्यर्थः। अत्र प्रयोज्यकर्तुर्भृत्यस्य कर्मत्वं विकल्पः क्रियते।

अधिशीङ्स्थासां कर्म १।४।४६

'अधिशीङ्, अधिस्था, अधिआस् इत्येतेषां धातूनां आधारः कर्म स्यात्' इति सूत्रार्थः। अधिशेते, अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः इत्युदाहरणम्।

अभिनिविशते सन्मार्गम्—अत्र 'अभिनिविशश्च' इत्यत्र 'अभिनि' इत्येतत् सङ्घातपूर्वस्य विशतेराधारस्य 'सन्मार्गे' इत्यस्य कर्मत्वाद् द्वितीया भवति।

पापेऽभिनिवेशः—'अभिनिविशश्चे'ति सूत्रे 'परिक्रयणे सम्प्रदानमन्यतरस्याम्' इति सूत्रात् मण्डूकप्लुत्या अन्यतरस्यां ग्रहणानुवर्तनात् अत्र अभिनि इत्येतत्सङ्घातपूर्वरूप-'पापे' इत्यस्य कर्मसञ्ज्ञा न भवति।

उपान्वध्याङ्वसः—उप, अनु, अधि, आङ् पूर्वस्य वसतेराधारः कर्मसंज्ञं स्यादिति सूत्रार्थः। उपवसति, अनुवसति, अधिवसति, आवसति वा वैकुण्ठं हरिः इत्युदाहरणम्। अत्रोपसर्गाः आधारद्योतकाः। वैकुण्ठे हरिर्वसतीत्यर्थः।

उभसर्वतसोः कार्या, धिगुपर्यादिषु त्रिषु।
द्वितीयाम्रेडितान्तेषु, ततोऽन्यत्रापि दृश्यते॥ (वा०)

अर्थः—उभशब्दस्य सर्वशब्दस्य प्राकृतिकतसन्तयोः प्रयोगे द्वितीया कार्या, धिक्शब्दस्य प्रयोगे द्वितीया कार्या, आम्रेडितान्तेषु (कृतद्विर्वचनेषु) उपर्यादिषु=उपरि, अधि, अधस् इत्येतेषु त्रिषु प्रयुज्यमानेषु द्वितीया कार्या। ततः उक्तप्रदेशेभ्योऽन्यत्रापि=अभितः, परितः, समया, निकषा, हा, प्रति-योगेषु द्वितीया कार्येत्यर्थः।

ग्रामं समया, निकषा लङ्काम्—ग्रामस्य समया (समये) इत्यर्थः। अत्र समयायोगे ग्रामस्य इत्यत्र 'अभितः परितः' इति कर्मत्वाद् द्वितीया-विभक्तिर्भवति। निकषा इत्यस्य अन्तिके इत्यर्थः।

अन्तरेण हरिं न सुखम्—'अन्तरान्तरेण युक्ते' इत्यनेन अन्तरेण इत्य-व्ययोगाद् हरिशब्दात् द्वितीया भवति।

जपमनु प्रावर्षत्—कदा पर्जन्योऽवर्षदिति प्रश्ने उत्तरमिदम्। अत्र 'अनु-र्लक्षणे' इति सूत्रेण कर्मप्रवचनीयसंज्ञायां 'कर्मप्रवचनीययुक्ते द्वितीया' इत्यनेन द्वितीयाविभक्तिर्भवति।

वृक्षं वृक्षं प्रति, परि, अनु वा विद्योतते विद्युत्—लक्ष्यलक्षणभावसम्बन्धो द्वितीयार्थः। स च प्रत्ययादिद्योत्यः। वृक्षेण लक्ष्यमाणा विद्युत् विद्योतते इत्यर्थः। अत्र 'लक्षणेत्थम्भूताख्यान···' इत्यादिना सूत्रेण कर्मप्रवचनीयसंज्ञायां कर्मप्रवचनीययोगे द्वितीयाविभक्तिर्भवति।

कालाध्वनोरत्यन्तसंयोगे २।३।५

कालाध्वनोरविच्छिन्नसंयोगे गम्यमाने द्वितीया विभक्तिर्भवति। मासं कल्याणी इत्यादि। त्रिंशद्दिनात्मको मासः तस्मिन्नवच्छिन्नमङ्गलवान् भवतीत्यर्थः।

मासमधीते—त्रिंशद्दिनात्मके प्रतिदिनमुचितकाले निरन्तरमधीते इत्यर्थः। अत्र 'कालाध्वनोरत्यन्तसंयोगे' इत्यनेन द्वितीयाविभक्तिर्भवति।

साधकतमं करणम् १।४।४२

क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्। यथा रामेण बाणेन हतो

वाली । 'रामेण' इत्यत्र 'स्वतन्त्रः कर्ता' इत्यनेन कर्तृसंज्ञायां 'बाणेन' इत्यत्र 'साधकतमं करणम्' इत्यनेन करणसंज्ञायाम् उभयत्र 'कर्तृकरणयोस्तृतीया' इत्यनेन तृतीयाविभक्तिर्भवति ।

गोत्रेण गार्ग्यः—गर्गः गोत्रमस्य इत्यत्र प्रथमा प्राप्ता तां प्रबाध्य 'प्रकृत्यादिभ्य उपसंख्यानम्' इत्यनेन वार्तिकेन तृतीयाविभक्तिर्भवति ।

अक्षैरक्षान् वा दीव्यति—अत्र 'दिवः कर्म च' इत्यनेन कर्मसंज्ञा तथा करणसंज्ञा भवति । तेन 'कर्मणि द्वितीया' 'कर्तृकरणयोस्तृतीया' इत्याभ्यां सूत्राभ्यां द्वितीयातृतीये भवतः ।

सहयुक्तेऽप्रधाने २।३।१९

सहार्थेन युक्तेऽप्रधाने तृतीया विभक्तिर्भवति । पुत्रेण सहागतः पिता । पितुरत्रागमनक्रिया सम्बन्धः शाब्दः पुत्रस्य तु तत्सहागमनसम्बन्धः आर्थः इति तस्याप्राधान्यम् ।

येनाङ्गविकारः २।३।२०

येनाङ्गेन विकृतेन अङ्गिनो विकारो लक्ष्यते ततस्तृतीया स्यात् । अक्ष्णा काणः । अक्षिसम्बन्धिकाणत्ववानित्यर्थः ।

अपवर्गे तृतीया २।३।६

अपवर्गः फलप्राप्तिः, तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया विभक्तिर्भवति । अह्ना क्रोशेन वाऽनुवाकोऽधीतः ।

इत्थम्भूतलक्षणे २।३।२१

अयं प्रकारः इत्थम्भूतलक्षणः । तस्मिन् द्योत्ये तृतीयाविभक्तिर्भवति । जटाभिस्तापसः । लक्ष्यलक्षणभावे च तृतीया इत्यर्थः । जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः ।

कर्मणा यमभिप्रैति स सम्प्रदानम् १।४।३२

दानक्रियाकर्मणा कर्ता यं सम्बध्नाति तत्कारकं सम्प्रदानसंज्ञं स्यात् । स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्त्यनुकूलव्यापारो दाधात्वर्थः । अत एव रजकस्य वस्त्रं ददाति इत्येव भवति ।

विप्राय गां ददाति—अत्र देवदत्तादिः कर्ता । दानस्य कर्मणा गवा विप्रं सम्बन्धुमिच्छतीति 'कर्मणा यमभिप्रैति···' इत्यादिना विप्रस्य सम्प्रदानसंज्ञायां 'चतुर्थी सम्प्रदाने' इत्यनेन चतुर्थी ।

शताय परिक्रीतः—अत्र 'परिक्रयणे सम्प्रदानमन्यतरस्याम्' इत्यनेन सम्प्रदानसंज्ञायां 'चतुर्थी सम्प्रदाने' इत्यनेन चतुर्थीविभक्तिर्भवति ।

उत्पातेन ज्ञापिते च (वा०)

आकस्मिकः शुभाशुभसूचकभूतविकारविशेषः उत्पातः । तेन सूचितेऽर्थे विद्यमानाच्चतुर्थीविभक्तिर्भवति । यथा—

'वाताय कपिला विद्युत् आतपायातिलोहिनी ।
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ॥'

ध्रुवमपायेऽपादानम् १।४।२४

अपायो विश्लेषः विभागो वा । तस्मिन् साध्ये ध्रुवमवधिभूतमपादानसंज्ञं स्यात् । यथा ग्रामादायाति । अत्र कस्मादायातीत्याकाङ्क्षाविषयत्वाद् ग्रामोऽवधिरित्यपादानत्वात् पञ्चमीविभक्तिर्भवति ।

ध्रुवत्वन्तु—प्रकृतधात्वर्थाऽनाश्रयत्वे सति तज्जन्यविभागाश्रयत्वम् ।

अपादानत्वन्तु—विभागजनकव्यापारादनाश्रयत्वे सति विभागाश्रयत्वम् ।

जनिकर्तुः प्रकृतिः १।४।३०

जननं जनिः=उत्पत्तिः । प्रकृतिः=हेतुः । जायमानस्य हेतुरपादानसंज्ञः स्यात् । यथा—ब्रह्मणः प्रजाः प्रजायन्ते ।

आसनात् प्रेक्षते—आसने उपविश्य प्रेक्षते इत्यर्थः । अत्र ल्यब्लोपे 'कर्मण्यधिकरणे च' इत्यनेन पञ्चमी विभक्तिर्भवति ।

धूमादग्निमान्—'विभाषा गुणेऽस्त्रियाम्' इत्यनेन विभाषेति योगविभागसामर्थ्याद् धूमस्य अग्निज्ञानहेतुत्वात्तत्र धूमस्यागुणत्वेऽपि हेतुत्वात् पञ्चमी ।

नास्ति घटोऽनुपलब्धेः—उपलब्धिः ज्ञानम् । तस्या अभावः अनुपलब्धिः, तस्या अनुपलब्धेर्नास्ति घटः इति ज्ञायते इति शेषः । 'विभाषागुणेऽस्त्रियाम्' इति सूत्रे विभाषेति योगविभागादत्र स्त्रियाञ्च पञ्चमी सिद्ध्यति ।

पृथग्रामेण—'पृथग्विनानाना·····' इत्यादिना तृतीयाविभक्तिर्भवति ।

अपहरेः, परिहरेः—उभयत्र 'अपपरी वर्जने' इति कर्मप्रवचनीयसंज्ञायां 'पञ्चम्यपाङ्परिभिः' इत्यनेन पञ्चमी भवति ।

आमुक्तेः संसारः—अत्र 'आङ् मर्यादावचने' इत्यनेन कर्मप्रवचनीयसंज्ञायां 'पञ्चम्यपाङ्परिभिः' इत्यनेन पञ्चमी भवति ।

तिलेभ्यः प्रतियच्छति माषान्—अत्र 'प्रतिनिधिप्रतिदानयोः' इत्यनेन कर्मप्रवचनीयसंज्ञायां 'प्रतिनिधिप्रतिदाने च यस्मात्' इत्यनेन पञ्चमीविभक्तिर्भवति ।

एधोदकस्योपस्कुरुते—एधः=काष्ठम्, दकस्य=उदकस्य, उपस्कुरुते=गुणमाधत्ते इत्यर्थः। 'षष्ठी शेषे' इत्यनेनात्र षष्ठी विभक्तिर्भवति।

कर्तृकर्मणोः कृति २।३।६५

कृद्योगे कर्तरि कर्मणि च षष्ठी स्यादित्यर्थः। कर्तरि यथा कृष्णस्य कृतिः। जगतः कर्ता परमेश्वरः।

उभयप्राप्तौ कर्मणि २।३।६६

उभयोः कर्तृकर्मणोः प्राप्तिर्यस्मिन् कृति तत्र कर्मण्येव षष्ठी स्यादित्यर्थः। आश्चर्यो गवां दोहोऽगोपेन।

कृत्यानां कर्तरि वा २।३।७१

कृत्यसंज्ञकप्रयोगे कर्तरि षष्ठी वा स्यात्। मया मम वा सेव्यो हरिः।

राज्ञां मतः—'न लोकाव्ययनिष्ठाखलर्थतृनाम्' इति निषेधं प्रबाध्य 'क्तस्य च वर्तमाने' इत्यनेनात्र षष्ठी।

लक्ष्म्याः कामुकः—अत्र 'कमेरनिषेधः' इति वार्तिकप्रतिप्रसवात् 'न लोकाव्यय·····' इति निषेधो न भवति।

मुरस्य मुरं वा द्विषन्—अत्र 'द्विषः शतुर्वा' इति वार्तिकेन विभाषया षष्ठीनिषेधः।

व्रजं गामी—अत्र 'अकेनोर्भविष्यदाधमर्ण्ययोः' इति सूत्रेण षष्ठीनिषेधः।

एनपा द्वितीया २।३।३१

एनबन्तेन योगे द्वितीया स्यादित्यर्थः। यथा—दक्षिणेन ग्रामं ग्रामस्य वा। एनपेति योगविभागादत्र षष्ठी अपि भवति।

आधारोऽधिकरणम् १।४।४५

कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यात्। अधिक्रियतेऽस्मिन्नित्याधारः। स च औपश्लेषिकवैषयिकाऽभिव्यापकभेदात् त्रिधा। उप समीपे सम्बन्धः उपश्लेषः। तत्कृतमौपश्लेषिकम्। यथा कटे आस्ते। विषये भवः वैषयिकः। यथा मोक्षे इच्छाऽस्ति। अभि सर्वतोभावेन व्याप्नोतीत्यभिव्यापकः। यथा सर्वस्मिन्नात्माऽस्ति। सर्वस्मिन्नभिव्याप्य आत्मा वर्तते इत्यर्थः।

कटे आस्ते—अत्र कटस्याधिकरणसंज्ञायां 'सप्तम्यधिकरणे' इत्यनेन सप्तमीविभक्तिर्भवति।

असाधुर्मातुले—अत्र 'शेषे षष्ठी' इत्यनेन प्राप्तां षष्ठीं प्रबाध्य 'साध्वसाधुप्रयोगे च' इत्यनेन वार्तिकेन सप्तमीविभक्तिर्भवति।

केशेषु चमरीं हन्ति—केशनिमित्तं चमरीं हन्तीत्यर्थः। 'अत्र निमित्तात्कर्मयोगे' इत्यनेन सप्तमीविभक्तिर्भवति।

अधीती व्याकरणे—अत्र अधिपूर्वात् इङ् अध्ययने इत्यस्माद् धातोः 'इष्ठादिभ्यश्च' इत्यनेन इनि प्रत्यये कर्मविशेषजिज्ञासायां व्याकरणं कर्मत्वेनान्वेति। इति द्वितीयायां प्राप्तायां 'क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्' इत्यनेन वार्तिकेन सप्तमीविभक्तिर्भवति।

यस्य च भावेन भावलक्षणम् २।३।३७

यस्य क्रियया क्रियान्तरं लक्ष्यते तत्र सप्तमीविभक्तिर्भवति। यथा गोषु दुह्यमानासु गतः।

षष्ठी चानादरे २।३।३८

अनादरे षष्ठीसप्तम्यौ भवतः। यथा रुदति रुदतो वा प्राव्राजीत्।

यतश्च निर्धारणम् २।३।४१

जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ भवतः। यथा—गवां गोषु वा कृष्णा बहुक्षीरा।

मातरि साधुः—अत्र 'साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः' इत्यनेन सप्तमी।

अधिभुवि रामः, अधिरामे भूः—'यस्मादधिकं चेश्वरवचनं तत्र सप्तमी' इत्यनेन ऐश्वर्ये स्वस्वामिभ्यां पर्यायेण सप्तमी षष्ठी च भवतः।

इति कारकप्रकरणम्

अथ समासप्रकरणम्

तत्रादौ केवलसमासप्रकरणम्

प्रश्नः—समासः कतिविधः? इति सम्यग् व्याख्यायताम्।

उत्तरम्—समासः पञ्चधा। तत्र—१. विशेषसंज्ञाविनिर्मुक्तः केवलसमासः, यथा भूतपूर्वः। २. प्रायेण पूर्वपदार्थप्रधानः अव्ययीभावः, यथा अधिहरि। ३. प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषः, यथा राजपुरुषः। तत्पुरुषभेदः कर्मधारयः, यथा—नीलोत्पलम्। कर्मधारयभेदो द्विगुः, यथा—पञ्चगङ्गम्। ४. प्रायेण

अन्यपदार्थप्रधानो बहुव्रीहिः, यथा—पीताम्बरः। ५. प्रायेण उभयपदार्थप्रधानो द्वन्द्वः, यथा—यथा रामकृष्णौ, इति।

भूतपूर्वः—पूर्वं भूतः इति लौकिकविग्रहे, पूर्व + अम् + भूत + सु इति अलौकिकविग्रहे 'सह सुपा' इत्यनेन समासे 'कृत्तद्धितसमासाश्च' इत्यनेन समासत्वात् प्रातिपदिकसंज्ञायां 'सुपो धातुप्रातिपदिकयोः' इत्यनेन सुपो लुकि पूर्वभूत इति जाते 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यनेन पूर्वभूतशब्दयोरुभयोरप्युपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इत्यनेन विनिगमकाविरहादुभयोरपि पूर्वनिपाते प्राप्ते 'भूतपूर्वे चरट्' इति निर्देशाद् भूतशब्दस्य पूर्वनिपाते 'एकदेशविकृतमनन्यवत्' इति न्यायेन प्रातिपदिकत्वात् प्रथमैकवचने सौ अनुबन्धलोपे, सस्य रुत्वे विसर्गे च भूतपूर्वः इति सिद्धम्।

इति केवलसमासः

अथ अव्ययीभावसमासप्रकरणम्

न अव्ययम् अनव्ययम्, अनव्ययस्य अव्ययीभवनम् अव्ययीभावः। अत्र अव्ययशब्दाद् भावे च्विः 'च्वौ च' इत्यनेन दीर्घे 'अव्ययी' इत्ययं शब्दः सिध्यति तस्य भवनं भावः अव्ययीभाव उच्यते। उदाहरणम्—अधिहरि इत्यादय उच्यन्ते।

अधिहरि—हरौ अधिकृत्य इत्यस्मिन् लौकिकविग्रहे, हरि + ङि + अधि इति अलौकिकविग्रहे 'अव्ययं विभक्तसमीप·····' इत्यादिना अव्ययीभावसमासे समासत्वात् 'सुपो धातुप्रातिपदिकयोः' इत्यनेन सुपो लुकि हरि अधि इति जाते 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यनेन अधि इत्यस्य उपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इत्यनेन तस्य पूर्वनिपाते अधिहरि इति जाते 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकत्वे प्रथमैकवचने सौ 'अव्ययीभावश्च' इत्यनेन अव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इत्यनेन सुलोपे अधिहरि इति सिद्धम्।

अधिगोपम्—गां पातीति गोपाः तस्मिन्नधिकृत्य इति लौकिकविग्रहे गोपा + ङि + अधि इति अलौकिकविग्रहे 'अव्ययं विभक्तिसमीप·····' इत्यादिना अव्ययीभावसमासे 'सुपो धातुप्रातिपदिकयोः' इत्यनेन सुपो लुकि गोपा अधि इति जाते 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यनेन अधि इत्यस्य उपसर्जनसंज्ञायाम्

'उपसर्जनं पूर्वम्' इत्यनेन अधि इत्यस्य पूर्वनिपाते अधिगोपा इति जाते 'अव्ययीभावश्च' इत्यनेन नपुंसकलिङ्गव्यवस्थायां 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यनेन ह्रस्वत्वे प्रथमैकवचने सौ 'एकदेशविकृतमनन्यवत्' इति न्यायात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकत्वे सोर्लुकि प्राप्ते 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इत्यनेन सुपो लुङ्निषेधे अमादेशे च अधिगोप+अम् इति जाते पुनः 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकत्वे सौ 'अव्ययीभावश्च' इत्यनेन अव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इत्यनेन सुलोपे अधिगोपम् इति सिद्धम् ।

तृतीयासप्तम्योर्बहुलम् २।४।८४

कृदन्तादव्ययीभावात् तृतीयासप्तम्योः बहुलम् अम्भावो भवतीत्यर्थः। कृष्णस्य समीपम् उपकृष्णम् । कृष्ण+ङस्+उप इत्यलौकिकविग्रहे 'अव्ययं विभक्तिसमीप···' इत्यादिना सामीप्यार्थबोधक उपशब्देन सह अव्ययीभावसमासे 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यनेन उप इत्यस्य उपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इत्यनेन उप इत्यस्य पूर्वनिपाते समासत्वात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायाम् उपकृष्णशब्दात् प्रातिपदिकत्वे टाविभक्तौ 'अव्ययीभावश्च' इत्यनेन अव्ययत्वात् सुपो लुकि प्राप्ते 'तृतीयासप्तम्योर्बहुलम्' इत्यनेन विकल्पेन टा विभक्तेः अमादेशे उपकृष्ण+अम् इति जाते पूर्वरूपे च उपकृष्णम् इति सिद्धम् । अमादेशाभावपक्षे उपकृष्ण+टा इति जाते 'टाङसिङसामिनात्स्याः' इत्यनेन टा इत्यस्य इनादेशे गुणे उपकृष्णेन इति सिद्धम् । सप्तमीविभक्तौ तु उपकृष्णम् तथा उपकृष्णे इति बोध्यम् ।

अनुरूपम्—रूपस्य योग्यम् इत्यस्मिन् 'अव्ययं विभक्तिसमीप·····' इत्यादिना योग्यार्थबोधकरूपशब्देन सह अनुशब्दस्य अव्ययीभावसमासे 'सुपो धातुप्रातिपदिकयोः' इत्यनेन सुपो लुकि 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यनेन अनु इत्यस्य उपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इत्यनेन अनु इत्यस्य पूर्वनिपाते अनुरूप इत्यस्य प्रातिपदिकत्वे सौ 'अव्ययीभावश्च' इत्यनेन अव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इत्यनेन सुपो लुकि प्राप्ते 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इत्यनेन सोरमि अनुरूप+अम् इति जाते पररूपे अनुरूपम् इति सिद्धम् ।

यथाशक्ति—शक्तिमनतिक्रम्य इत्यस्मिन्विग्रहे शक्ति+अम्+यथा इति अलौकिकविग्रहे शक्तिशब्देन सह अनतिक्रमणार्थं वर्तमानाद् यथाशब्दस्य 'अव्ययं विभक्तिसमीप···' इत्यादिना अव्ययीभावसमासे 'सुपो धातुप्रातिपदिकयोः'

इत्यनेन सुपो लुकि शक्ति यथा इति जाते 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यनेन यथाशब्दस्योपसर्जनत्वे 'उपसर्जनं पूर्वम्' इत्यनेन तस्य पूर्वनिपाते यथाशक्ति इति जाते समासत्वात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिक-संज्ञायां सौ 'अव्ययीभावश्च' इत्यनेन अव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इत्यनेन सुलोपे यथाशक्ति इति सिद्धम् ।

पारेगङ्गम्—पारं गङ्गायाः इति लौकिकविग्रहे तथा पार+अम्+गंगा+ङस् इत्यलौकिकविग्रहे 'पारेमध्ये षष्ठया वा' इत्यनेन अव्ययीभावसमासे 'सुपो धातुप्रातिपदिकयोः' इत्यनेन सुपो लुकि पारशब्दस्य एदन्तत्वनिपाते च गङ्ग-पारे इति जाते 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यनेन पारे इत्यस्य उप-सर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इत्यनेन पारेशब्दस्य पूर्वनिपाते पारेगङ्गा इति जाते प्रातिपदिकत्वे सौ 'अव्ययीभावश्च' इत्यनेन नपुंसकसंज्ञायां 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यनेन ह्रस्वत्वे पारेगङ्ग इति जाते प्रातिपदिकत्वे सौ 'अव्ययी-भावश्च' इत्यनेनाव्ययत्वे 'अव्ययादाप्सुपः' इत्यनेन नित्ये सुपो लुकि प्राप्ते 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इत्यनेन अमादेशे पारेगङ्ग+अम् इति जाते पररूपे पारेगङ्गम् इति सिद्धम् । अव्ययीभावसमासाभावपक्षे पारं गङ्गायाः इत्यस्मिन् विग्रहे षष्ठीतत्पुरुषसमासे गङ्गापारम् इति जायते । तदभावे गङ्गायाः पारम् इत्यपि साधु ।

व्याकरणस्य त्रिमुनि—व्याकरणस्य पाणिन्यादयः त्रयो मुनयः वंश्याः इति भावः । त्रि+जस्+मुनि+जस् इत्यलौकिकविग्रहे 'संख्या वंश्येन' इत्यनेन अव्ययीभावसमासे 'सुपो धातुप्रातिपदिकयोः' इत्यनेन विभक्तिलोपे 'प्रथमानिर्दिष्टं समासे उपसर्जनम्' इत्यनेन त्रिशब्दस्य उपसर्जनसंज्ञायाम् 'उप-सर्जनं पूर्वम्' इत्यनेन पूर्वनिपाते त्रिमुनि इति जाते प्रातिपदिकत्वे सौ 'अव्ययी-भावश्च' इत्यनेन अव्ययत्वे 'अव्ययादाप्सुपः' इत्यनेन सुपो लुकि त्रिमुनि इति सिद्धम् ।

पञ्चगङ्गम्—पञ्चानां गङ्गानां समाहारः इति लौकिकविग्रहे पञ्चन्+आम्+गङ्गा+आम् इत्यलौकिकविग्रहे 'समाहारे चायमिष्यते' इत्यनेन वार्तिकेन सहकारिण 'नदीभिश्च' इत्यनेन अव्ययीभावसमासे विभक्तिलोपे उपसर्जनसंज्ञायां पञ्चन्शब्दस्य पूर्वनिपाते नलोपे पञ्चगङ्गा इति जाते 'अव्ययी-भावश्च' इत्यनेन नपुंसकलिङ्गत्वे 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यनेन ह्रस्व-त्वे पञ्चगङ्ग इति जाते प्रातिपदिकत्वे सौ 'अव्ययीभावश्च' इत्यनेन अव्ययत्वे

'अव्ययादाप्सुपः' इत्यनेन सुलोपे प्राप्ते 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इत्यनेन सोरमादेशे पूर्वरूपे पञ्चगङ्गम् इति सिद्धम् ।

लोहितगङ्गम्—लोहिता गङ्गा यस्मिन् देशे स लोहितगङ्गं नाम देशः । लोहिता + सु + गङ्गा + सु इत्यवस्थायाम् 'अन्यपदार्थे च सञ्ज्ञायाम्' इत्यनेन अव्ययीभावसमासे विभक्तिलुकि लोहितशब्दस्य उपसर्जनत्वे पूर्वनिपाते पुंवद्भावे च लोहितगङ्गा इति जाते 'अव्ययीभावश्च' इत्यनेन नपुंसकत्वे 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यनेन ह्रस्वत्वे लोहितगङ्ग इति जाते प्रातिपदिकत्वे सौ 'अव्ययीभावश्च' इत्यनेन अव्ययत्वे 'अव्ययादाप्सुपः' इत्यनेन नित्ये सुलोपे प्राप्ते 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इत्यनेन सोरमादेशे पूर्वरूपे लोहितगङ्गम् इति सिद्धम् ।

उपशरदम्—शरदः समीपम् इति लौकिकविग्रहे शरद + ङस् + उप इति अलौकिकविग्रहे 'अव्ययं विभक्ति·····' इत्यादिना समासे सुपो लुकि उपः उपसर्जनत्वे पूर्वनिपाते 'अव्ययीभावे शरत्प्रभृतिभ्यः' इत्यनेन टच् प्रत्यये अनुबन्धलोपे संयोगे उपशरद इत्यस्य प्रातिपदिकत्वे सौ 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इत्यनेन सोरमादेशे पूर्वरूपे उपशरदम् इति सिद्धम् ।

उपराजम्—राज्ञः समीपम् उपराजम् इति लौकिकविग्रहे राजन् + ङस् + उप इत्यलौकिकविग्रहे 'अव्ययं विभक्ति·····' इत्यादिना समासे विभक्तिलुकि उपः उपसर्जनत्वे पूर्वनिपाते उपराजन् इति जाते 'अनश्च' इत्यनेन टच् प्रत्यये अनुबन्धलोपे उपराजन् + अ इति जाते भसंज्ञायां 'नस्तद्धिते' इत्यनेन टेः अन् भागस्य लोपे उपराज इत्यस्य प्रातिपदिकत्वे सौ 'अव्ययीभावश्च' इत्यनेन अव्ययत्वे 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इत्यनेन सोरमादेशे पूर्वरूपे उपराजम् इति सिद्धम् ।

इत्यव्ययीभावसमासप्रकरणं समाप्तम् ।

अथ तत्पुरुषसमासप्रकरणम्

शङ्कुलाखण्डः—शङ्कुलया खण्डः इति लौकिकविग्रहे शङ्कुला + टा + खण्ड + सु इति अलौकिकविग्रहे 'तृतीया तत्कृतार्थेन गुणवचनेन' इत्यनेन तत्पुरुषसमासे विभक्तिलोपे शङ्कुलाशब्दस्योपसर्जनत्वे पूर्वनिपाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च शङ्कुलाखण्डः इति सिद्धम् ।

मासपूर्वः—मासेन पूर्वः इति लौकिकविग्रहे मास+टा+पूर्व+सु इति अलौकिकविग्रहे 'पूर्वमदृशसमोनार्थ·····' इत्यादिना तत्पुरुषसमासे विभक्तिलोपे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च मासपूर्वः इति सिद्धम् ।

दध्योदनः—दध्ना उपसिक्तः ओदनः इति लौकिकविग्रहे दधि+टा+ओदन+सु इति अलौकिकविग्रहे 'अन्नेन व्यञ्जनम्' इत्यनेन समासे विभक्तिलोपे दधिशब्दस्योपसर्जनत्वे पूर्वनिपाते यणि प्रातिपदिकत्वे सौ रुत्वे विसर्गे च दध्योदनः इति सिद्धम् ।

नखनिर्भिन्नः—नखैर्निर्भिन्नः इत्यस्मिन् लौकिकविग्रहे नख+भिस्+निर्भिन्न+सु इत्यलौकिकविग्रहे 'अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्' इत्यनेन तत्पुरुषसमासे तदन्तविधिनिषेधात् निर्भिन्नशब्दस्य कृदन्तत्वाभावात् समासाऽप्राप्तौ 'कृद्ग्रहणे गतिकारकपूर्वस्याऽपि ग्रहणम्' इति परिभाषाबलात् 'कर्तृकरणे कृता बहुलम्' इत्यनेन समासे विभक्तिलोपे नखनिर्भिन्नशब्दस्य प्रातिपदिकत्वे सौ रुत्वे विसर्गे च नखनिर्भिन्नः इति सिद्धम् ।

चोरभयम्—चोरात् भयम् इति लौकिकविग्रहे चोर+ङसि+भय+सु इति अलौकिकविग्रहे 'पञ्चमी भयेन' इत्यनेन तत्पुरुषसमासे विभक्तिलोपे प्रातिपदिकत्वे सौ सोरमि पूर्वरूपे च चोरभयम् इति सिद्धम् ।

राजपुरुषः—राज्ञः पुरुषः इति लौकिकविग्रहे राजन्+ङस्+पुरुष+सु इत्यलौकिकविग्रहे 'षष्ठी' इत्यनेन षष्ठीतत्पुरुषसमासे विभक्तिलोपे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च राजपुरुषः इति सिद्धम् ।

देवपूजकः—देवस्य पूजकः इति लौकिकविग्रहे देव+ङस्+पूजक+सु इति अलौकिकविग्रहे 'याजकादिभिश्च' इत्यनेन तत्पुरुषसमासे विभक्तिलोपे देवशब्दस्योपसर्जनत्वे पूर्वनिपाते देवपूजक इत्यस्य प्रातिपदिकत्वे सौ रुत्वे विसर्गे च देवपूजकः इति सिद्धम् ।

सर्वश्वेतः—सर्वेषां श्वेततरः इति लौकिकविग्रहे सर्व+आम्+श्वेततर+सु इत्यलौकिकविग्रहे 'गुणात्तरेण तरलोपश्च' इत्यनेन वार्तिकेन तत्पुरुषसमासे सर्वशब्दस्योपसर्जनत्वे पूर्वनिपाते तरशब्दस्य लोपे च सर्वश्वेत इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च सर्वश्वेतः इति सिद्धम् ।

अर्धपिप्पली—अर्धं पिप्पल्याः इति लौकिकविग्रहे अर्ध+सु+पिप्पली+ङस् इत्यलौकिकविग्रहे 'अर्धं नपुंसकम्' इत्यनेन तत्पुरुषसमासे विभक्तिलोपे

अर्धशब्दस्योपसर्जनत्वे पूर्वनिपाते अर्धपिप्पली इति जाते 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इत्यनेन स्त्रीत्वे प्रातिपदिकत्वे सौ हल्ङ्यादिना सुलोपे अर्धपिप्पली इति सिद्धम् । अत्र पिप्पलीशब्दस्य नियतविभक्तिकत्वेऽपि 'एकविभक्तावषष्ठ्यन्तवचनम्' इति निषेधादुपसर्जनत्वाद् ह्रस्वो न भवति ।

पौर्वशालः—पूर्वस्यां शालायां भवः इति लौकिकविग्रहे पूर्वा + ङि + शाला + ङि इति अलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे पूर्वशब्दस्योपसर्जनत्वे पूर्वनिपाते च 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इत्यनेन पूर्वशब्दस्य पुंवद्भावे 'दिक्पूर्वपदात् संज्ञायां अः' इत्यनेन अ प्रत्यये अनुबन्धलोपे पूर्वशाला + अ इति जाते 'तद्धितेष्वचामादेः' इत्यनेनाद्यचो वृद्धौ पौर्वशाला + अ इति जाते भसंज्ञायां 'यस्येति च' इत्यनेन आकारलोपे संयोगे पौर्वशाल इत्यस्य प्रातिपदिकत्वे सौ रुत्वे विसर्गे च पौर्वशालः इति सिद्धम् ।

षाण्मातुरः—षण्णाम् मातृणामपत्यम् इत्यस्मिन् लौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे 'मातुरुत्संख्यासम्भद्रपूर्वायाः' इत्यनेन अणि ऋकारस्य उकारे रपरत्वे च अनुबन्धलोपे षण्मातुर् + अ इति जाते 'तद्धितेष्वचामादेः' इत्यनेनाद्यचो वृद्धौ संयोगे षाण्मातुर इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च षाण्मातुरः इति सिद्धम् ।

पञ्चगवधनः—पञ्च गावः धनं यस्य इति लौकिकविग्रहे पञ्चन् + जस् + गो + जस् + धन + सु इति जाते 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन विकल्पेन समासे प्राप्ते 'द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यं समासवचनम्' इत्यनेन नित्ये समासे सुपो लुकि नलोपे 'गोरतद्धितलुकि' इत्यनेन टचि अनुबन्धलोपे पञ्चगो + अ + धन + सु इति जाते अवादेशे संयोगे बहुव्रीहावन्तरे तत्पुरुषे जाते बहुव्रीहिसमासस्यापि प्रातिपदिकत्वात् सुलोपे पञ्चगवधन इत्यस्य प्रातिपदिकत्वे सौ रुत्वे विसर्गे च पञ्चगवधनः इति सिद्धम् ।

महावैयाकरणः—महांश्चासौ वैयाकरणः इति लौकिकविग्रहे महत् + सु + वैयाकरण + सु इति अलौकिकविग्रहे 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इत्यनेन समासे विभक्तिलोपे महत् वैयाकरण इति जाते 'आन्महतः समानाधिकरणयोः' इत्यनेनाकारान्तादेशे मह + आ + वैयाकरण इति जाते सवर्णदीर्घे महावैयाकरण इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च महावैयाकरणः इति सिद्धम् ।

पुरुषव्याघ्रः—पुरुषः व्याघ्र इव इति लौकिकविग्रहे पुरुष + सु + व्याघ्र

+सु इत्यलौकिकविग्रहे 'उपमितं व्याघ्रादिभिः' इत्यनेन समासे विभक्तिलोपे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च पुरुषव्याघ्रः इति सिद्धम् ।

चिन्मात्रम्—चित् एव इति चिन्मात्रम् । 'मयूरव्यंसकादयश्च' इत्यनेन निपातनात् सर्वं सिद्धम् ।

अब्राह्मणः—न ब्राह्मणः इत्यस्मिन् लौकिकविग्रहे न+ब्राह्मण+सु इत्यत्र 'नञ्' इत्यनेन तत्पुरुषसमासे विभक्तिलोपे न इत्यस्योपसर्जनत्वे पूर्वनिपाते 'नलोपो नञः' इत्यनेन नकारलोपे अब्राह्मण इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च अब्राह्मणः इति सिद्धम् ।

अनश्वः—न अश्वः इति लौकिकविग्रहे न+अश्व+सु इत्यलौकिकविग्रहे 'नञ्' इत्यनेन तत्पुरुषसमासे विभक्तिलोपे न+अश्व इति जाते 'नलोपो नञः' इत्यनेन नकारलोपे अ+अश्व इति जाते 'तस्मान्नुडचि' इत्यनेन नुडागमे अ+न्+अश्व इति जाते संयोगे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च अनश्वः इति सिद्धम् ।

कुपुरुषः—कुत्सितः पुरुषः इति लौकिकविग्रहे 'कुगतिप्रादयः' इत्यनेन तत्पुरुषसमासे विभक्तिलोपे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च कुपुरुषः इति सिद्धम् ।

अतिमालः—मालामतिक्रान्तः इति लौकिकविग्रहे माला+अम्+अति इति अलौकिकविग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इत्यनेन तत्पुरुषसमासे अति इत्यस्योपसर्जनत्वे पूर्वनिपाते 'एकविभक्ति चापूर्वनिपाते' इत्यनेन मालाशब्दस्योपसर्जनत्वे 'गोस्त्रियोरुपसर्जनस्य' इत्यनेन मालाशब्दस्य ह्रस्वत्वे अतिमाल इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च अतिमालः इति सिद्धम् ।

निष्कौशाम्बिः—निष्क्रान्ता कौशाम्ब्याः इति लौकिकविग्रहे कौशाम्बी+ङसि निर् इति अलौकिकविग्रहे 'निरादयः क्रान्ताद्यर्थे पञ्चम्याः' इत्यनेन तत्पुरुषसमासे विभक्तिलोपे निर् इत्यस्योपसर्जनत्वे पूर्वनिपाते निर्+कौशाम्बी इति जाते रेफस्य विसर्जनीयत्वे रुत्वे षत्वे संयोगे निष्कौशाम्बी इति जाते 'एकविभक्ति चाऽपूर्वनिपाते' इत्यनेन निष्कौशाम्बी इत्यस्योपसर्जनत्वे 'गोस्त्रियोरुपसर्जनस्य' इत्यनेन ह्रस्वत्वे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च निष्कौशाम्बिः इति सिद्धम् ।

कुम्भकारः—कुम्भं करोतीत्यस्मिन् लौकिकविग्रहे 'कर्मण्यण्' इत्यनेन अण् प्रत्यये अनुबन्धलोपे कुम्भ+अम्+कृ+अण् इत्यलौकिकविग्रहे 'उपपदमतिङ्' इत्यनेन उपपदसमासे विभक्तिलोपे 'अचो ञ्णिति' इत्यनेन वृद्धौ संयोगे कुम्भकार इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च कुम्भकारः इति सिद्धम् ।

व्याघ्री—विशेषेण जिघ्रतीत्यस्मिन् लौकिकविग्रहे वि-आङ्पूर्वक घ्रा गन्धोपादाने इत्यस्माद्धातोः 'आतश्चोपसर्गे' इत्यनेन क प्रत्यये 'आतो लोप इटि च' इत्यनेन आकारलोपे वि+आ+घ्र+अ इति जाते 'गतिश्च' इत्यनेन गतिसंज्ञायां 'गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेः' इति परिभाषया सुबुत्पत्तेः प्राक् 'कुगतिप्रादयः' इत्यनेन समासे स्त्रीत्वविवक्षायां 'जातेरस्त्रीविषयादयोपधात्' इत्यनेन ङीषि अनुबन्धलोपे व्याघ्र+ई इति जाते 'यस्येति च' इत्यनेन अकारलोपे संयोगे व्याघ्री इति जाते प्रातिपदिकत्वे सौ हल्ङ्यादिना सुलोपे व्याघ्री इति सिद्धम् ।

पूर्वरात्रः—रात्रेः पूर्वम् इत्यस्मिन् विग्रहे 'पूर्वकालैकसर्व·····' इत्यादिना समासे सुपो लुकि 'अहःसर्वैकदेश·····' इत्यादिना अच् प्रत्यये पूर्वरात्रि+अ इति जाते भत्वे 'यस्येति च' इत्यनेन इकारलोपे संयोगे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च पूर्वरात्रः इति सिद्धम् ।

परमराजः—परमश्चासौ राजा च इति लौकिकविग्रहे परम+सु+राजन्+सु इत्यलौकिकविग्रहे 'सन्महत्परमोत्तमो·····' इत्यादिना समासे विभक्तिलोपे 'राजाहःसखिभ्यष्टच्' इत्यनेन टच् प्रत्यये अनुबन्धलोपे भत्वे 'नस्तद्धिते' इत्यनेन टिलोपे संयोगे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च परमराजः इति सिद्धम् ।

द्विनावम्—द्वयोः नावोः समाहारः इत्यस्मिन्विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे 'नावो द्विगोः' इत्यनेन टचि अनुबन्धलोपे द्विनौ+अ इति जाते आवादेशे संयोगे द्विनाव इत्यस्य द्विगुसंज्ञायाम् एकवद्भावे नपुंसकत्वे प्रातिपदिकत्वे सौ सोरमि पूर्वरूपे द्विनावम् इति सिद्धम् ।

पञ्चगवम्—पञ्चानां गवां समाहारः इति लौकिकविग्रहे पञ्चन्+आम् गो+आम् इत्यलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे सुपो लुकि नलोपे 'गोरतद्धितलुकि' इत्यनेन टचि अनुबन्धलोपे पञ्चगो+अ इति जाते अवादेशे संयोगे 'तत्पुरुषः समानाधिकरणः कर्मधारयः' इत्यनेन कर्मधारयसंज्ञायां 'संख्यापूर्वो द्विगुः' इत्यनेन द्विगुसंज्ञायां 'द्विगुरेकवचनम्' इत्यनेनैकवद्भावे 'स नपुंसकम्' इत्यनेन नपुंसकत्वे प्रातिपदिकत्वे सौ सोरमि पूर्वरूपे च पञ्चगवम् इति सिद्धम् ।

अहोरात्रः—अहश्च रात्रिश्च इति लौकिकविग्रहे अहन्+सु+रात्रि+सु इति अलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे 'अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः' इत्यनेन अचि अनुबन्धलोपे भत्वे 'यस्येति

च' इत्यनेन इकारलोपे संयोगे अहन्+रात्र इति जाते 'रात्राह्नाहाः पुंसि' इत्यनेन पुंस्त्वे 'रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्' इत्यनेन नस्य रुत्वे 'हशि च' इत्यनेन उत्वे 'आद्गुणः' इत्यनेन गुणे अहोरात्र इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च अहोरात्रः इति सिद्धम्।

महाराजः—महांश्चासौ राजा च इत्यस्मिन् लौकिकविग्रहे महान्+सु+राजन्+सु इत्यलौकिकविग्रहे 'सन्महत्परमोत्तमो .....' इत्यादिना समासे विभक्तिलोपे 'राजाहःसखिभ्यष्टच्' इत्यनेन टचि अनुबन्धलोपे महत्+राजन्+अ इति जाते 'आन्महतः समानाधिकरणजातीययोः' इत्यनेन तकारस्य आकारादेशे सवर्णदीर्घे भत्वे 'नस्तद्धिते' इत्यनेन अन्भागस्य लोपे संयोगे महाराज इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च महाराजः इति सिद्धम्।

अर्द्धपिप्पली—अर्धं पिप्पल्याः इति लौकिकविग्रहे अर्ध+सु+पिप्पली+सु इति अलौकिकविग्रहे 'अर्द्धंनपुंसकम्' इत्यनेन तत्पुरुषसमासे सुपो लुकि अर्द्ध इत्यस्योपसर्जनत्वे पूर्वनिपाते 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इत्यनेन स्त्रीत्वे सौ हलङ्यादिना सुलोपे अर्द्धपिप्पली इति सिद्धम्।

पञ्चकपालः—पञ्चषु कपालेषु संस्कृतः इति लौकिकविग्रहे पञ्चन्+सुप्+कपाल+सुप् इत्यलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे 'संस्कृतं भक्षाः' इत्यनेन अणि 'द्विगो लुगनपत्ये' इत्यनेनाणो लुकि कपालशब्दवत् 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इत्यनेन पञ्चकपालशब्दस्यापि नपुंसकत्वे प्राप्ते 'द्विगुप्राप्तापन्नालं पूर्वगतिसमासेषु न' इत्यनेन निषेधे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च पञ्चकपालः इति सिद्धम्।

अर्द्धर्चः—ऋचः अर्द्धम् इति लौकिकविग्रहे ऋच्+ङस्+अर्द्ध+सु इत्यलौकिकविग्रहे 'अर्द्धंनपुंसकम्' इत्यनेन समासे विभक्तिलोपे अर्द्धशब्दस्योपसर्जनत्वे पूर्वनिपाते अर्द्ध+ऋच् इति जाते 'आद्गुणः' इत्यनेन गुणे रपरत्वे अर्द्धर्च इति जाते 'ऋक्पूरब्धूःपथामानक्षे' इत्यनेन अप्रत्यये संयोगे अर्द्ध इति जाते 'अर्द्धर्चाः पुंसि च' इत्यनेन नपुंसकत्वे प्रातिपदिकत्वे सौ सोरमि पूर्वरूपे च अर्द्धर्चम् इति सिद्धम्। पक्षे अर्द्धर्चः इत्यपि भवति।

इति तत्पुरुषसमासप्रकरणम्।

अथ बहुव्रीहिसमासप्रकरणम्

प्रश्नः—बहुव्रीहिसमासस्य शब्दार्थो व्याख्येयः ।

उत्तरम्—बह्वयः व्रीहयः यस्य स बहुव्रीहिः इति विग्रहविज्ञानात् अन्यपदार्थप्रधानत्वबोधकः समासो बहुव्रीहिसमासो बोध्यः । अत्र व्रीहिशब्दस्तूपलक्षणमात्रम् । एतत्समासलक्षणन्तु प्राचीनाचार्यैरुक्तम् 'यस्य येषां बहुव्रीहिः' इति ।

कण्ठेकालः—कण्ठे कालो यस्येति लौकिकविग्रहे कण्ठ+ङि+काल+सु इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थे' इत्यनेन ज्ञापकात्समासे 'सप्तमीविशेषणे बहुव्रीहौ' इत्यनेन सप्तम्यन्तस्य कण्ठेशब्दस्य पूर्वनिपाते विभक्तिलोपे प्राप्ते 'हलदन्तात्सप्तम्याः' इत्यनेन सप्तम्या अलुकि प्रातिपदिकत्वे सौ रुत्वे विसर्गे च कण्ठेकालः इति सिद्धम् ।

वीरपुरुषकः—वीराः पुरुषाः यस्मिन् ग्रामे स वीरपुरुषको ग्रामः इति लौकिकविग्रहे वीर+जस्+पुरुष+जस् इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थे' इत्यनेन बहुव्रीहिसमासे विभक्तिलोपे 'शेषाद्विभाषा' इत्यनेन कपि अनुबन्धलोपे वीरपुरुषक इत्यस्य प्रातिपदिकत्वे सौ रुत्वे विसर्गे च वीरपुरुषकः इति सिद्धम् ।

चित्रगुः—चित्राः गावो यस्य इति लौकिकविग्रहे चित्रा+जस्+गो+जस् इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थे' इत्यनेन बहुव्रीहिसमासे विभक्तिलोपे चित्रशब्दस्योपसर्जनत्वे पूर्वनिपाते चित्रागो इति जाते 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्.....' इत्यादिना चित्राशब्दस्य पुंवद्भावे टापो निवृत्तौ 'एकविभक्ति चापूर्वनिपाते' इत्यनेन गोशब्दस्याप्युपसर्जनत्वे 'गोस्त्रियोरुपसर्जनस्य' इत्यनेन गोशब्दस्य ह्रस्वत्वे उकारे जाते चित्रगु इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च चित्रगुः इति सिद्धम् ।

रूपवद्भार्यः—रूपवती भार्या यस्येति विग्रहे 'अनेकमन्यपदार्थे' इत्यनेन बहुव्रीहिसमासे सुपो लुकि रूपवतीशब्दस्योपसर्जनत्वे पूर्वनिपाते 'स्त्रियाः पुंवद्भाषित.....' इत्यादिना रूपवतीशब्दस्य पुंवद्भावे ङीपो निवृत्तौ 'एकविभक्ति चापूर्वनिपाते' इत्यनेन भार्याशब्दस्योपसर्जनत्वे 'गोस्त्रियोरुपसर्जनस्य' इत्यनेन भार्याशब्दस्य ह्रस्वत्वे रूपवद्भार्य इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च रूपवद्भार्यः इति सिद्धम् ।

कल्याणीपञ्चमाः—कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमाः रात्रयः इति लौकिकविग्रहे कल्याणी+सु+पञ्चमी+सु इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थे' इत्यनेन बहुव्रीहिसमासे विभक्तिलोपे पञ्चमीशब्दस्य पूरण-

प्रत्ययान्तत्वेन तस्मिन् परतः कल्याणीशब्दस्य 'स्त्रियाः पुंवद्भाषित.....' इत्यादिना पुंवद्भावे प्राप्ते 'अप्पूरणीप्रमाण्योः' इत्यनेन अप्प्रत्यये अनुबन्धलोपे भत्वे 'यस्येति च' इत्यनेन इकारलोपे संयोगे कल्याणीपञ्चम इति जाते प्रातिपदिकत्वे जसि अनुबन्धलोपे सवर्णदीर्घे सस्य रुत्वे विसर्गे च कल्याणीपञ्चमाः इति सिद्धम् ।

दृढभक्तिः—दृढा भक्तिर्यस्येति विग्रहे दृढशब्दस्य प्रियादिषु पाठाद् दृढभक्तिरित्यत्र कथं पुंस्त्वमिति जिज्ञासायां 'सामान्ये नपुंसकम्' इत्यादिना दृढं भक्तिर्यस्येति विग्रहं कृत्वा बहुव्रीहिसमासो बोध्यः ।

उपदशाः—दशानां समीपे ये सन्तीति लौकिकविग्रहे दशन्+आम्+उप इत्यलौकिक विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे 'बहुव्रीहौ संख्येये डजबहुगणात्' इत्यनेन डच् प्रत्यये अनुबन्धलोपे उपशब्दस्योपसर्जनत्वे पूर्वनिपाते उपदशन+अ इति जाते डित्वाट्टिलोपे संयोगे प्रातिपदिकत्वे जसि अनुबन्धलोपे सस्य रुत्वे विसर्गे च उपदशाः इति सिद्धम् ।

आसन्नविंशाः—विंशत्याः आसन्नाः ये ते इति लौकिकविग्रहे विंशति+ङस्+आसन्न+जस् इत्यलौकिकविग्रहे 'संख्याऽव्ययासन्नादूराधिकसंख्याः संख्येये' इत्यनेन समासे विभक्तिलुकि आसन्नशब्दस्योपसर्जनत्वे पूर्वनिपाते 'बहुव्रीहौ संख्येये डजबहुगणात्' इत्यनेन डच्प्रत्यये अनुबन्धलोपे आसन्नविंशति+अ इति जाते 'तिविंशतेर्डिति' इत्यनेन तिशब्दस्य लोपे आसन्नविंश+अ इति जाते सवर्णदीर्घे प्राप्ते 'अतो गुणे' इत्यनेन पररूपे आसन्नविंश इति जाते प्रातिपदिकत्वे जसि अनुबन्धलोपे पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे च आसन्नविंशाः इति सिद्धम् ।

केशाकेशि—केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् इति लौकिकविग्रहे केश+सुप्+केश+सुप् इत्यलौकिकविग्रहे 'तत्र तेनेदमिति सरूपे' इत्यनेन समासे सुपो लुकि केशकेश इति जाते 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घे 'इच्कर्मव्यतिहारे' इत्यनेन इचि प्रत्यये अनुबन्धलोपे केशाकेश+इ इति जाते भसंज्ञायां 'यस्येति च' इत्यनेन अकारलोपे केशाकेशि इति जाते प्रातिपदिकत्वे सौ 'तिष्ठद्गुप्रभृतीनि च' इत्यनेनाव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इत्यनेन सुपो लुकि केशाकेशि इति सिद्धम् ।

जलजाक्षी—जलजे इव अक्षिणी यस्या इति लौकिकविग्रहे जलज+औ+अक्षिन्+औ इति अलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' 'अनेकमन्य-

पदार्थे' इत्यनेन समासे विभक्तिलोपे जलजशब्दस्योपसर्जनत्वे पूर्वनिपाते जलज अक्षिन् इति जाते 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' इत्यनेन षच् प्रत्यये अनुबन्धलोपे भत्वात् 'नस्तद्धिते' इत्यनेन टिलोपे जलज+अक्ष्+अ इति जाते संयोगे जलजाक्ष इति जाते स्त्रीत्वविवक्षायां 'षिद्गौरादिभ्यश्च' इत्यनेन ङीषि अनुबन्धलोपे भसंज्ञायां 'यस्येति च' इत्यनेन अकारलोपे संयोगे जलजाक्षी इति जाते प्रातिपदिकत्वे सौ हल्ङ्यादिना सुलोपे जलजाक्षी इति सिद्धम्।

द्विमूर्द्धः—द्वौ मूर्द्धानौ यस्य इति लौकिकविग्रहे द्वि+औ+मूर्द्धन्+औ इति जाते 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे 'द्वित्रिभ्यां ष मूर्ध्नः' इत्यनेन षप्रत्यये द्विमूर्द्धन्+अ इति जाते भत्वे 'नस्तद्धिते' इत्यनेन टिलोपे द्विमूर्द्ध इत्यस्य प्रातिपदिकत्वे सौ रुत्वे विसर्गे च द्विमूर्द्धः इति सिद्धम्।

अन्तर्लोमः—अन्तर्गतानि लोमानि यस्य इति लौकिकविग्रहे अन्तर्+लोमन्+जस् इत्यलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे अन्तर्शब्दस्योपसर्जनत्वे पूर्वनिपाते 'अन्तर्बहिर्भ्यांश्च लोम्नः' इत्यनेन अप् प्रत्यये अनुबन्धलोपे अन्तर्लोमन्+अ इति जाते भसञ्ज्ञायां 'नस्तद्धिते' इत्यनेन टिलोपे संयोगे अन्तर्लोमशब्दात् प्रातिपदिकत्वे सौ रुत्वे विसर्गे च अन्तर्लोमः इति सिद्धम्।

द्रुणसः—द्रुरिव नासिका यस्य इति लौकिकविग्रहे द्रु+सु+नासिका+सु इति जाते 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे 'अञ्नासिकायाः सञ्ज्ञायां नसं चास्थूलात्' इत्यनेन अच् प्रत्यये नासिकायाः नसादेशे च द्रु+नस्+अ इति जाते 'पूर्वपदात्सञ्ज्ञायामगः' इत्यनेन नस्य णत्वे संयोगे द्रुणस इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च द्रुणसः इति सिद्धम्।

विख्यः—विगता नासिका यस्येति लौकिकविग्रहे वि+नासिका+सु इत्यलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे वि इत्यस्योपसर्जनत्वे पूर्वनिपाते विनासिका इति जाते 'ख्यश्च' इत्यनेन नासिकाशब्दस्य ख्य आदेशे विख्य इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च विख्यः इति सिद्धम्।

युवजानिः—युवतिर्जाया यस्येति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे 'जायायाः निङ्' इत्यनेन निङादेशे अनुबन्धलोपे युवति+जाय्+नि इति जाते 'लोपो व्योर्वलि' इत्यनेन यलोपे 'स्त्रियाः पुंवद्भाषित'...

...' इत्यादिना पुंवद्भावे युवजानि इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च युवजानिः इति सिद्धम् ।

व्यूढोरस्कः—व्यूढम् उरः यस्येति लौकिकविग्रहे व्यूढ+सु+उरस्+सु इत्यलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे व्यूढशब्दस्योपसर्जनत्वे पूर्वनिपाते 'उरःप्रभृतिभ्यः कप्' इत्यनेन कप् प्रत्यये अनुबन्धलोपे व्यूढ+उरस्क इति जाते 'आद्गुणः' इत्यनेन गुणे संयोगे व्यूढोरस्क इत्यस्य प्रातिपदिकत्वे सौ रुत्वे विसर्गे च व्यूढोरस्कः इति सिद्धम् ।

महायशस्कः, महायशाः—महत् यशः यस्येति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे महत्+यशस् इति जाते 'आन्महतः समानाधिकरणजातीययोः' इत्यनेन महतः अकारान्तादेशे सवर्णदीर्घे 'शेषाद्विभाषा' इत्यनेन विकल्पेन कपि अनुबन्धलोपे महायशस्+क इति जाते सस्य रुत्वे विसर्गे च महायशः+क इति जाते 'सोऽपदादौ' इत्यनेन विसर्गस्य सकारे महायशस्क इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च महायशस्कः इति सिद्धम् । कप्प्रत्ययाऽभावे महायशस् इति जाते प्रातिपदिकत्वे सौ 'अत्वसन्तस्य चाऽधातोः' इत्यनेन उपधादीर्घे सस्य रुत्वे विसर्गे च महायशाः इति सिद्धम् ।

इति बहुव्रीहिसमासप्रकरणं समाप्तम्

अथ द्वन्द्वसमासप्रकरणम्

प्रश्नः—को नाम द्वन्द्वसमासः ? विविच्यताम् ।

उत्तरम्—द्वयोर्बहूनां वा एक इतरेतरयोगः समाहारो वा द्वन्द्व उच्यते । तदुक्तमभियुक्तैः—'चकारबहुलो द्वन्द्वः' इति ।

धवखदिरौ—धवश्च खदिरश्च इति लौकिकविग्रहे धव+सु+खदिर+सु इत्यलौकिकविग्रहे 'चार्थे द्वन्द्वः' इत्यनेन इतरेतरद्वन्द्वसमासे विभक्तिलोपे धवखदिरशब्दात् प्रातिपदिकत्वे औ विभक्तौ धवखदिर+औ इति जाते सवर्णदीर्घे प्राप्ते 'नादिचि' इत्यनेन निषेधे 'वृद्धिरेचि' इत्यनेन वृद्धौ धवखदिरौ इति सिद्धम् ।

रथिकाश्वारोहम्—रथिकाश्चाश्वारोहाश्च इति लौकिकविग्रहे रथिक+

जस् + अश्वारोह + जस् इत्यलौकिकविग्रहे 'चार्थे द्वन्द्वः' इत्यनेन समासे विभक्तिलोपे सवर्णदीर्घे रथिकाश्वारोह इति जाते 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इत्यनेनैकवद्भावे 'स नपुंसकम्' इत्यनेन नपुंसकत्वे सौ सोरमि रथिकाश्वारोह + अम् इति जाते पूर्वरूपे च रथिकाश्वारोहम् इति सिद्धम् ।

गोव्याघ्रम्—गावश्च व्याघ्राश्च इति लौकिकविग्रहे गो + जस् + व्याघ्र + जस् इति स्थिते 'चार्थे द्वन्द्वः' इत्यनेन द्वन्द्वसमासे विभक्तिलोपे 'येषाञ्च विरोधः शाश्वतिकः' इत्यनेनैकवद्भावे 'स नपुंसकम्' इत्यनेन नपुंसकत्वे सौ सोरमि गोव्याघ्र + अम् इति जाते पूर्वरूपे गोव्याघ्रम् इति सिद्धम् ।

गोमहिषम्—गावश्च महिषाश्च इति लौकिकविग्रहे गो + जस् + महिष + जस् इत्यलौकिकविग्रहे 'चार्थे द्वन्द्वः' इत्यनेन द्वन्द्वसमासे 'विभाषा वृक्षमृगतृण·····' इत्यादिनैकवद्भावे 'स नपुंसकम्' इत्यनेन नपुंसकत्वे प्रातिपदिकत्वे सौ सोरमि पूर्वरूपे च गोमहिषम् इति सिद्धम् ।

मित्रावरुणौ—मित्रश्च वरुणश्चेति लौकिकविग्रहे मित्र + सु + वरुण + सु इति जाते 'चार्थे द्वन्द्वः' इत्यनेन द्वन्द्वसमासे विभक्तिलोपे मित्रवरुण इति जाते 'देवताद्वन्द्वे च' इत्यनेन पूर्वपदस्यानङादेशे अनुबन्धलोपे मित्रावरुण इति जाते प्रातिपदिकत्वे औविभक्तौ 'वृद्धिरेचि' इत्यनेन वृद्धौ मित्रावरुणौ इति सिद्धम् ।

अग्नीषोमौ—अग्निश्च सोमश्च इति लौकिकविग्रहे अग्नि + सु + सोम + सु इत्यलौकिकविग्रहे 'चार्थे द्वन्द्वः' इत्यनेन द्वन्द्वसमासे विभक्तिलोपे अग्निसोम इति जाते 'ईदग्नेः सोमवरुणयोः' इत्यनेन अग्नेरिकारस्य ईत्वे 'अग्नेः स्तुत्स्तोमस्तोमाः' इत्यनेन सस्य षत्वे अग्नीषोमौ इति सिद्धम् ।

छत्रोपानहम्—छत्रश्च उपानहश्चेति लौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समाहारद्वन्द्वसमासे विभक्तिलोपे छत्र + उपानह् इति जाते, 'आदगुणः' इत्यनेन गुणे 'द्वन्द्वाच्चुदषहान्तात्समाहारे' इत्यनेन हान्तत्वाट्टच् प्रत्यये अनुबन्धलोपे संयोगे छत्रोपानह इति जाते 'जातिरप्राणिनाम्' इत्यनेनैकवद्भावे 'स नपुंसकम्' इत्यनेन नपुंसकत्वे प्रातिपदिकत्वे सौ सोरमि पूर्वरूपे च छत्रोपाहनम् इति सिद्धम् ।

मातरपितरौ—माता च पिता चेति लौकिकविग्रहे मातृ + सु + पितृ + सु इत्यलौकिकविग्रहे 'चार्थे द्वन्द्वः' इत्यनेन द्वन्द्वसमासे विभक्तिलोपे मातुरस्यकितत्वात् पूर्वनिपाते 'मातरपितरावुदीचाम्' इत्यनेन अरङादेशे निपातिते प्रातिपदिकत्वे मातरपितृ + औ इति जाते औप्रत्ययस्य सर्वनामस्थानसंज्ञायाम्

'ऋतो ङिसर्वनामस्थानयोः' इत्यनेन गुणे रपरत्वे संयोगे च मातरपितरौ इति उदीचां मते सिद्धम्। अन्यत्र तु मातापितरौ भवति। तत्र 'आनङ् ऋतो द्वन्द्वे' इत्यनेन पूर्वपदस्थानङादेशो बोध्यः।

इति द्वन्द्वसमासप्रकरणं समाप्तम्

अथैकशेषसमासप्रकरणम्

प्रश्नः—किन्नामैकशेषत्वमिति सम्यग्विचार्य विवेचनीयम्।

उत्तरम्—द्वयो सरूपयोर्बहूनां वा सरूपाणां शब्दानाम् एकस्य सत्ताविनिश्चय एवैकशेष उच्यते। यथा रामश्च रामश्च इति रामौ। रामश्च, रामश्च, रामश्च इति रामाः। अतोऽन्यत्राप्येकशेषनियमो व्यवह्रियते यथा समानार्थानां विरूपाणामन्येषां सह प्रयुक्तानाञ्च, यथा—वक्रदण्डश्च कुटिलदण्डश्च इति वक्रदण्डौ, कुटिलदण्डौ वा। पिता च माता च पितरौ। काकश्च काकी इति काकौ, इत्यादि शास्त्रत ऊह्यम्।

गार्ग्यौ—गार्ग्यश्च गार्ग्यायणश्च इति गार्ग्यौ। गर्गस्य गोत्रापत्यं गार्ग्यः 'गर्गादिभ्यो यञ्'। तस्यापत्यं युवा गार्ग्यायणः 'यञिञोश्च' इत्यनेन फक्। अत्र गोत्रयुवप्रत्ययकृतवैरूप्याद् गोत्रप्रत्ययान्तो गार्ग्यशब्दः शिष्यते। ततश्च गार्ग्य+औ इत्यत्र वृद्धौ गार्ग्यौ इति सिद्धम्।

हंसौ—हंसी च हंसश्चेति हंसौ। अत्र पुंस्त्वस्त्रीत्वमात्रकृतवैरूप्याद् 'पुमान् स्त्रिया' इत्यनेन पुंल्लिङ्गो हंसशब्दः शिष्यते। ततश्च हंस+औ इति स्थिते वृद्धौ उक्तरूपं सिद्ध्यति।

पितरौ—माता च पिता चेति पितरौ। अत्र 'पिता मात्रा' इति सूत्रेण विभाषया पितृशब्दस्यैकशेषे प्रथमाद्विवचने पितृ+औ इति जाते औप्रत्ययस्य सर्वनामस्थानत्वे 'ऋतो ङिसर्वनामस्थानयोः' इत्यनेन गुणे रपरत्वे च पितरौ इति सिद्धम्।

मातापितरौ—'पिता मात्रा' इत्यनेनैकशेषाऽभावपक्षे माता च पिता चेति लौकिकविग्रहे मातृ+सु+पितृ+सु इत्यलौकिकविग्रहे 'चार्थे द्वन्द्वः' इत्यनेन समासे विभक्तिलोपे 'आनङ् ऋतो द्वन्द्वे' इत्यनेन मातृशब्दस्यानङन्तादेशे अनुबन्ध-

लोपे नकारलोपे मातापितृशब्दात् प्रथमाद्विवचने औप्रत्यये मातापितृ+औ इति जाते औप्रत्ययश्च सर्वनामस्थानत्वे 'ऋतो ङिसर्वनामस्थानयोः' इत्यनेन गुणे रपरत्वे संयोगे च मातापितरौ इति सिद्धम् ।

श्वशुरौ—श्वश्रूश्च श्वशुरश्च इति लौकिकविग्रहे श्वश्रू+सु+श्वशुर+सु इति जाते 'चार्थे द्वन्द्वः' इत्यनेन द्वन्द्वसमासे विभक्तिलोपे 'श्वशुरः श्वश्र्वा' इत्यनेन श्वशुरशब्दस्यैकशेषे श्वशुरशब्दात् प्रथमाद्विवचने औ प्रत्यये वृद्धौ श्वशुरौ इति सिद्धम् । एकशेषाभावपक्षे श्वश्रूश्वशुरौ इति जायते । अत्र अभ्यर्हितत्वात् श्वश्रूशब्दस्य पूर्वनिपातो बोध्यः ।

गावः इमाः—गौश्च गौश्च गौश्च इति गावः । अत्र पुंल्लिङ्गस्त्रीलिङ्गेषु गोशब्देषु सहविवक्षितेषु 'पुमान् स्त्रिया' इत्यनेन पुंसः शेषं प्रबाध्य 'ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री' इत्यनेन स्त्रीलिङ्गो गौः शब्दः शिष्यते तेन गावः इमाः इत्युदाहरणं सङ्गच्छते । न तु इमे गावः ।

इत्येकशेषसमासप्रकरणं समाप्तम्

अथ समासान्तप्रकरणम्

अर्द्धर्चः—अर्द्धम् ऋचः इति लौकिकविग्रहे अर्द्ध+सु+ऋच्+ङस् इत्यलौकिकविग्रहे 'अर्द्धन्नपुंसकम्' इत्यनेन समासे विभक्तिलोपे अर्धशब्दस्योपसर्जनत्वे पूर्वनिपाते 'ऋक्पूरब्धूःपथामानक्षे' इत्यनेन अप्रत्यये अनुबन्धलोपे अर्द्ध+ऋच्+अ इति जाते गुणे रपरत्वे संयोगे अर्द्धर्च इति जाते 'अर्द्धर्चाः पुंसि च' इत्यनेन पुंस्त्वे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च अर्द्धर्चः इति सिद्धम् ।

द्वीपम्—द्वयोः पार्श्वयोर्गता आपः यस्मिन्निति लौकिकविग्रहे द्वि+ङस्, अप्+जस् इत्यवस्थायां 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' इत्यनेन अप्रत्यये अनुबन्धलोपे 'उपपदमतिङ्' इत्यनेनोपपदसमासे विभक्तिलोपे द्वि+ईप्+अ इति जाते सवर्णदीर्घे संयोगे द्वीप इति जाते प्रातिपदिकत्वे सौ सोरमि पूर्वरूपे च द्वीपम् इति सिद्धम् ।

सखिपथः—सख्युः पन्थाः इति लौकिकविग्रहे सखि+ङस्+पथिन्+सु इत्यलौकिकविग्रहे 'षष्ठी' इत्यनेन तत्पुरुषसमासे विभक्तिलोपे सखिपथिन् इति जाते 'ऋक्पूरब्धूःपथामानक्षे' इत्यनेन अप्रत्यये भत्वे 'नस्तद्धिते' इत्यनेन

टिभागस्य इन् इत्यस्य लोपे सखिपथ्+अ इति जाते संयोगे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च सखिपथः इति सिद्धम् ।

प्रतीपम्—प्रतिकूलाः आपः यस्मिन्निति लौकिकविग्रहे अप्+जस्+प्रति इत्यलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे प्रतिशब्दस्योपसर्जनत्वे पूर्वनिपाते प्रति अप् इति जाते 'ऋक्पूरब्धूःपथामानक्षे' इत्यनेन अप्रत्यये प्रति+अप्+अ इति जाते 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' इत्यनेन अप अकारस्य ईत्वे प्रति+ईप्+अ इति जाते सवर्णदीर्घे संयोगे प्रतीप इति जाते प्रातिपदिकत्वे सौ सोरमि पूर्वरूपे च प्रतीपम् इति सिद्धम् ।

गवाक्षः—गवामक्षीवेति लौकिकविग्रहे गो+आम्+अक्षि+सु इत्यलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे विभक्तिलोपे 'अक्ष्णोऽदर्शनात्' इत्यनेन अच् प्रत्यये भत्वे 'नस्तद्धिते' इत्यनेन टिलोपे गो+अक्ष्+अ इति जाते 'अवङ् स्फोटायनस्य' इत्यनेन अवङादेशे अनुबन्धलोपे गो+अव+अक्ष+अ इति जाते सवर्णदीर्घे संयोगे गवाक्ष इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च गवाक्षः इति सिद्धम् ।

प्राध्वो रथः—प्रगतोऽध्वानमिति लौकिकविग्रहे अध्वन्+अम्+प्र इत्यलौकिकविग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इत्यनेन समासे विभक्तिलोपे प्रशब्दस्योपसर्जनत्वे पूर्वनिपाते 'उपसर्गादध्वनः' इत्यनेन अच्प्रत्यये अनुबन्धलोपे भत्वे 'नस्तद्धिते' इत्यनेन टिलोपे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च प्राध्वः इति सिद्धम् ।

सुराजा—शोभनः राजा इति लौकिकविग्रहे राजन्+सु+सु इत्यलौकिकविग्रहे 'कुगतिप्रादयः' इत्यनेन समासे विभक्तिलोपे 'राजाऽहःसखिभ्यष्टच्' इत्यनेन टच् प्रत्यये प्राप्ते 'न पूजनात्' इत्यनेन निषेधे सुराजन्शब्दात् प्रातिपदिकत्वे सौ सुप्रत्ययस्य सर्वनामस्थानत्वे 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्यनेनोपधादीर्घे सुलोपे नलोपे च सुराजा इति सिद्धम् ।

किराजा—कुत्सितः राजा इति लौकिकविग्रहे राजन्+सु+कु इत्यलौकिकविग्रहे 'किं क्षेपे' इत्यनेन समासे 'राजाऽहःसखिभ्यष्टच्' इत्यनेन टच् प्रत्यये प्राप्ते 'किमः क्षेपे' इत्यनेन निषेधे किराजन् इति जाते प्रातिपदिकत्वे सौ सुप्रत्ययस्य सर्वनामस्थानत्वे 'सर्वनामस्थाने चासम्बुद्धौ' इत्यनेनोपधादीर्घे सुलोपे नलोपे किराजा इति सिद्धम् ।

सप्तगोदावरम्—सप्तानां गोदावरीणां समाहारः इति लौकिकविग्रहे 'नदी-

भिश्च' इत्यनेन अव्ययीभावसमासे सुपो लुकि 'संख्याया नदीगोदावरीभ्याञ्च' इत्यनेन अच् प्रत्यये अनुबन्धलोपे सप्तगोदावरी + अ इति जाते भत्वे 'यस्येति च' इत्यनेन इकारलोपे संयोगे सप्तगोदावर इति जाते प्रातिपदिकत्वे सौ सोरमि पूर्वरूपे च सप्तगोदावरम् इति सिद्धम् ।

अहर्दिवम्—अहनि च दिवा चेति लौकिकविग्रहे अहन् + ङि + दिवा + सु इत्यलौकिकविग्रहे समासे विभक्तिलोपे 'रोऽसुपि' इत्यनेन नकारस्य रत्वे 'अचतुरविचतुरः·····' इत्यादिना अच् प्रत्यये अनुबन्धलोपे अहर्दिव इति जाते प्रातिपदिकत्वे सौ 'अव्ययीभावश्च' इत्यनेनाव्ययत्वे सोर्लुकि प्राप्ते 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इत्यनेन सोरमि पूर्वरूपे च अहर्दिवम् इति सिद्धम् ।

ति समासान्तप्रकरणं समाप्तम्

अथ अलुक्समासः

ओजसा कृतम्—अत्र 'कर्तृकरणे कृता बहुलम्' इत्यनेन समासे विभक्तिलोपे प्राप्ते 'ओजःसहोऽम्भसस्तृतीयायाः' इत्यनेन ओजश्शब्दात् तृतीयाया अलुकि उक्तरूपं सिद्धम् ।

आत्मनेपदम्—'तादर्थ्ये चतुर्थी' इत्यत्र 'चतुर्थी' इति योगविभागात्समासे विभक्तिलोपे प्राप्ते 'वैयाकरणाख्यायां चतुर्थ्याः' इत्यनेन चतुर्थ्या अलुकि उक्तरूपं सिद्धम् ।

परस्मैपदम्—अत्रापि 'परस्य च' इत्यनेन चतुर्थ्या अलुक् भवति ।

युधिष्ठिरः—युधि तिष्ठतीत्यस्मिन् लौकिकविग्रहे युध् + ङि + स्थिर + सु इत्यलौकिकविग्रहे 'संज्ञायाम्' इत्यनेन सप्तमीसमासे विभक्तिलोपे प्राप्ते 'हलदन्तात्सप्तम्याः सञ्ज्ञायाम्' इत्यनेन सप्तम्या अलुकि 'गवियुधिभ्यां स्थिरः' इत्यनेन स्थिरशब्दस्य सकारस्य षकारे ष्टुत्वे संयोगे च युधिष्ठिर इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च युधिष्ठिरः इति सिद्धम् ।

ग्रामेवासी—ग्रामे वासी इति लौकिकविग्रहे ग्राम् + ङि + वासिन् + सु इत्यलौकिकविग्रहे 'सञ्ज्ञायाम्' इत्यनेन समासे विभक्तिलोपे प्राप्ते 'शयवासवासिष्वकालात्' इत्यनेन विकल्पेन सप्तम्या अलुकि उत्तरस्य च सुपो लुकि ग्रामे वासिन् इति जाते प्रातिपदिकत्वे सौ हल्ङ्यादिना सुलोपे नान्तत्वादुपधादीर्घे

नलोपे ग्रामवासी इति सिद्धम्। पक्षे—उभयत्र सुपो लुकि ग्रामवासी इति जायते।

पश्यतोहरः—पश्यन्तमनादृत्य हरतीति पश्यतोहरः। पश्यत्+ङस्+हर+सु इत्यवस्थायां विभक्तिलोपे प्राप्ते 'वादिक्पश्यद्भ्यो युक्तिदण्डहरेषु' इति वार्तिकेन षष्ठ्या अलुकि पश्यतोहर इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च पश्यतोहरः इति सिद्धम्।

मातुःष्वसा—मातुः स्वसा इति लौकिकविग्रहे मातृ+ङस्+स्वसा+सु इत्यलौकिकविग्रहे 'षष्ठी' इत्यनेन समासे विभक्तिलोपे प्राप्ते 'विभाषा स्वसृपत्योः' इत्यनेन षष्ठ्या अलुकि 'मातृपितृभ्यामन्यतरस्याम्' इत्यनेन स्वसुः सकारस्य विकल्पेन मूर्धन्यत्वे मातुःष्वसा इति सिद्धम्। पक्षे मातुःस्वसा इति जायते। सुपो लुगभावपक्षे तु मातृ+स्वसा इत्यत्र 'मातृपितृभ्यां स्वसा' इत्यनेन षत्वे मातृष्वसा इति रूपं जायते।

इति अलुक्समासप्रकरणं समाप्तम्

अथ समासाश्रयप्रकरणम्

प्रश्नः—समासाश्रयशब्देन कोऽर्थोऽभिप्रेतः? सम्यग् विवेचनीयम्।

उत्तरम्—समासमाश्रित्य ये विधय उच्यन्ते ह्रस्वत्वादयस्ते समासाश्रयपदेनाभिधीयन्ते।

ब्राह्मणिचेली—ब्राह्मणी चेली इति विग्रहे 'कुत्सितानि कुत्सनैः' इत्यनेन समासे विभक्तिलोपे 'धरूपकल्पचेलड्.....' इत्यादिना पूर्वपदस्थेकारस्य ह्रस्वत्वे ब्राह्मणिचेली इति जाते प्रातिपदिकत्वे सौ हल्ङ्यादिना सुलोपे ब्राह्मणिचेली इति सिद्धम्।

विद्वत्तरा—अतिशयने विदुषी इति विग्रहे तरप् प्रत्यये टापि अनुबन्धलोपे विदुषी+तर+आ इति जाते 'उगितश्च' इत्यनेन विकल्पेन पूर्वपदस्थेकारस्य ह्रस्वत्वे विदुषितरा इति। ह्रस्वाऽभावपक्षे 'तसिलादिष्वाकृत्वसुचः' इत्यनेन पुंवद्भावात् ङीपो निवृत्तौ विद्वत्+तर+आ इति जाते संयोगे विद्वत्तरा इति जाते प्रातिपदिकत्वे सौ हल्ङ्यादिना सुलोपे विद्वत्तरा इति सिद्धम्।

पदातिः—पादाभ्यां अततीति विग्रहे पाद उपपदात् अत सातत्यगमने इत्य-

स्माद् धातोः औणादिक इण् प्रत्यये अनुबन्धलोपे णित्वात् उपधावृद्धौ पाद+आति+इ इति जाते 'पादस्य पदाज्यातिगोपहतेषु' इत्यनेन पदादेशे पद्+आति इति जाते संयोगे पदाति इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च पदातिः इति सिद्धम् ।

उदपेषं पिनष्टि—उदकेन पिनष्टीति विग्रहे उदक उपपदात् पिष्लृ पेषणे इत्यस्माद् धातोः 'स्नेहने पिषः' इत्यनेन णमुल्प्रत्यये अनुबन्धलोपे गुणे उदक+पेषम् इति जाते 'पेषंवासवाहनधिषु च' इत्यनेन उदादेशे, उदपेषं पिनष्टि इति सिद्धम् ।

कौमुदगन्धीपुत्रः—कौमुदगन्ध्यायाः पुत्रः इति विग्रहे षष्ठीसमासे 'ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे' इत्यनेन ष्यङः सम्प्रसारणे यकारस्य इकारे पूर्वरूपे 'सम्प्रसारणस्य' दीर्घे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च उक्तरूपं सिद्धम् ।

सतीर्थ्यः—समाने तीर्थे वसतीति विग्रहे 'समानतीर्थे वासी' इत्यनेन यत्प्रत्यये अनुबन्धलोपे समानतीर्थ+य इति जाते 'तीर्थे ये' इत्यनेन समानस्य सादेशे सतीर्थ+य इति जाते भसंज्ञायां 'यस्येति च' इत्यनेन अकारलोपे संयोगे सतीर्थ्य इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च सतीर्थ्यः इति सिद्धम् ।

ईदृक्—इदमिव दृश्यते इति लौकिकविग्रहे इदम्+दृश्+सु इति जाते समासे विभक्तिलोपे 'इदं किमोरीश्की' इत्यनेन ईशादेशे अनुबन्धलोपे ईदृश् इति जाते प्रातिपदिकत्वे सौ रुत्वे हल्ङ्यादिना सुलोपे ईदृक् इति सिद्धम् ।

कत्तृणम्—कुत्सितं तृणम् इति विग्रहे समासे विभक्तिलोपे 'तृणे च जातौ' इत्यनेन तृणशब्दे परतः कुशब्दस्य कदादेशे कत्तृण इति जाते प्रातिपदिकत्वे सौ सोरमि कत्तृणम् इति सिद्धम् ।

बलाहकः—वारिवाहकः इति शब्दे 'पृषोदरादीनि यथोपदिष्टम्' इत्यनेन वारिशब्दस्य व आदेशे उत्तरपदस्य चादेः लकारादेशे बलाहक इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च बलाहकः इति सिद्धम् ।

प्रश्नः—'भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् ।
गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम् ॥'

अयं श्लोकः सम्यग्व्याख्यायताम् ।

उत्तरम्—अयं श्लोकः 'पृषोदरादीनि यथोपदिष्टम्' इत्यस्मिन् सूत्रे ग्रन्थकृता पठितम् । अस्यायमर्थः—'वर्णागमात्'—हस् हसने इत्यस्माद् धातोः पचाद्यचि अनुस्वारागमे हंस इति सिद्ध्यति । अन्ये वैयाकरणास्तु हन हिंसागत्योः

इत्यस्माद्धातोः सगागमे नस्यानुस्वारे हंसः इति साधयन्ति। 'सिंहो वर्णविपर्ययात्' हिंसि हिंसायाम् इत्यतः पचाद्यचि इदित्वान्नुम् 'नश्च' इत्यनेनानुस्वारे हकारस्य सकारे सकारस्य नकारे च सिंह इति रूपं सिद्ध्यति। 'गूढोत्मा वर्णविकृतेरि'ति—गूढः आत्मा यस्येति बहुव्रीहौ उत्तरपदादेराकारस्य उकारे गुणे रूपमिति भावः। 'वर्णनाशात् पृषोदरम्' पृषत् उदरम् इत्यत्र तकारलोपे सति 'आद्गुणः' इत्यनेन गुणे पृषोदरम् भवतीत्यर्थः।

विश्वामित्रः—विश्वस्य मित्रः इति लौकिकविग्रहे विश्व+ङस्+मित्र+सु इत्यलौकिकविग्रहे विश्वामित्र इति जाते 'मित्रे चर्षौ' इत्यनेन पूर्वपदस्य दीर्घे विश्वामित्र इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च विश्वामित्रः इति सिद्धम्।

बृहस्पतिः—बृहत्याः (वाचः) पतिः इति लौकिकविग्रहे बृहती+ङस्+पति+सु इत्यलौकिकविग्रहे समासे विभक्तिलोपे पुंवद्भावे 'तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च' इत्यनेन वार्तिकेन बृहत्+पति इति जाते सुडागमे अनुबन्धलोपे तकारलोपे बृहस्पति इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च बृहस्पतिः इति सिद्धम्।

तस्करः—तत्करोतीति लौकिकविग्रहे तत्+कर+सु इत्यलौकिकविग्रहे 'तद्बृहतोः करपत्योः·····' इत्यादिना सुटि तलोपे समासे विभक्तिलोपे तस्कर इति जाते प्रातिपदिकत्वे सौ रुत्वे विसर्गे च तस्करः इति सिद्धम्।

प्रायश्चित्तम्—प्रायस्य चित्तम् इति लौकिकविग्रहे प्रायः+ङस्+चित्त+सु इत्यलौकिकविग्रहे समासे विभक्तिलोपे प्राय+चित्त इति जाते 'प्रायस्य चित्तिचित्तयोः' इत्यनेन सुटि अनुबन्धलोपे 'स्तोः श्चुना श्चुः' इत्यनेन श्चुत्वे प्रायश्चित्त इति जाते प्रातिपदिकत्वे सौ सोरमि पूर्वरूपे च प्रायश्चित्तम् इति सिद्धम्।

इति समासाश्रयप्रकरणं समाप्तम्।

मध्यसिद्धान्तकौमुद्याः

कारक समास भ्वादिगणान्तायाः

पूर्वमध्यमा द्वितीयखण्डः (द्वितीय प्रश्नपत्रम्)

अतिलघूत्तरीयाणि लघूत्तरीयाणि च प्रश्नोत्तराणि

प्रश्नः १— मध्यसिद्धान्त कौमुद्याः रचयिता कः?

उत्तरम्— वरदराजभट्टाचार्यः।

प्रश्नः २— वरदराज भट्टाचार्यः कस्य शिष्य आसीत्?

उत्तरम्— भट्टोजिदीक्षितस्य।

प्रश्नः ३— प्रातिपदिकार्थ शब्दस्य का व्युत्पत्तिः?

उत्तरम्— पदम्पदम्प्रतिपदम् प्रतिपदं भवं प्रातिपदिकम्। तस्यार्थः प्रातिपदिकार्थः।

प्रश्नः ४— कः प्रातिपदिकार्थः?

उत्तरम्— नियतोपस्थितिकः प्रातिपदिकार्थः।

प्रश्नः ५— कर्तरि का विभक्तिर्भवति?

उत्तरम्— प्रथमा विभक्तिः।

प्रश्नः ६— सम्बोधने का विभक्तिः भवति?

उत्तरम्— प्रथमा विभक्तिः।

प्रश्नः ७— कर्मणः किं लक्षणम्?

उत्तरम्— कर्तुरीप्सिततमं कर्म = कर्तुः क्रिययाऽऽप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्।

प्रश्नः ८— कर्मणि का विभक्तिर्भवति?

उत्तरम्— कर्मणि द्वितीया। कर्तृवाच्ये।

प्रश्नः ९— उक्ते कर्मणि का विभक्तिर्भवति?

उत्तरम्— उक्ते कर्मणि प्रथमा स्यात्।

प्रश्नः १०— कर्म कैरुक्तं भवति?

उत्तरम्— तिङ्कृत् तद्धितसमासैः। क्वचिन्निपातेनाप्यभिधीयते कर्म।

यथा— क्रमादमुं नारद इत्यबोधि सः।

प्रश्नः ११— के कर्मयु जोधातवः?

उत्तरम्— दुह्याच् पच् दण्डरुधि प्रच्छि चि ब्रूशासुजिमथमुषाम्।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष् बहाम्।।

प्रश्नः १२— उपविशति वैकुण्ठं हरिः इत्यत्र केन सूत्रेण वैकुण्ठपदे द्वितीया भवति?

उत्तरम्— उपान्वध्याङ्वसः इति सूत्रेण।

प्रश्नः १३— उभसर्वतसोः इत्यादि कारिकापूर्णतया लेखनीया।

उत्तरम्— उभ सर्वतसोः कार्याधिगुपर्यादिषु त्रिषु।
द्वितीयामग्रेडितान्तेषु ततोऽन्यत्राऽपि दृश्यते।।

प्रश्नः १४— ग्रामं समया इत्यत्र केन द्वितीया ?

उत्तरम्— अभितः परितः-समया-निकषा-हा-प्रतियोगेऽपि इति वार्तिकेण।

प्रश्नः १५— कर्मप्रवचनीयसंज्ञा कस्याऽपवादः?

उत्तरम्— गत्युपसर्ग संज्ञापवादः।

प्रश्नः १६— लक्ष्मीर्हरिम्प्रति इत्यस्य कोऽर्थः?

उत्तरम्— लक्ष्मीहरिभर्ता इत्यर्थः।

प्रश्नः १७— अतिदेवानकृष्ण इत्यत्र केन सूत्रेण द्वितीया?

उत्तरम्— अतिरतिक्रमणे इति सूत्रेण।

प्रश्नः १८— करणसंज्ञाविधायकं सूत्रं सार्थं लिखन्तु?

उत्तरम्— साधकतमं करणम्— क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्।

प्रश्नः १९— अनभिहिते कर्तरि का विभक्तिर्भवति?

उत्तरम्— तृतीया विभक्तिः।

प्रश्नः २०— पुत्रेण सहागतः पितेत्यत्रकेन सूत्रेण तृतीया?

उत्तरम्— सहयुक्तेऽप्रधाने इति सूत्रेण।

प्रश्नः २१— अक्ष्णा काणः इत्यत्र तृतीया विधायकं सूत्रं सार्थं लिखन्तु?

उत्तरम्— येनाङ्गविकारः— येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया।

प्रश्नः २२— जटाभिस्तापसः इत्यत्र केन सूत्रेण तृतीया?

उत्तरम्— इत्थं भूतलक्षणे इति सूत्रेण।

प्रश्नः २३—सम्प्रदानस्य किं लक्षणम्?

उत्तरम्— कर्मणा यमभिप्रैति स सम्प्रदानम्— दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः।

प्रश्नः २४— वाताय कपिला विद्युत् इत्यत्र केन चतुर्थी भवति?

उत्तरम्— :'उत्पातेन च ज्ञापिते' इति वार्तिकेण।

प्रश्नः २५— अपादानस्य किं लक्षणम्?

उत्तरम्— 'ध्रुवमपायेऽपादानम्'— अपायो विश्लेषः तस्मिन् साध्ये ध्रुवम् = अवधिभूतमपादानम्।

प्रश्नः २६— अपादाने का विभक्तिर्भवति?

उत्तरम्— पञ्चमी विभक्तिः।

प्रश्नः २७— ऋते कृष्णात् इत्यत्र केन सूत्रेण पञ्चमी?

उत्तरम्— अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते इति सूत्रेण।

प्रश्नः २८— कस्मिन्नर्थे आङः कर्मप्रवचनीयसंज्ञा भवति?

उत्तरम्— मर्यादार्थे— आङ्मर्यादा वचने इति सूत्रेण।

प्रश्नः २९— षष्ठी शेषे इति सूत्रोक्तः शेषपदार्थः कः?

उत्तरम्— कारकप्रातिपदिकार्थ व्यतिरिक्तः स्वस्वांभिभावादिःशेषः।

प्रश्नः ३०— कृष्णस्य कृतिरित्यत्र केन सूत्रेणा षष्ठी?

उत्तरम्— कर्तृकर्मणो कृति इति सूत्रेणा।

प्रश्नः ३१— अधिकरणसंज्ञा विधायकं सूत्रं सार्थं लिखन्तु?

उत्तरम्— 'आधारोऽधिकरणम्'— कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकम् अधिकरणसंज्ञं स्यात्।

प्रश्नः ३२— आधारः कतिधा के च ते?

उत्तरम्— आधारस्त्रिधा— औपश्लेषिकः वैषयिकः अभिव्यापकश्च।

प्रश्नः ३३— चर्मणि द्विपिनं हन्ति इत्यत्र केन सप्तमी भवति?

उत्तरम्— निमित्तात् कर्मयोगे इति वार्तिकेण।

प्रश्नः ३४— रुदतिरुदतो वा प्राव्राजीत् इति वाक्यस्य कोऽर्थः?

उत्तरम्— रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः।

प्रश्नः ३५— समासः कतिधा?

उत्तरम्— पञ्चधा समासः।

प्रश्नः ३६— समसनं समासः इत्यत्र समसनपदार्थः कः?

उत्तरम्— पृथगर्थपदानामेकार्थोपस्थितिजनकत्वं समसनत्वम्।

प्रश्नः ३७— के पञ्च प्रकारकाः समासाः सन्ति?

उत्तरम्— केवलसमासः अव्ययीभावः, तत्पुरुषः बहुब्रीहिः द्वन्द्वश्च।

प्रश्नः ३८— को नाम केवलसमासः?

उत्तरम्— विशेषसंज्ञाविनिर्मुक्तः केवल समासः। यथा भूतपूर्वः इत्यत्र।

प्रश्नः ३९— को नामाव्ययीभावः समासः?

उत्तरम्— प्रायेण पूर्वपदार्थप्रधानोऽव्ययी भावः।

प्रश्नः ४०— को नाम तत्पुरुषः समासः?

उत्तरम्— प्रायेणोत्तर पदार्थप्रधानस्तत्पुरुषः?

प्रश्नः ४१— को नाम बहुब्रीहि समासः?

उत्तरम्— प्रायेणान्यपदार्थपदानो बहुब्रीहिः।

प्रश्नः ४२— को नाम द्वन्द्व समासः?

उत्तरम्— प्रायेणोभयपदार्थप्रधानो द्वन्द्वः।

प्रश्नः ४३— अव्ययं विभक्तीत्यादि सूत्रं पूर्णतया लिखन्तु?

उत्तरम्— अव्ययं विभक्ति समीप-समृद्धि-व्यर्द्धयर्था भाव-अव्यय-असम्प्रति-शब्दप्रादुर्भाव-पश्चाद्-यथानुपूर्व्ययौगपद्य सादृश्य-संपत्ति साकल्यान्तवचनेषु।

प्रश्नः ४४— निम्नांकितानां पदानामर्थं लिखन्तु?

(१) अधिगोपम्, (२) उपकृष्णम्, (३) सुमद्रम्, (४) निर्मक्षिकम्, (५) इतिहरि, (६) यथाशक्ति, (७) सहरि, (८) उपजरसम्, (९) परोक्षम्, (१०) तिष्ठद्गुः (११) संक्षत्रम्, (१२) सतृणमत्ति, (१३) पारेगंगम्, (१४) मध्येगंगम्, (१५) शाकप्रति।

उत्तरम्— (१) गाः पातीतिगोपाः तस्मिन्नित्यधिगोपम्।

(२) कृष्णस्य समीपम् = उपकृष्णम्।

(३) मद्राणां समृद्धिः = सुमद्रम्।

(४) मक्षिकाणामभावः = निर्मक्षिकम्।

(५) हरिशब्दस्य प्रकाशः = इतिहरि।

(६) शक्तिमनतिक्रम्य = यथाशक्ति।

(७) हरे सादृश्यम् = स हरि।

(८) जरायाः समीपम् = उपजरसम्।

(९) अक्ष्णः परः = परोक्षम्।

(१०) तिष्ठन्तिगावो यस्मिन् काले स तिष्ठद्गुः (गोदोहनकालः)।

(११) क्षत्राणां सम्पतिः = सक्षत्रम्।

(१२) तृणपरित्यज्य अति = सतृणमत्ति।

(१३) गंगायाः पारम् = पारे गंगम्।

(१४) गंगायाः मध्यम् = मध्ये गंगम्।

(१५) शाकस्य लेशः = शाक प्रति।

प्रश्नः ४५— निम्नांकितानां विग्रहं लिखत—

(१) शंकुलाखण्डः, (२) कृष्णाश्रितः, (३) मासपूर्वः, (४) पितृसमः, (५) मासावरः, (६) दध्योदनम्, (७) गुडधाना, (८) यूपदारु, (९) भूतवलिः, (१०) चोरभयम्, (११) राजपुरुषः, (१२) देवपूजकः, (१३) अर्धपिप्पली, (१४) पौर्वशालः, (१५) षाण्मातुरः, (१६) पञ्चगवम्, (१७) शाकपार्थिवः, (१८) निश्चप्रचम्, (१९) अकिञ्चनः, (२०) अकुतोभवः, (२१) अवकोकिलः, (२२) निष्कौशाम्बि, (२३) कुम्भकारः, (२४) द्वयंगुलम्, (२५) अहोरात्रः, (२६) प्राप्तजीविकः, (२७) इक्षुच्छायम्, (२८)पञ्चकपालः, (२९) फलकसक्थम्, (३०) अश्वोरसम्, (३१) सर्वाह्नः, (३२) सर्वरात्रः (३३) अश्वक्रीती, (३४) जीविकाकृत्य, (३५) अस्तंगत्य।

उत्तरम्—

(१) शंकुलया खण्डः = शंकुलाखण्डः।

(२) कृष्णां श्रितः = कृष्णाश्रितः।

(३) मासेन पूर्वः = मासपूर्वः।

(४) पित्रासमः = पितृसमः।

(५) मासेन अवरः = मासावरः।

(६) दध्ना उपसिक्तम् ओदनम् = दध्योदनम्।

(७) गुडेन मिश्रा धानाः = गुडधानाः।

(८) यूपाय दारु = यूपदारु।

(९) भूतेभ्योयोवलिः = भूतबलिः।

(१०) चोराद् भयम् = चोरभयम्

(११) राज्ञः पुरुः = राजपुरुषः।

(१२) देवानां पूजकः = देवपूजकः।

(१३) अर्धं पिप्पलीनाम् = अर्धपिप्पली।

(१४) पूर्वस्यां शालायां भवः = पौर्वशालः।

(१५) षण्णांमतृणामपत्यम् = षाण्मातुरः।

(१६) पञ्चानां गवां समाहारः = पञ्चगवम्।

(१७) शाकप्रियः पार्थिवः = शाकपार्थिवः।

(१८) निश्चितं च प्रचितं च = निश्चप्रचम्।

(१९) नास्तिकुतोभयं यस्य .सः = अकुतोभयः।

(२०) अवक्रुष्टः कोकिलया = अवकोकिलः।

(२१) कुम्भं करोतीति = कुम्भकारः।

(२२) द्वे अंगुली प्रमाणमस्य = द्वयंगुलम्।

(२३) अहश्च रात्रिश्च = अहोरात्रः।

(२४) निष्क्रान्तः कौशाम्ब्या = निष्कौशाम्बिः।

(२५) प्राप्तोजीविकां = प्राप्तजीविकः।

(२६) इक्षूणां छाया = इक्षुच्छायम्।

(२७) पञ्चसु कपालेषु संस्कृतः = पञ्चकपालः।

(२८) फलकमिव सक्थि = फलकसक्थम्।

(२९) अश्वानामुर इवः = अश्वोरसम्।

(३०) सर्वमहः = सर्वाह्नः।

(३१) सर्वाचासो रात्रिश्च = सर्वरात्रः।

(३२) अश्वेन क्रीता = अश्वक्रीती।

(३३) जीविकामिव कृत्वा = जीविकाकृत्य।

(३४) अस्तं गत्वा = अस्मत्तं गत्य।

प्रश्नः ४६— कः बहुब्रीहिः?

उत्तरम्— अनेकमन्यपदार्थे = अनेकं प्रथमान्तं अन्यपदार्थे वर्तमानं वा समस्यते स बहुब्रीहिः।

प्रश्न: ४७— बहुव्रीहि: समास: कति विध:?

उत्तरम्!— पञ्चविध:।

प्रश्न: ४८— बहुव्रीहे: के पञ्च भेदा: सन्ति?

उत्तरम्— (१) सामान्यलक्षणो बहुव्रीहि:, (२) संख्योत्तरपदो बहुव्रीहि:, (३) अन्तरालविषयको बहुव्रीहि:, (४) व्यतिहार विषयको बहुव्रीहि:, (५) सहयोग विषयको बहुव्रीहिश्च।

प्रश्न ४९— निम्नांकितानां पदानां विग्रह वाक्यानि लिखन्तु—

(१) वीरपुरुषको ग्राम:, (२) चित्रगु: पुरुष:, (३) रूपवद्भार्या पुरुष:, (४) कल्याणीप्रिय:' पुरुष:, (५) दृढभक्ति: पुरुष:, (६) हस्तिक:, (७) पाचिकाभार्य: पुरुष:, (८) पीताम्बर: पुरुष:, (९) रक्तवस्त्रानारी, (१०) प्रदत्तसुन्दराश्व: पुरुष:, (११) चारुभूषा: स्त्रिय:, (१२) पञ्चीमीभार्य:, (१३) हैममुद्रिक: पुरुष:, (१४) पटुभार्य: पुरुष:, (१५) अकेशभार्य: पुरुष, (१६) केशाकेशि, (१७) दण्डादण्डि, (१८) सपुत्र: पुरुष:, (१९) जलजाक्षी रमणी, (२०) मृगनेत्रा रात्र्य:, (२१) चतुर्दन् पुरुष:, (२२) विश्वेदेव: पुरुष:, (२३) प्रशस्तभ्राता पुरुष:।

उत्तरम्—

(१) वीरा: पुरुषा: यस्मिन् स: वीरपुरुषको ग्राम:।

(२) चित्रा गौ यस्य स: = चित्रगु: पुरुष।

(३) रूपवती भार्या यस्य स:. = रूपवद्भार्या पुरुष:।

(४) कल्याणीप्रिया यस्य स: = कल्याणीप्रिय: पुरुष।

(५) दृढं भक्तिर्यस्य स: = दृढभक्ति: पुरुष:।

(६) हस्तीनां समूह: = हास्तिक:।

(७) पाचिका भार्या यस्य स: = पाचिकाभार्य: पुरुष:।

(८) पीतमम्बरं यस्य स: पीताम्बर: पुरुष:।

(९) रक्तं वस्त्रं यस्या: सा = रकतवस्त्रानारी।

(१०) प्रदत्ता: सुन्दरा अश्वा: यश्स्मै स: = प्रदत्तसुन्दराश्व: पुरुष।

(११) चारूणिभूषणानि यासां ता: =चारुभूषा: स्त्रिय:।

(१२) पञ्चमीभार्या यस्य स: = पञ्चमीभार्य:।

(१३) हैमीमुद्रिका यस्य स: = हैममुद्रिक: पुरुष:।

(१४) पट्वीभार्या यस्य सः = पटुं भार्याः पुरुषः।

(१५) अविद्यमाना केशाः यस्या सा अकेशा। अकेशा भार्या यस्य सः = अकेश भार्यः पुरुषः।

(१६) केशेषु केशेषु गृहित्वा इदं युद्ध प्रवृत्तम् = केशाकेशि।

दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तम् = दण्डादण्डि।

(१७) पुत्रेण सह = सपुत्रः पुरुषः।

(१८) जलजे इवाक्षिणी यस्या सा = जलजाक्षी रमणी।

(१९) मृगो नेता यासां रात्रीणाम् = मेगनेत्रा रात्रयः।

(२०) चत्वारो दन्ताः यस्य सः = चतुर्दन पुरुषः।

(२१) विश्वेदेवा अस्य = विश्वेदेवः पुरुषः।

(२२) प्रशस्तो भ्राता अस्य = प्रशस्त भ्राता पुरुषः।

प्रश्नः ५०— द्वन्द्व समासस्य किं लक्षणम्?

उत्तरम्— चार्थे द्वन्द्वः = अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः।

प्रश्नः ५१— द्वन्द्व समासः कति विधः ?

उत्तरम्— द्विविधः।

प्रश्नः ५२— द्वन्द्व समासस्य कौ द्वौ भेदौ स्तः?

उत्तरम्— (१) इतरेतरयोगद्वन्द्वः (२) समाहार द्वन्द्वश्च।

प्रश्नः ५३— इतरेतरयोगद्वन्द्वस्योदाहरणं लिखत?

उत्तरम्— धवश्च खदिरश्च = धवखदिरौ।

प्रश्नः ५४— इतरेतरयोगद्वन्द्वस्य किं लक्षणम्?

उत्तरम्— समासघटकसर्वपदार्थ प्रधान इतरेतरयोगद्वन्द्वः।

प्रश्नः ५५— समाहारद्वन्द्वस्य किं लक्षणम्?

उत्तरम्— समास घटक पदार्थ समूह प्रधानः समाहारद्वन्द्वः।

प्रश्नः ५५— पाणिपदम् अस्य विग्रहः कीदृशः?

उत्तरम्— पाणिश्च पादश्च तयोः समाहारः पाणिपादम्।

प्रश्नः ५६— राथिकाश्वरोहम् इति पदस्य विग्रहः कीदृशः?

उत्तरम्— राथिकानामश्वारोहणाञ्च समाहारः = राथिकाश्वरोहम्।

प्रश्नः ५७— धानाशष्कुलि इति पदस्य विग्रहं लिखन्तु?

उत्तरम्— धानाश्च शष्कुल्यश्च तासां समाहारः = धानाशष्कुलि।

प्रश्नः ५८— के निरवसिताः?

उत्तरम्— यैः भुक्तं पात्रं क्षारोदकप्रक्षालनेन संस्कारेणाऽपि न शुद्धयति ते निरवसिताः चाण्डालादयः।

प्रश्नः ५९— के अनिर्वसिता?

उत्तरम्— यैर्भुक्तं पात्रं संस्कारेण शुद्धयति ते अनिरवसिताः।

प्रश्नः ६०— गोमहिषमिति पदस्यं विग्रहः कीदृशः?

उत्तरम्— गावश्च महिषाश्च गोमहिषम्।

प्रश्नः ६१— एकशेषसमासस्य किं लक्षणम्?

उत्तरम्— द्वन्द्वापवाद एकशेषः।

प्रश्नः ६२— एकशेषः कतिविधः?

उत्तरम्— द्विविधः।

प्रश्नः ६३— एकशेषस्य कौ द्वौ भेदौ?

उत्तरम्— १— सरूपसंबन्धी एकशेषः, २— विरूपसंबन्धी एकशेषश्च।

प्रश्नः ६४— गार्गी चा गार्ग्यायणौ च इति विग्रहे किं रूपम्?

उत्तरम्— गर्गाः।

प्रश्नः ६५— भ्राता च स्वसा च इति विग्रहे किं रूपम्?

उत्तरम्— भातरौ।

प्रश्नः ६६— शुक्लश्च शुक्ला च शुक्लञ्च इति विग्रहे किं रूप्पम्?

उत्तरम्— शुक्लम्।

प्रश्नः ६७— स च यश्च इति विग्रहे किं रूपम्?

उत्तरम्— यौ।

प्रश्नः ६८— माता च पिता इति विग्रहे किं रूपम्?

उत्तरम्— पितरौ।

प्रश्नः ६९— धातोर्जायमानाः लकराः कति भवन्ति?

उत्तरम्— दश।

प्रश्नः ७०— के दश लकाराः सन्ति?

उत्तरम्— लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्।

प्रश्नः ७१— लेट् लकारस्य कुत्र प्रयोगो भवति?

उत्तरम्— वेदेषु।

प्रश्नः ७२— सकर्मकधातुभ्यो लकाराः कस्मिन्नर्थे भवन्ति?

उत्तरम्— सकर्मकधातुभ्यो लकाराः कर्मणि कर्तरि च भवन्ति।

प्रश्नः ७३— अकर्मक धातुभ्यो लकाराः कस्मिन्नर्थे भवन्ति?

उत्तरम्— अकर्मकधातुभ्यो लकाराः भावे कर्तरि च भवन्ति।

प्रश्नः ७४— तिबादिविभक्तयः कति सन्ति?

उत्तरम्— तिबादिभक्तयः अष्टादश सन्ति।

प्रश्नः ७५— के तिबादि विभक्तयः सन्ति?

उत्तरम्— तिप् तस् झि, सिप् थस् थ, मिप् वस् मस्, त आताम् झ, थास् आथाम् ध्वम्, इड्, वहिङ्, महिङ्।

प्रश्नः ७६— कदा धातोरात्मने पदं भवति?

उत्तरम्— स्वरितेञितः कर्त्रभिप्राये क्रियाफले—

स्वरितेतो ञितश्च धातो रात्मने पदं स्यात् कर्तृगामिनि क्रियाफले।

प्रश्नः ७७— संस्कृभाषायां कति पुरुषाः भवन्ति?

उत्तरम्— संस्कृतभाषायां त्रयः पुरुषाः भवन्ति।

प्रश्नः ७८— संस्कृतस्य त्रयाणां पुरुषाणां कानि नामानि सन्ति?

उत्तरम्— १— प्रथम पुरुषः अथवा अन्य पुरुषः, २— मध्यम पुरुषः, ३— उत्तम पुरुषश्च।

प्रश्नः ७९— कदा धातोः शप् प्रत्ययो भवन्ति?

उत्तरम्— कर्तरि शप् = कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यात्।

प्रश्नः ८०— कस्मिन्नर्थे लट् लकारस्य प्रयोगो भवति?

उत्तरम्— वर्तमान कालस्यार्थे लट् लकारस्य प्रयोगो भवति।

प्रश्नः ८१— लिट् लकारस्य प्रयोगः कस्मिन्नर्थे भवति?

उत्तरम्— परोक्षे लिट्— भूतानद्यतनपरोक्षार्थवृत्तेर्धातो र्लिट्स्यात्।

प्रश्नः ८२— कस्मिन् लकारे धातोः स्यतासी भवतः?

उत्तरम्— लृट् लुटोः।

प्रश्नः ८३— कस्मिन्नर्थे धातोर्लुट् स्यात्?

उत्तरम्— भविष्यत्यनद्यतनेऽर्थे।

प्रश्न: ८४– आशिषिधातो: कौ लकारौ भवत:?

उत्तरम्– आशिषि लिङ् लोटौ।

प्रश्न: ८५– धातो: लोट्लकार: कस्मिन्नर्थे भवति?

उत्तरम्– विध्यादिष्वर्थेषु धातोर्लोट स्यात्।

प्रश्न: ८६– लुङ् लकारस्य प्रयोग: कस्मिन्नर्थे भवति?

उत्तरम्– भूतसामान्यस्यार्थे

प्रश्न: ८७– लङ् लकारस्य प्रयोग: कस्मिन्नर्थे भवति?

उत्तरम्– भूतानद्यतनस्यार्थे।

प्रश्न: ८८– लृङ: प्रयोग: कस्मिन्नर्थे भवति?

उत्तरम्– लिङ् निमित्ते लृङ् क्रियातिपत्तौ। हेतु हेतुमद्भावादि लिङ् निमित्तम्। तत्र भविष्यदर्थाद्धातोर्लृङ् क्रिया अनिष्पत्तौ गम्यमानायाम्।

प्रश्न: ८९– अत सातत्यगमने धातोलिटि कीदृशं रूपम्?

उत्तरम्– ए० व० द्वि० व० ब० व०

प्र० पु० आत आततु: आतु:

म० पु० आतिथ आतथु आत

उ० पु० आत आतिव आतिम।

प्रश्न: ९०– अव्राजीत् कस्य धातो: कस्मिन् लकारे रूपम्?

उत्तरम्– बज् धतुर्लुङि प्रथम पुरुषैकवचने।

प्रश्न: ९१– अजौपसीत् कस्य धातो: कस्मिन् लकारे रूपम्?

उत्तरम्– गुपुरक्षणे धातोर्लुङि प्रथम पुरुषैकवचने।

प्रश्न: ९२– तप सन्तापे धातो: लुटि प्रथम पुरुषैकवचने कीदृशं रूपम्?

उत्तरम्– तप्ता।

प्रश्न: ९३– धेट् पाने धातो: लोटि प्रथमपुरुषैकवचने कीदृशं रूपम्?

उत्तरम्– धवतु।

प्रश्न: ९४– व्याकरण सूत्राष्टाध्यायी केन प्रणीता?

उत्तरम्– महर्षिणा पाणिनिना।

प्रश्न: ९५– सिद्धान्तकौमुद्या: प्रणेता क:?

उत्तरम्– श्रीमद्भट्टोजिदीक्षित:।

प्रश्नः ९६— सिद्धान्तकौमुद्यां सूत्राष्टाध्याय्याः कति सूत्राणि व्याख्यातानि?

उत्तरम्— सर्वाणि सूत्राणि अष्टाध्याय्याः।

प्रश्नः ९७— अष्टाध्यायां कति सूत्राणि सन्ति?

उत्तरम्— ३९७८ सूत्राणि (अष्टसप्तत्युत्तरनवशतं त्रि सहस्रं च)।

प्रश्नः ९८— सिद्धान्तकौमुद्यां कति प्रकरणानि सन्ति?

उत्तरम्— चतुर्दश प्रकरणानि।

प्रश्नः ९९— कौमुद्याः प्रकरणानां कानि नामानि सन्ति?

उत्तरम्— (१) संज्ञाप्रकरणम्, (२) परिभाषा प्रकरणम्, (३) सन्धिप्रकरणम्, (४) सुबन्त प्रकरणम्, (५) अव्यय प्रकरणम्, (६) स्त्री प्रत्यय प्रकरणम्, (७) कारक प्रकरणम्, (८) समास प्रकरणम् (९) तद्धित प्रकरणम्, (१०) तिङन्त प्रकरणम्, (११) प्रक्रिया प्रकरणम्, (१२) कृदन्त प्रकरणम्, (१३) वैदिक प्रकरणम्, (१४) स्वर प्रकरणञ्च।

प्रश्नः १००— कस्य प्रदेशस्य निवास्यासीत् श्रीमद् भट्टोजिदीक्षितः?

उत्तरम्— केषाञ्चन मतानुसारेणायं महाराष्ट्रप्रदेशस्य केषाञ्चनमतानुसारेण चायमान्ध्रदेशीय आसीत्।

प्रश्नः १०१— श्रीमद्भट्टोजिदीक्षितः सिद्धान्तकौमुद्याः कां व्याख्यां चकार?

उत्तरम्— प्रौढमनोरमाम्।

प्रश्नः १०२— श्रीमद्भट्टोजि दीक्षितस्य कालः कः?

उत्तरम्— वैक्रमाब्दस्य षोड़शशताब्दस्य पूर्वार्द्धः।

प्रश्नः १०३— भट्टोजिदीक्षितस्य पितुर्नाम किमासीत्?

उत्तरम्— श्रीमल्लक्ष्मीधरदीक्षितः।

प्रश्नः १०४— भट्टोजिदीक्षितस्य भ्रातुर्नाम किम्?

उत्तरम्— रङ्गोजिभट्टः।

प्रश्नः १०५— भट्टोजिदीक्षितस्य कति पुत्रा आसन्?

उत्तरम्— द्वौ पुत्रौ।

प्रश्नः १०६— भट्टोजिदीक्षितस्य पुत्रयोः नाम किम्?

उत्तरम्— भानुजिदीक्षितवीरेश्वरौ।

प्रश्नः १०७— भट्टोजिदीक्षितस्य पौत्रस्य नाम किम्?

उत्तरम्— हरिदीक्षितः।

प्रश्न: १०८— भट्टोजिदीक्षित: स्वनिवास वसतिं कां चकार?

उत्तरम्— वाराणसीम्।

प्रश्न: १०९— भट्टोजिदीक्षितस्य गुरोर्नाम किमासीत्?

उत्तरम्— श्रीशेषकृष्ण:।

प्रश्न: ११०— भट्टोजिदीक्षितकृता: के ग्रन्था: सन्ति व्याकरण शास्त्रस्य?

उत्तरम्— (१) सिद्धान्तकौमुदी, (२) प्रौढमनोरमा, (३) शब्दकौस्तुभ:, (४) वैयाकरण भूषणकारिकाश्च।

प्रश्न: १११— सिद्धान्तकौमुद्या: प्रसिद्धे व्याख्ये के द्वे स्त:?

उत्तरम्— तत्त्वबोधिनी बालमनोरमा च।

प्रश्न: ११२— तत्त्वबोधिन्या: प्रणेता क:?

उत्तरम्— श्रीमज्ज्ञानेन्द्र सरस्वती।

प्रश्न: ११३— बालमनोरमाया: रचयिता क:?

उत्तरम्— श्री वासुदेव दीक्षित:।

प्रश्न: ११४— श्रीवासुदेवदीक्षितस्य पितु: नाम किम्?

उत्तरम्— श्रीमहादेव वाजपेयी।

प्रश्न: १७४— श्रीवासुदेवदीक्षितस्य मातुर्नाम किम्

उत्तरम्— श्रीमत्यन्नपूर्णा।

मनोरमा-रत्नविमर्शः । केशवदेव तिवारी । (१-२ भाग)
महाभाष्यनवाह्निकीयालोचनम् । (नवाह्निक-प्रश्नोत्तरी) विजयमित्र शास्त्री
मालविकाग्निमित्र-रहस्यम् । डॉ. बालगोविन्द झा
मीमांसापरिभाषा सोपानम् । डॉ. शिवप्रसाद द्विवेदी
मुक्तावली-प्रकाश । (न्यायसिद्धान्तमुक्तावली-प्रश्नो.) राजेन्द्रप्रसाद कोठ्यारी
मुद्राराक्षस-विवेकः । लोकमणि दाहाल
मृच्छकटिक-सोपानम् । डॉ. नरेश झा
मेघदूत-तत्वालोकः । अशोकचन्द्र गौड़ शास्त्री
रघुवंश-रहस्यम् । रामप्रसाद त्रिपाठी । १-३ सर्ग, ६-७ सर्ग, १३-१४ सर्ग
रत्नावलीनाटिका सोपानम् । डॉ. शिवप्रसाद द्विवेदी
रसगङ्गाधर-सारः । डॉ. नरेश झा
लघुशब्देन्दुशेखर-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
लघुसिद्धान्तकौमुदी-चन्द्रिका । आचार्य विजयमित्र शास्त्री
वक्रोक्तिजीवित-दीपिका । डॉ. नरेश झा
वाक्यपदीय-प्रकाशिका । (ब्रह्मकाण्ड) । डॉ. सुरेशचन्द्र शर्मा
वासवदत्ता-रहस्यम् । डॉ. शिवप्रसाद द्विवेदी
वेणीसंहार-रहस्यम् । पं. परमेश्वरदीन पाण्डेय
वेदान्तपरिभाषा-सौरभम् । आचार्य शिवप्रसाद द्विवेदी
वेदान्तसार-प्रदीपः । श्री राजेन्द्रप्रसाद कोठ्यारी
वैदिकसाहित्येतिहास-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
वैयाकरणभूषणसार-दीपिका । श्री रामकिशोर त्रिपाठी
वैयाकरणसिद्धान्तकौमुदी-चन्द्रिका । शास्त्री एवं त्रिपाठी । (१-४ खण्ड) सम्पूर्ण
वैयाकरणसिद्धान्तलघुमञ्जूषा-रहस्यम् । स्वामी रामेश्वर पुरी
वृत्तरत्नाकर-दीपिका । पं. वेदव्यास शुक्ल
व्यक्तिविवेकप्रश्नोत्तरीः । (१-२ विमर्श) कोठ्यारी एवं द्विवेदी
व्याकरणशास्त्रस्येतिहासः । डॉ. ब्रह्मानन्द त्रिपाठी
शाकुन्तल-रहस्यम् । त्रिलोकीनाथ द्विवेदी
शिवराजविजय-दीपिका । पं. वेदव्यास शुक्ल । प्रथम विराम
शिशुपालवध-रहस्यम् । श्री अशोकचन्द्र गौड़ शास्त्री । १-४ सर्ग
संस्कृतसाहित्येतिहास-कुञ्जिका । आचार्य परमानन्द शास्त्री
सांख्यकारिकादर्शः । राजेन्द्रप्रसाद कोठ्यारी
साहित्यदर्पणालोकः । रामजीलाल शर्मा । (१-६ परि.; ७-१० परि.) सम्पूर्ण
साहित्यशास्त्रीयोनिबन्धेतिहासः । वेदव्यास शुक्ल ।
सिन्धुवादवृत्त-रहस्यम् । डॉ कृष्णदेव प्रसाद
स्वरवैदिकी-प्रकाशः । डॉ. बालगोविन्द झा

भारतवर्ष के प्रायः सभी विश्वविद्यालयों
(सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी;
राष्ट्रिय संस्कृत संस्थान, दिल्ली;
जगन्नाथ संस्कृत विश्वविद्यालय, पुरी;
अवधेशप्रताप सिंह विश्वविद्यालय, रीवा;
पूर्वाञ्चल विश्वविद्यालय, जौनपुर;
गोरखपुर विश्वविद्यालय, गोरखपुर इत्यादि)

एवं

समस्त संस्कृत शिक्षा-संस्थानों (माध्यमिक संस्कृत बोर्ड
इत्यादि) के परीक्षा पाठ्य-क्रम में निर्धारित
पाठ्य-पुस्तकें एवं प्रश्नोत्तरियाँ निम्न
स्थानों पर उपलब्ध हैं—

चौखम्बा सुरभारती प्रकाशन
के. 37/117 गोपालमन्दिर लेन
पो. बा. नं. 1129,
वाराणसी 221001
दूरभाष : (0542) 2335263

चौखम्बा पब्लिशिंग हाउस
4697/2, भू-तल (ग्राउण्ड फ्लोर)
गली नं. 21-ए, अंसारी रोड
दरियागंज, नई दिल्ली 110002
दूरभाष : (011) 23286537

❖

चौखम्बा विद्याभवन
चौक (बैंक ऑफ बड़ोदा भवन के पीछे)
पो. बा. नं. 1069,
वाराणसी 221001
दूरभाष : 2420404

चौखम्बा संस्कृत प्रतिष्ठान
38 यू. ए. बंगलो रोड, जवाहर नगर
पो. बा. नं. 2113
दिल्ली 110007
दूरभाष : 23856391